शशिप्रभा

वैद्य शंकरलाल शर्मा

संस्कृतगद्यकाव्यम्

शशिप्रभा

वैद्य शङ्करलाल शर्मा
पूर्व प्राचार्य
सेठ गो० रा० चमड़िया संस्कृत महाविद्यालय
फतेहपुर (शेखावाटी) राज०

श्री श्रीनाथ प्रकाशन
जयपुर

[प्रथ]म संस्करणम्

नवरात्र : 1985

○ संस्कृतगद्यकाव्यम्
शशिप्रभा

○ वैद्य शङ्करलाल शर्मा

○ श्री श्रीनाथ प्रकाशन
चाह बोरड़ी का रास्ता,
गणगौरी बाजार, जयपुरम्

○ चत्वारिंशत्रूप्यकाणि
४०-००

○ रसकपूर प्रिण्टर्स
दीनानाथ की गली, जयपुरम्

राजस्थान संस्कृत साहित्य सम्मेलन
जयपुर

राजस्थान-संस्कृत-साहित्य-सम्मेलनस्य
प्रकाशन-योजनान्तर्गत-मुद्रितमिदं
गद्यकाव्यम् ।

निराश्रयाऽपि साश्रया ह्यलक्षिताऽपि लक्षिता ।
अलिङ्गिनी च लिङ्गिनी मया प्रणम्यते शिवा ।।
यया धृतं वपुः भयङ्करम् वधाय रक्षसाम् ।
करोतु सर्वदा शिवं क्षितौ नृणां दयावती ।।

समर्पणम्

पूज्यजननि !

भवती ममजनने, पालने, पोषणे च यानि विपुलानि कष्टानि विषेहे तेषां निष्कृतिमहम् लक्षांशेनापि कर्तुन्न पारये ।

विशालतमे मातृहृदये स्वसन्ततीन् प्रति सर्वदैव स्नेहातिशयः सुखसमृद्धयभिलाषश्च तिष्ठतः । "कुपुत्रो जायेत-क्वच्चिदपि कुमाता न भवति" इत्युक्त्या कदाचिदपि मातृहृदयं स्वसन्तति प्रति दूषितन्नैव भवति, यतोहि— "अपराधपरम्परावृत्तन्नहि माता समुपेक्षते सुतम्" इति ।

पूज्यमातः !

मया कदापि भवत्याः सेवा न विहिता । त्वदीय प्रथमसुतस्य रचनामिमाम् स्वकरकमलेषु गृहीत्वा प्रसीदतु भवती, इत्यहं प्रार्थये ।

विनयावनतो भवत्याः प्रथमः सुतः—

शङ्करः

किञ्चिन्निवेदनम्

सुरभारतीसेवाव्रतपरायणाः विपश्चितोऽन्येमहानुभावाश्च !!!

अद्याऽहममन्दमानन्दमनुभवामि स्वस्वान्ते "शशिप्रभाऽभिधाम् अभिनवां रचनां भवतां करसरोरुहेषु समर्पयन्। रचनेयं मया ऐशवीये १६७० शरदि विरचिता। तस्मिन् कालेऽध्यापने, चिकित्सावृत्तौ, गृहस्थकर्मसु च व्यापृतत्वेन समयन्न प्राप्नुवम्। पुनश्च मया चिन्तितम् यद् यथा ऋतुविहाराख्यं खण्डकाव्यं मुद्रितं वर्तते तथा रचनेयमपि मुद्रिता भवेन्नाम्। ततश्च १६७८ वर्षे महाविद्यालयाद् अवकाशे लब्धे सति अस्याः रचनायाः लेखनं समारब्धम्। कानिचिदेव पत्राणि लिखितानि स्युः चिकित्सार्थं कालिकापुर्याः (कलकत्ता) यात्रा सञ्जाता। तत्र त्रयो मासाः समतिक्रांताः। ततः प्रत्यागते पुनः लेखनं समारब्धम्। चेतसि एतन्निश्चितं यदस्याः लेखनं पूर्णमेव करिष्यामि किन्तु मम दुर्दैवविपाकात् १६८१ जनवरी मासे पञ्चमी तिथौ मम सहधर्मिण्याः हृदगत्यवरोधेन स्वर्गारोहणमभूत्। ततश्च बहुसमयं यावत् तद्वियोगदुःख-

दुःखितोऽहम् उन्मादग्रस्त इवाभवम् । यद्यपि मम परिवारस्य सर्वे सदस्याः मां भूयोभूयः विपुलां सान्त्वनामददुः । परं मम मनसि भूयोभूयस्तस्याः स्मृतिः प्रादुरभवदेव । मम पुत्रवधूः श्रीमती इन्दिरा देवी सहधर्मिण्याः स्वर्गारोहणानन्तरम् सवत्सा मम समीप एव निवसन्ती मां मुहुर्मुहुः प्रचुरां सान्त्वनां ददाति, विपुलां सेवामपि विदधाति अतोऽअहमिमाम् भूयोभूयोऽभिनन्दामि ।

अथ श्रीचमडियासंस्कृतमहाविद्यालस्य भूतपूर्ववर्तमानप्राचार्याः स्वनामधन्याः श्रीमन्त उमेशशास्त्रिमहाभागाः, श्रीमन्तोमाणिक्यलालशास्त्रिमहाभागाश्च प्रोक्तवन्तः । "शास्त्रिवर्य ! भवान् परिणतवयाः, ज्ञानवान् मतिमांश्चास्ति । "जातस्यहि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च" इत्यपि जानात्येव पुनः किमर्थं चिन्ता विधीयते । भवत्सदृशस्य कृते नोचितमेतदतश्चिन्तां जहातु । चिन्तया हानेरतिरिक्तम् न कोऽपि लाभः ।

अथ परिवारस्य सर्वसदस्यानां मित्रवर्य्याणाञ्च आश्वासनेन स्वान्ते धैर्य्यं धृत्वा पुनः लेखनं समारब्धम् । अधुनाऽस्य लेखनं पूर्तिमगात् । ततश्च स्वनामधन्यानां श्रीमतां मोतीलालजोशिमहोदयानान्तथा श्रीमतां उमेशशास्त्रिमहोदयानां प्रयासेन रचनेयं सम्प्रति मुद्रिताऽभवत् ।

अस्यां रचनायां मया पूर्वं भारतवसुन्धरास्वर्गभूतस्य काश्मीरप्रदेशस्य प्रत्यक्ष दृष्टाधिष्ठानानां यथामतिवर्णनं विहितम् । ततश्चाग्रे प्रसंगवशात् मध्ये-मध्ये षण्णा-मृतूनां वर्णनमपि विहितम् । काश्मीरभ्रमणस्यावसरस्तु श्रीयुतः वाबू विनोदकुमार चमडियामहोदयस्य प्रेरणयाऽस्य पितृमहाभागेन श्रीमता श्रेष्ठिप्रवरेण रतनलालमहोदयेन सार्धं लब्धः । श्रेष्ठिमहाभागः सरलस्वभावः, उदारमनाः, धार्मिकः, मितभाषी, हास्य-प्रियः, शिक्षाप्रियश्चासीत् । तस्य त्रयोऽपि तनयाः श्रीयुत वाबू विनोदकुमारः, श्रीयुत वाबू विजयकुमारः, श्रीयुत वाबू विनयकुमारः इमेत्रयोऽपि स्वभावसरलाः, धार्मिकाः, उदारमनसः, शिक्षाप्रियाश्च सन्ति । भगवन्तं प्रार्थये यदेते दीर्घायुषो धनवन्तः सुखिनश्च स्युरिति । ततश्च द्वितीय पुरुषपात्रस्य रवेर्जन्म, तस्य शैशवावस्था शिक्षा-परिण्यादीनां वर्णनम् अन्ते आश्रमचतुष्टयस्य पुरुषार्थचतुष्टयस्य च वर्णनं विधाय रचना समाप्तिमगात् ।

अस्याः रचनायाः "शशिप्रभा" नामविधाने रहस्यमिदमस्ति यदियं द्वितीय पुरुषपात्रस्य रवेर्जननिः । भारतीयसंस्कृतौ "जननिः जन्मभूमिश्च स्वर्गादपि गरीयसी" इत्युक्त्या जनन्याः विपुलं महत्त्वमस्ति । किञ्च सन्ततीनां जनने, पालने,

पोषणे च विपुलानि कष्टानि प्रसवित्री एव विषहते न तु जनकः। "यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" इत्युक्त्या योषितां विशिष्टं महत्त्वं प्रतिपादयितुमपि अस्याः रचनायाः नाम "शशिप्रभा" इति कृतम्।

अन्ते च स्वनामधन्य श्रीमतो मोतीलालजोशि महाभागान् श्रीमत उमेशशास्त्रि महाभागान् प्रति भूयो भूयः कृतज्ञतां प्रकटयामि। एतयोः महानुभावयोरनुकम्पया रचनेयं स्वस्वरूपं प्राप्नोत्।

विदुषां सेवकः—

शङ्करलाल शर्मा शास्त्री

।। श्री गणेशाय नमः ।।

शशिप्रभा

हंसस्थिता करसरोजगृहीतवीणा
शुभ्रांशुकैः समवलंकृतगात्रवल्ली ।
ब्रह्मादिनिर्जरसमर्चितपादपद्मा
वागीश्वरी मम मतिं विमलां विधत्ताम् ।।१।।
देवार्चिताङ्घ्रिकमलो विमलो गजेन्द्र–
शुण्डाननो भववषादहरो निजानाम् ।
सिन्दूरबिन्दुपरिभूषितमस्तकोऽसौ
श्रेयांसि नो वितनुयाद् भगवान् गणेशः ।।२।।

ज्ञात्वाऽर्णवं लघुस्वरोनिभमाशुवेगा–

दुल्लङ्घ्य मारुतसुतो वसुधासुतायाः

शोकं मुमोष पतिव्रत्तसमाख्याऽल्पं

तं नौम्यहं कपिवरं प्रणतेन मूर्ध्ना ।।३।।

व्याप्नोति योऽश्मन गमृत्सु सुसूक्ष्मरूपे—

णाकाशमारूतधनञ्जयवायुराशौ ।

मुञ्चन्ति नार्कविधुमानि विधिं हि यस्य

तं सर्वभूतरचनाचतुरं नमामि ।।४।।

योऽनादिमध्यनिधनो भगवान् स्वयंभूः

शीतोष्णवृष्टिपरिवर्तनभेदयुक्तः ।।

एकोऽपि सृष्टिमखिलां विविधप्रभावैः

कालो नियोजयति रक्षतु सर्वजीवान् ।।५।।

आसीत् पूर्वस्यामाशायाम् समस्तनगरशिरोरत्नम् अभ्रङ्कषमहाप्रासादरमणीयम्, सुचिक्कणपिच्छिलकृष्णद्रवशर्कराश्मविरचितविततराजपथम्, विविध पुष्पफलोपवनरुचिरम् कञ्चनपुरन्नामपुरम्। तत्र निखिलगुणाधारो विपुलसम्पत्तिशाली, दयावान्, परोपकारनिरतः मानवरत्नः कश्चित् कृपासागरनामा, श्रेष्ठिवरो न्यवात्सीत्। यादृग्गुणवान् श्रेष्ठिप्रवर आसीत् तादृश्येव तस्य धर्मपत्नी सीतेव पतिसेवारता, द्रौपदीव सावित्रीव भर्त्रनुगामिनी शशिकलेव वर्धमानशरीरा शशिप्रभा आसीत्। तौ दम्पती सर्वसुखसम्पन्नौ आस्ताम् परं शनैः–शनैः तयोः यौवने प्रौढावस्थायाम् परिणतेऽपि सुताननीरजं नान्वपश्यताम्। सन्ततिविरहेण शशिप्रभायाः मुखकमलम् म्लानतामभजत्। क्रमेण कालः स्वनियमेन व्यत्यगात् सन्तत्यभावेन तयोः चिन्ताऽपि समैधत।

अथैकदा क्षणदायाम् तयोः प्रसुप्तयोः परस्परं वार्तालापं प्रादुरभूत् तत्र शशिप्रभा अब्रवीत्—स्वामिन्! आवयोः सर्वसुखशालिनोरपि सन्तत्यभावेन मनो भृशं दूयते। शनैः–शनैरावयो वयोऽपि परिणमते। तरुणावस्थायामेव आवाम् सन्ततिं नाप्नुवस्तदा प्रौढावस्थायाम् कथं प्राप्स्यावः, अतः कञ्चिज् ज्योतिःशास्त्रविशारदं सुधियम्, भिषग्विद्याविदम् अनुभवशालिनमगङ्कारं वा समाहूय प्रष्टव्यम् सन्ततिप्रतिबन्धे ग्रहदोषनिदानमाहोस्वित् गर्भाशयदुष्टिहेतुः। सहधर्मिण्याः गिरन्निशम्य श्रेष्ठी न्यगदत्—श्वो ज्योतिःशास्त्रविदं पण्डितं भिषजञ्च समाहूय प्रष्टाऽस्मि।

तौ च यत् कमपि उपायं निगदिष्यतस्तमवश्यमेव करिष्यामि—इति निगद्य प्रसुप्तौ। अथ प्रसुप्तयोस्तयोः विभावर्यां स्वप्ने सितसमेधितकेशश्मश्रुः, जीर्णकृशधमनीतततनुः, आयतललाटः, गृहीतयष्टिः, परमतेजस्वी तपस्वी दृष्टिपथमागतः। तेनोक्तम्, भो दम्पती, युवां मा चिन्तां कार्ष्टाम्, अचिरेणैव सन्ततिलाभो भविता। श्वः कञ्चित् वेदविदम् विद्वांसमाहूय पुत्रेष्टियज्ञं कारणीयम्, इत्युक्त्वा स तिरोऽभूत्।

अथ प्रातः प्रबुद्धौ तौ निशास्वप्नं चिन्तितवन्तौ। तत्र श्रेष्ठी अभाषत रात्रौ यः स्वप्नो दृष्टः स किं सत्योऽसत्यो वा? शशिप्रभया न्यगादि—स्वप्नविषये आवान्न किमपि विद्वः अतः कञ्चित् पण्डितं समाहूय प्रष्टव्यम्। श्रेष्ठिना स्वकुलक्रमागतः पुरोधाः समाहूतस्तदग्रेच निखिलमपि स्वप्नवृत्तान्तमवोचि। अथ पुरोहितोऽचकथत्—श्रेष्ठिवर! भवता स्वप्नविषये यः प्रश्नो विहितस्तद्विषयेऽहं निगदामि। शास्त्रेषु स्वप्नः सप्तविधः प्रतिपादितः, यथोक्तम् वाग्भटे—"दृष्टः श्रुतोऽनुभूतश्च प्रार्थितः कल्पितस्तथा। भाविको दोषजश्चैव स्वप्नः सप्तविधो मतः।" एषु सप्तविधेषु स्वप्नेषु दृष्टादिः कल्पितान्ताः पञ्चविधाः स्वप्नाः असत्याः भवन्ति, यतो हि मानवो वनिता वा दिवसे यत् किमपि पश्यति, शृणोति, अनुभवति, प्रार्थयते, कल्पयते वा तस्य चित्रं बुद्धौ समुपतिष्ठते, किञ्च युवां दिवसे रात्रौ वा सन्तत्यभावेन चिन्तातुरौ निवसथ अत मृषा भवितुं शक्यते। भाविकदोषजौ स्वप्नौ सत्यौ भवतः, तत्र भाविकः भावी शुभाशुभसूचकः, दोषजश्च व्याधितानां भवति। युवयोः स्वप्नो धवलो मानवो लोचनगोचरोऽभूत्, एतञ्च शुभं मन्यते। स्वप्नविषये रात्रिभागोऽपि विचारणीयो भवति—यथा पूर्वरात्रे समागतः स्वप्नो निष्फलो भवति, मध्यरात्रे दृष्टस्य स्वप्नस्य फलम् विलम्बेन जायते किन्तु यामिन्यां पश्चिमयामिन्यां दृष्टः स्वप्नः सद्यः फलदायी भवति तत्कथ्यताम्—भवद्भ्यां क्षणदायाः कस्मिन् भागे स्वप्नः समवलोकितः। पुरोधसो वचः समाकर्ण्य तौ दम्पती अब्रूताम्—महीसुरवर्य! आवाभ्यां क्षमायाः पश्चिमभागे स्वप्नः समीक्षितः। एतच्छ्रुत्वा पुरोहितो ह्यभाषत—भवतोरयं स्वप्न सत्यो भविष्यति, यतः शास्त्रेषु यल्लिखितं तन्न मृषा कदाचिदपि भवति। एतदसकृदनुभूतचरमपि यत् सूर्योदयात् होराद्वयं प्राग् दृष्टः स्वप्नोऽवितथो भवति। श्रेष्ठिनोक्तम्—स्वप्नदृष्टेन साधुना एतदपि अवोचि यत् पुत्रेष्टियज्ञं कारणीयम्, अतो भवता पुत्रेष्टियज्ञस्य व्यवस्थाऽपि विधेया। तत्र यो व्ययो भविष्यति स मया सहर्षं सोढव्यः।

अथ श्रेष्ठिना प्रार्थितः पुरोहितः सविधि पुत्रेष्टियज्ञमकारयत्। परितुष्टेन श्रेष्ठिना तज्जायया च विद्वद्भ्यो भूसुरेभ्यो रौप्यम्, हिरण्यम्, वासांसि, बहुविधान्यन्नानि च वितरितानि, सन्तुष्टाश्च भूसुरास्ताभ्यामाशीर्वादं प्रादुः।

अथ व्यतीतेषु केषुचन मासेषु श्रेष्ठिजाया अन्तर्वत्नी सञ्जाता। सा च तामवस्थामुपलभ्य शनैः-शनैः क्लान्तमनस्कतया भक्तारुच्या च शरीरदौर्बल्यमवाप्नोत्। तेन तस्याः वपुः कृशम्, अक्षिणी श्वेतवर्णे, गमनागमने श्वासवृद्धिः, छर्दिश्च। श्रेष्ठी तदवस्थां जायां समवलोक्य मनसि चिन्तितवान्—ममेयं स्वधर्मिणी अस्यामवस्थायामपि किमपि कष्टं नानुभवेत् तथाविधो विधेय उपाय इति विचार्य स स्वगृहचिकित्सकमाहूय तस्याग्रे निखिलमपि वृत्तजातं न्यवेदयत्। श्रेष्ठिवरस्य तां गिरम् निशम्य चिकित्सको व्यचष्ट—योषितामन्तर्वत्न्यवस्थायाम् एतादृशि लक्षणानि समुद्भवन्ति, नात्र काऽपि चिन्ता विधेया श्रीमद्भिः, अहमेतादृशीं व्यवस्थां विधास्यामि यथा छर्द्यादीनि चिह्नानि प्रशमेष्यन्ति, दौर्बल्यताऽपि दूरीभविष्यति इत्युक्त्वा चिकित्सकेन तस्या उचित उपचारो विहितः।

अथ वेदविदा पुरोधसा समागत्य प्रोचे—श्रेष्ठिवर ! अधुना भवतो जाया ससत्त्वा वर्तते अतोभवता तस्याः पुंसवनसंस्कारः कारणीयः। अस्माकं षोडशसंस्कारेषु अन्यतमोऽयं पुंसवनसंस्कारः। पुरोधसो वचो निशम्य श्रेष्ठी न्यगदत्—भगवन् ! अस्य संस्कारस्य किं प्रयोजनमस्ति। पुरोधसा प्रोक्तम्—पुंसवनंनाम = पुमान् सूयते अनेन तत् पुंसवनम्। अनेन संस्कारेण पुत्रो भविष्यति। अयमाविष्कारः अस्माकं महर्षिणामस्ति, आयुर्वेदातिरिक्तान्य चिकित्सापद्धतिषु अस्य नामाऽपि नावलोक्यते। अस्माकं महर्षिवर्यैः बहुविधः प्रयत्न विहितः मानवकल्याणाय। अयं संस्कारः गर्भस्थितेः मासात् प्रागेव विधेयस्तेन निश्चितं पुत्रप्राप्तिर्भवति। पुरोधसो वाचं निशम्य श्रेष्ठी अशंसत्—"भगवन् ! श्रीमान् यदुचितं मन्यते तत् सर्वं विधेयम्।" श्रेष्ठिनोऽभिप्रायं ज्ञात्वा पुरोधसा शास्त्रानुसारं पुंसवनसंस्कारः कारितः।

अथ समतीते समये परितः परितापयन् वसुधावनिताम्, सरिद्वधूः कृशाङ्गीः विदधत्, नदसरस्तडागेषु जलानि परिशोषयन्, मानुषतनूनितनुनि सम्पादयन्, दिवसानि आयतानि क्षपाश्च क्षययन्, कष्टप्रदान् नैर्ऋतवायून् सम्प्रेरयन्, भगवन्तमम्बरमणिं समुत्तेजयन्, विधुबलम् कर्षन्, जगतः स्नेहं समाकर्षन् भीष्मः ग्रीष्मः समागतः। अस्मिन् कष्टप्रदसमये सर्वेऽपि प्राणिनो ग्लास्नवः, तृषापरिगताः बलहीनाश्च भवन्ति। शशिप्रभा चैनमसुखदं समयमनुभूय स्वपतिम् सरलया गिरा अवोचत्—'आर्यपुत्र ! एष निदाघसमयो निखिलजीवानाम् कृते कष्टदः, मम चावस्थान्तरत्वेनातीव कष्टदः, अहम् सर्वस्मिन्नपि दिवसे न कुत्रचिदपि कथञ्चिदपि सुखमनुभवामि।" मम मनः क्लान्तम्, क्षुदभावः, न कस्याऽपि वस्तुनो वाञ्छा, पिपासा बाधते, मुहुर्मुहुर्वारिपानेन न तृट् शाम्यति, अधिकवारिपानेन उदरे आध्मानं सञ्जायते,

स्वेदबहुलतया च वपुः परिश्रान्तमिव प्रतीयते। सन्तापाधिक्यतया च दिवा रात्रौ वा निद्रासुखम् परमदुर्लभम् सञ्जातम्। किमधिकं वाच्मि मम वपुषो दुरवस्थाम्। ग्रीष्मः प्रत्यहं परिवर्धते, सम्प्रति त्वारम्भ एव, वृद्धौ सति कथं प्राणाः शरीरे स्थास्यन्तीति महती चिन्ता मामाकुलीकरोति। ममाऽयमभिलाषो वर्तते यन्निदाघसमयम् कुत्रचिच्छीत-प्रदेशे गत्वा यापयावः। करुणासम्वलितां स्वप्रियायाः वाचम् निशम्य श्रेष्ठी समाख्यात्—"प्रिये! जाने भवत्या अवस्थाविशेषम्, योषितो मृदुप्रकृतयो भवन्ति, विशेषतश्चान्तर्वल्य वस्थायाम् वपुः मनोबलहीनाः सत्यः कथाञ्चिदपि महता कष्टेन प्रसवसमयं प्रतीक्षमाणाः जीवितन्धारयन्ति। तदुच्यताम् कुत्र गन्तव्यम्। अस्माकं देशे बहूनि शीतप्रदेशानि सन्ति, यथा—मसूरी, शिमला, नैनीतालम्, काश्मीरम् आदीनि। शशिप्रभा स्वभर्तुरात्महितां वाचं निशम्य न्यगादीत्—"आर्यपुत्र! यथा काश्मीरस्य विशिष्टा शोभा श्रुता। तत्र बहुविधानि फलानि, पुष्पाणि च मनोमोदकराणि सन्ति अतस्तत्रैव गत्वा समयमेनं यापयावः।" प्रियायाः गिरं निशम्य श्रेष्ठी अजल्पत—यत्र गमनं भवत्यै रोचते तत्रैवावाम् गमिष्यावः इत्युक्त्वा श्रेष्ठिना स्वकीयं प्रधानं प्रबन्ध-कर्तारमाहूय यात्राविषयकं सकलमपि वृतान्तं श्रावितम्। तेन च शनैः-शनैः सर्वा अपि व्यवस्था विहिता।

अथ शुभे मुहूर्ते सजायः श्रेष्ठी सर्वोपकरण्यान्वितः काश्मीरं गन्तुम् यात्रां प्रारब्धवान्। काञ्चनपुरतः इन्द्रप्रस्थम्, इन्द्रप्रस्थतश्च पठानदुर्गनगरं यावत् वाष्पयानेन यात्रामकरोत्। वाष्पयानं स्वगत्या परिधावत् स्वविश्रामस्थाने (स्टेशन) द्वित्रिक्षणं विश्रभ्य प्राचलत्। इत्थं तीव्रगत्या परिधावत् वाष्पयानं इन्द्रप्रस्थं प्रापत्। शशिप्रभा च पथि बहुविधपल्लीग्रामपुरीनगराणि समवलोकयन्ती भृशमहृष्यत्। अद्य तस्या मनः सरोजम् किञ्चित् प्रमुदितमिवास्ते। मनसि आत्मभर्तारं प्रशंसन्ती सा इन्द्र-प्रस्थस्य विश्रामस्थानम् प्राप्तवती। पठानदुर्गगन्तृवाष्पयानागमने स्वल्पो विलम्ब आसीत्। सा च किञ्चित् श्रान्ता सती विश्राममकरोत्। श्रेष्ठी तामपृच्छत्—"प्रिये! अपि भवत्याः स्वास्थ्यम् सम्यगस्ति? मार्गे किञ्चित् कष्टन्तु नानुभूतम्। अपि पिपासा, बुभुक्षा वा वर्तते? आज्ञापय, तव मनः सरोजं किं कामयते। भवत्यै यत् किमपि रोचते तन्ममाख्याहि। उक्त्यनन्तरमेव सर्वमपि वस्तुजातं स्वसम्मुखे द्रक्ष्यसि त्वम्। सुधासिञ्चितमिव भर्तुःवचो निशम्य शशिप्रभा उदतरत्—"आर्य-पुत्र! मार्गे न किमपि कष्टमभूत्।" कथन्नाम कष्टं स्यात् भवता यात्रायाः शोभना व्यवस्था सम्पादिता। मम यात्रा कृते श्रीमता वातानुकूलितस्थानस्य व्यवस्था कृता तेन न किमपि कष्टजातमभूत्। अन्तर्वल्यवस्थया किञ्चित् शरीरशैथिल्यन्तु अनुभवामि। सम्प्रति बुभुक्षा तु नास्ति, स्वल्पा पिपासा वर्तते अतः निम्बुकाम्लशर्करा-

मिश्रितमुदकं पातुमिच्छा वर्तते तदानीयताम् । श्रेष्ठिना तथा व्यवस्था सम्पादिता । अत्रान्तरे पठानदुर्गगामिवाष्पयानम स्वनियतस्थानम् (प्लेट फार्म) आयात् । तदा वाष्पयानतः केचिद् यात्रिणः अवातरन्, केचिच्चारोहन् । श्रेष्ठी अपि जायया आत्मवर्गीयमानवैः सह वाष्पयानम् समारोहत् ।

क्षपायाम् अष्टवादनसमयः । वाष्पयानविश्रामस्थानम् परितः विद्युत्प्रदीपैः भृशं व्यभासीत् । भारते इन्द्रप्रस्थविश्रामस्थानम् बृहत्तममस्ति । अत्र क्षणे-क्षणे वष्पयानानां गमनागमने वर्तते । यात्रिणां समुदायेन कोलाहलम् जनसम्मेलनञ्च प्रत्यहं प्रतीयते । भारवाहिनराश्च (कुली) यात्रिणां भारमितस्ततः स्वकीयाशिरःसु स्कन्धप्रदेशेषु च निधाय वहन्ति । लघु-लघु चतुश्चक्रगन्त्रिपु मधुरान्नानि, फलानि, विविधानि अन्य वस्तुजातानि च निधाय समुद्वहन्ति यात्रिणामुपयोगाय । यात्रिणां सौख्याय स्थाने-स्थाने विद्युद्व्यजनानि संलग्नानि सन्ति तानि वायुः प्रेरयित्वा शरीरस्वेदं दूरीकुर्वन्ति । समयज्ञानार्थञ्च स्थाने-स्थाने घटीयन्त्राणि अयःस्तम्भेषु संसक्तानि विद्यन्ते । तृषामपनेतुं पानीयनलकानां (टूँटी) व्यवस्थाऽपि वर्तते । स्नानागाराणि मलमूत्रत्यागस्थानानि च स्त्री-पुरुषाणां कृते पृथक्-पृथक् वर्तन्ते । सर्वमपि विश्रामस्थानम् स्वच्छं वर्तते, यतोहि क्षणे-क्षणे यात्रिणां गमनागमनाभ्याम् यन्मालिन्यं सञ्जायते तस्य शोधनार्थं भृत्यानां व्यवस्था वर्तते ।

व्यतीते स्वल्पे समये पठानदुर्गगामिवाष्पयानस्य प्रस्थानसमयः सञ्जातोऽतस्तच्चालितुलारब्धम् । दिवसपरिश्रान्त्या शशिप्रभा शनैः—शनैः निद्रासुखमन्वभवत् । वाष्पयानञ्च स्वतीव्रगत्या प्रधावत् प्रातः पंचवादनसमये पठानदुर्गविश्रामस्थानं प्रापत् । शशिप्रभा, श्रेष्ठी, तद्वर्गंच प्रातःकालिकं कृत्यजातं समनुष्ठीय वाष्पयानममुंचत् । ततश्च यात्रिप्रतीक्षालयमुपगम्य तत्र स्वल्पं समयं यावत् शशिप्रभा विश्रामं कृतवती । श्रेष्ठी, तद्वर्गंच भोजनादिव्यवस्थां यात्रा-व्यवस्थाञ्च कर्तुमारब्धौ ।

पूर्वाह्णे नववादनस्य समयः । श्रेष्ठी तद्वर्गञ्च भोजन-व्यवस्थां सम्पाद्य बृहत्तरमेकं मरुत्तरयानं यात्रासुखदम् भाटकेन यात्रायै स्थिरीकृतम् । विहिताशना शशिप्रभा, कृतभोजनः श्रेष्ठी तद्वर्गंच सोपकरणो यानमारोहन् । सम्यगुपविष्टेपु तेपु यानं शनैः—शनैश्चलितुमारब्धम् । स्वाबाधगत्या प्रयान्मरूत्तरयानम् पल्लीग्रामपुराणि सञ्जहत् मार्गे एकस्याश्वत्थस्य वृक्षस्यच्छायायाम् विश्रामकरोत् । तत्र सर्वेऽपि जनाः अश्वत्थस्य छायायामुपविश्य तत्रत्यं शिशिरमारुतम् सुधापानमिव निपेवितवन्तः । तत्रैकः कूपोऽपि वर्तते, तस्य पानीयममृततुल्यमिव, हिमं, स्वादु च वर्तते । तज्जलं

यथारुचि निपीय पुनरपि यानं समारोहन्, यानञ्च प्राचलत्, इत्थं प्रचलज्जम्बुनगरं प्रापत् ।

नगरमिदमतिरमणीयम्, सुधाधवलानि हर्म्याणि, विपुलायामविस्तारयुक्ता राजपथाः, चारुणि यात्रिविश्रामस्थानानि, मरुत्तराणां विश्रामस्थानानि च, बृहत्तमवाणिक्पथम्, औषधालयः, चिकित्सालयश्च, पत्रालयः, ताडिदालयञ्चाप्यत्र सन्ति । जम्बुनगरं काश्मीरराजस्य राजधान्यपि वर्तते । अत्र रूच्यं राजगृहमपि विद्यते ।

जम्बुनगरे प्राप्ते सति शशिभभा स्वप्रकोष्ठस्थितां घटिकां प्रसमीक्ष्य स्वप्रियपति समुक्तवती—"आर्यपुत्र ! अधुना मध्यान्होत्तरत्रिवादनसमयो जातः, भगवानम्बरमणिरम्बरात्तीक्ष्णातपं विमुञ्चति, न सहेऽयं वैश्वानरवर्षनिभम् तिग्मातपम् । पठानदुर्गतः आजम्बुपुरम् चण्डातपे मरुत्तरयानयात्रया भृशं परिश्रान्ताऽस्मि । न मे परग्रे यात्राकरणाक्षमम्, नाऽहं कदाचिदपि एतादृशातपे निजभवनाद्बहिर्निरगाम् । विशेषतश्चेदानीं गर्भावस्थायाम् गर्भभोषणतया परिक्लिन्नाऽस्मि ।

निजप्रियायाः करुणार्द्रवचांसि निशम्य श्रेष्ठी अब्रूत—प्रिये ! भवत्याश्चेदेतादृशी दुरवस्था वर्तते तदाऽद्य नाऽहमग्रे गन्तुमनाः, सम्प्रति अत्रैव विश्रामं करिष्यामि त्वया सह इत्युक्त्वा मरुत्तरचालकम् समादिशत्, अद्य देव्याः परिश्रान्ततया अग्रे न यातव्यम् अतोऽत्रैव विश्रामो विधेयः । मरुत्तरचालकोऽभाषत—यदाज्ञापयति श्रीमान् ।

श्रेष्ठी, शशिप्रभा तदनुयायिवर्गश्चैकस्मिन् यात्रिविश्रामगृहे विश्राममग्रहिषुः। तत्र विश्रामं कुर्वताग्तेषां भगवान् दिनमणिरस्ताचलम् यातुं तत्समीपतामभजत् ।

सायंकालस्य समयः । महीरुहशिखाश्रितखगसमूहो मधुरारावं नदति । पयोबहुलतया गुरूपयोधराः धेनवः स्ववत्सदर्शनलालसोत्सुका वेगेन पातुं धावन्त्योऽपि मन्द-मन्दगत्या रम्भमाणाः स्व-स्वगृहमभिप्रयान्ति । अध्यापकाश्छात्राश्च क्रीडाङ्गणेभ्यः विविधालापान् संलपन्तः स्वस्वावासगेहानि प्रतियान्ति । विविधकर्मकराः नराश्च स्वकार्यक्षेत्रेभ्यः निज-निजकुटीराणि निवर्तन्ते । महीसुराश्चावश्यककर्मभ्यो निवृत्ता सायंकालिकीम् सन्ध्यां समुपासते । देवालयेषु भगवतः पूजार्थं घण्टाः सन्नदन्ति ।

भगवान् भास्करो दृष्टिपथं समतिक्रम्य अस्तपयोधौ अमज्जत् । वियन्मण्डले पूर्वस्यामाशायाम् पीयूषधारां सम्वर्षन्, कामिनीस्वान्तसरोजेषु कामानलं सन्दीपयन्,

नैशम् निविडान्धकारम् स्वरोचिषा भर्त्सयन्, चक्रवाकवधूचेतसि महतीं वियोगव्यथां समुत्पादयन् काञ्चनचक्रनिभो रजनीकरो निखिलजन्तुमनांसि समुल्लासयन् प्राचकासत् । नक्षत्रगणोऽपि स्वभासा गगनं भृशमभूषयत् । क्षमारमणी धृतचन्द्रचूडामणिः जटितामितग्रहगणमौक्तिकमणिगगनवसनरुचिरा भृशमशोभत । निशागमे सर्वेषां स्वापेन सर्वत्र शान्तेः साम्राज्यमभवत् । दिवसपरिश्रान्त्याः शशिप्रभा निद्रान्नालभत । तस्याः वपुषि स्वल्पा पीड़ा वर्तते । तथाविधां स्वजायां समवलोक्य श्रेष्ठी स्वमनसि भृशमदूयत प्रियाञ्चोक्तवान्—"प्रिये ! कथन्न भवती निद्रां लभते, किं भवत्याः किञ्चिदङ्गम् पीड्यते, ब्रूहि, अहन्तवार्थे किमनुतिष्ठामि । प्रियस्य प्रियां गिरमुपश्रुत्य शशिप्रभा सरलया वाचा समभाषत—आर्यपुत्र ! मार्गपरिश्रान्त्या अन्तर्वल्यतया च मम तनुः परिदूयते तेन निद्रान्न लभे । श्रेष्ठी प्रावोचत्—कथय, किन्तव वपुः संवाहयामि । शशिप्रभा ह्रिया उक्तवती—"आर्यपुत्र ! नास्ति ममाऽयं धर्मः येनाऽहं स्वप्रियपतिं कष्टमनुभावयामि । किंचार्यावर्तनिवासिन्यो योषितो निजभर्त्रा सेवां नाभिलषन्ति परन्ते भर्तुः सेवाकामिन्यो भवन्ति । सुधास्रावनिभैः भवद्वचनैरेव मम परिश्रान्तिः क्षणेनैव प्रशममेष्यति इत्युक्त्वा सा शनैः-शनैः निद्रा-सुखमन्वभूत् ।

क्षमा क्षपिता । प्राचि भगवान् दिवाकरः दिवाश्रमजां परिश्रान्तिं विधूय प्रहसन् कमलवनानि समुद्घाटयन्, चक्रवाकवधूवियोगं दूरीकुर्वन् कौशिकं भूधरकन्दरासु स्वापयन् उदयगिरिमध्यतिष्ठत् । शिशवो वनिताः मानवाश्च रात्रिजं निद्रासुखं चिरमनुभूय अजागरुः । सर्वे शौचादीनि आवश्यककृत्यानि सम्पाद्य स्व-स्वकार्येषु संलग्ना अभवन् । नार्यो गृहकार्यरताः जाताः, नराश्च स्व-स्वकृत्यानि सम्पादयितुं स्वाभीष्टस्थानानि यातुमारब्धाः । गावः स्वस्तन्यं वत्सान् पाययितुं समाकुला वर्तन्ते । विहगाः मनोहरं कलरवं विदधति । मन्दमन्दशिशिरसमीरणः प्राणिस्वान्तजरोजानि संहर्षयन् प्रवाति । शशिप्रभा, श्रेष्ठी, तदनुयायिवर्गश्च रात्रौ निद्रासुखमनुभूय स्व-स्वशयनमजहुः । सर्वे आवश्यककृतेभ्यो निवृत्ता सन्तः यात्रां कर्तुं पुनः सज्जीभूताः ।

श्रेष्ठी स्वप्रियां शशिप्रभां समुपेत्य समब्रूत—प्रिये ! अति शोभना ते वपुषः स्थितिः ? किन्निद्रया यात्राश्रमो विलुप्तः ? अपि साम्प्रतम् सुखमनुभूयते भवत्या ? एतर्हि आवयोरनुयायिवर्गः अग्रे गन्तुमनाः वर्तते । अत्र भवत्या आज्ञां कामये । भवती यदुचितं मन्यते तदादिशतु । आकर्ण्य च स्वप्रियस्य वाक्यं शशिप्रभा समुदतरत्—"आर्यपुत्र ! अधुनाऽहं स्वस्था, न स्वल्पाऽपि व्यथा वर्तते मम शरीरे । प्रसन्नचेत-साऽहमपि यात्रार्थं सन्नद्धाऽस्मि ।" स्वप्रियाया आज्ञामुपलभ्य श्रेष्ठिवरः स्वभृत्यवर्गं यात्रायै प्राणोदयत् ।

जम्मुनगरादग्रे निखिलोऽपि पन्थाः भूधरवृन्देषु कुत्रचिदुच्चैस्तरः कुत्रचिच्च-स्वल्पो नीचः, परमग्रे क्रमेणोच्चैस्तरो मार्गो वर्तते । मरुत्तरयानमधिरूह्य सर्वे यथा स्थानं समुपविष्टाः । मसृणचिक्कणकृष्णद्रवाश्मशर्करानिर्मिते राजपथे चलितु-मारब्धम् मरुत्तरयानम् । पर्वतेषु राजमार्गो नातिकुटिलो ह्यपितु कुटिल एवं वर्तते, तिरश्चीनपतितो ह्यसितभुजङ्ग इव, तत्र प्रचलद् यानम् कदाचिदुच्चैः कदाचन च नीचैरचलत् । मार्गमुभयत अत्युच्चशिखरिण आसन्, मार्गाधस्ताच्च क्वचित् सरित्प्रवाहः, क्वचिच्च स्वल्पजलप्रवाहः, क्वचिच्च गर्तानि । यथा-यथा यानमग्रे प्रायात् तथा-तथोच्चैस्तरता समायात् । उच्चमहीधरशिखरेषु हिमसञ्चयः दूरात् रौप्यनिचय इव भृशमशोभत । इत्थं प्रचलद् यानम् विस्तृतं पन्थानमत्यवाहयत् । श्रीनगरादष्टादश गव्यूतिमितात् स्थानात् श्रीनगरं यावत् समतलो मार्गो वर्तते । तत्र मार्गमुभयतः हरितहरिता उच्चपादपाः सन्ति, तेषां मध्यस्थितमार्गे तज्जन्यशिशिरवायुना स्वर्ग-सुखमिवानुभवन्तो यात्रिण अनायासेन यात्रां सम्पादयन्ति । इत्थं सायं श्रेष्ठिनो मरुत्तरयानम् श्रीनगरं प्राप्तवान् ।

श्रीनगरं श्रियाः नगरमिव रमणीयम् । नगरमिदं वितस्तासरित उभयोस्तटयोः स्थितम् परमां शोभामावहति । दारुनिर्मितोच्चावचानि गृहतलानि नीलरक्तवलक्षरा-गरञ्जितानि हर्म्याणि, विस्तृताः राजमार्गाः, पृथक्-पृथग्विभिन्नविक्रेयवस्तूनामापणानि, मध्येनगरम् शोभनान्युपवनानि, केषुचिदापणेषु च मृदुलतमौर्णरचितानि विविधानि शालानि, अन्येषु च रजतानिर्मितानि विविधान्यभूषणानि, अपरेषु च दारुमयानि विविधानि वस्तुजातानि क्रीडनकानि च, वंशपट्टिकानिर्मिताः विविधाकाराः, मञ्जूषाः, मसृणभास्व-राश्मनिर्मितानि विविधानि भूषणानि लौहादिविविधधातुरचितान्यन्येकानि चारुणि लघूनि वस्तूनि, यात्रिणां निवासार्थं निर्मितानि विविधानि भवनानि, सुन्दरं मरुत्तर-विश्रामस्थानम्, स्थाने-स्थाने अयःस्तम्भेषु संलग्नाः विद्युत्प्रदीपाः नगरस्याधिकां रुचं समेधयन्ति ।

विभावर्य्याम् चापलैः प्रदीपैः नगरस्य सुषमा वासवपुरीमप्यतिशेते । यत्र कृष्णपक्षमपि शुक्लपक्षमिवाभासते । नगरमभितो विराजन्तो रुचिरभूभृतः पुरस्य विपुलां शोभां वर्धयन्ते । महीधराणामधित्यकारूपत्यकासु च वसुमतां रचितानि रूच्यानि हर्य्याणि विबुधगृहाणीव राजन्ते । नगरं परितः बहुविधपुष्पफलानां पादपैः स्वर्गायते श्रीनगरम् ।

शशिप्रभा नगरस्य शोभामवलोक्य चेतसि भृशममोदत । अत्र निदाघतापो न तथा बाधते यादृक् स्वनिवासवसतावबाधत । आर्यावर्तस्यान्यभागापेक्षया स्थानमिदम्

पञ्चषसहस्रस्फीतोच्चैः वर्तते। उत्तरस्यां दिशि वर्तमानत्वेनात्र ग्रीष्मेऽपि प्रायेण हिमपातो भवति। शिशिरकाले तु गृहतलेष्वप्यत्रहिमं भृशं निपतति।

श्रेष्ठिना स्वनिवासाय रामणीयकमेकम् हर्म्यम् भाटकेन गृहीतम्। तत्र श्रेष्ठी, तज्जाया, तदनुयायिवर्गश्च सुखेन न्यवसन्।

अद्य रविवसरः। शशिप्रभायाः निद्रा प्रातःशीघ्रमेव दूरीभूता, सा चावश्यककृत्येभ्यो विनिवृत्ता स्वभर्तारम् न्यगदत्—"स्वामिन्! श्रूयतेऽत्र द्वे बृहदुद्याने वर्तेते, तयोरेकम् समीपतमम् अपरञ्च किञ्चिद् दूरे वर्तते। रवौ श्रीनगरवासिनो महिलाःपुरुषाः शिशवश्च तत्र भ्रमणार्थं समायाता विविधप्रान्तीयाः स्त्रियो, नराः, बालकाः, बालिकाश्च उद्यानशोभां विलोकयितुमुपयान्ति। उक्तदिने उद्यानयोः सुमहज्जन-सम्मेलनमिव भवति अत आवामपि तत्र यावः उद्यानशोभामभिवीक्षितुम्।

श्रेष्ठी—यद् भवत्यै रोचते तदहं करोमि। उत्तिष्ठ, तत्र यातुम्। शशिप्रभा स्वभर्त्रा सह उद्यानशोभां विलोकयितुं प्राचलत्।

इमे उद्याने भारते यवनराज्यकाले केनचिद् यवनसम्राजा निर्मापिते। यात्रिणां सुरक्षार्थमुद्यानस्य प्रधानद्वारनिकटे रक्षा-पुरुषाः नियुक्ताः भवन्ति। शशिप्रभा उद्यानमुपेत्य यत्र-तत्र तस्य रमणीयताञ्च विलोक्य स्वान्ते महतीम् मुदमलब्ध।

डलाह्वमहत्सरोवरस्य पूर्वास्मिस्तटे गिरेरूपत्यकायाम् स्थितमिदमुद्यानम् लोके "निषाद" इति नाम्ना प्रसिद्धम्। अस्योर्ध्वप्रदेशे दूरप्रदेशादेका कुल्या प्रवहति। तस्याः स्वल्पं जलम् रविवासरे अस्मिन्नुद्याने प्रक्षिप्यते, तेनोद्यानमध्यस्थितेषु अधोऽधोभागे निर्मितेषु सोपानेषु पतन् रजतद्रव इव प्रतिभाति। प्रतिसोपानपंक्तिषु स्थितमेकैकं जलक्षेपियन्त्रं वारिप्रषतः विमुञ्चन् विशदमौक्तिकनिचयानि प्रक्षिपन्निव विभाति। उभयोः सोपानपंक्तितटयोश्चेरीसेब्बवातादाक्षोटादीनां पादपाः विलसन्ति। तत्र-तत्र विविधप्रसूनानां विरुधः समागन्तॄणाञ्चेतांसि समाकर्षन्तीव। समागता-स्तरूणाः, धवलरक्तपीतहरित्शाटिका दधत्यः, दक्षिणप्रकोष्ठेविभृतघटिकाः, कृशकरितटिन्यः, गुरुनितम्बतया त्वरितगन्तुकामा अपि मन्दगामिन्यो रागरञ्जिता-धरोष्ठाः, नयनार्पित कृष्णकज्जलाः, श्रवणेषु, शिरःसु च विधृतविविधवर्णकुसुमाः, ग्रीवासु सुरभिरमणीय कुसुमस्रजो दधत्यः गोधूमवर्णवत्यः कश्चिदसितवर्णवत्यो मृगविलोचनाश्चन्द्रमुख्यस्तरूण्यश्च भृशं प्रमुदिताः सन्त्यः, केचन स्वकाश्मीरभ्रमणस्मृ

तौ तत्रत्यानि चित्राणि चित्रग्रहणयन्त्रेण (केमरा) गृह्णन्ति । केचन युवकाः हिमानिल-मनोह्लादिपादपच्छायायाम् उपविष्टाया अङ्कस्थित शावकायाः स्वप्रियतमायाश्चित्रं समुत्तारयन्ति । क्वचिच्च सम्मिलिताश्शिशवो नवोढाः वालास्तरूणाः स्थविराश्च प्रातःकालिकमशनमश्नन्ति । क्वचन समागताः जनाः विविधानि वस्तूनि विक्रीणन्ति । वृहत्तरपादपच्छायायामुपवेशनेनात्र मध्यान्हकालिकं तिग्मरश्मिस्तापन्न क्लेशयति । अपरत्र चित्रपटनिर्मातारश्चित्रपटकर्मणि पटूनां युवतीयुवकानां परस्परालापसहितानि चित्राणि गृह्णन्ति ।

शशिप्रभा निषादोद्यानस्य महतीं सुषमां स्वलोचनाभ्यां पिवंती नाशक्नोत् स्वहृदि हर्षातिरेकं धारयितुमाह च भर्तारम्—"अहो ! अस्मिन्नुद्याने प्रकृत्याः देव्या अद्भुतां रचनां वीक्ष्य को न हृष्येत् । नन्दनवनसदृशां निषादोद्यानशोभां दर्शनोत्सुकाः भिन्न-भिन्नप्रदेशेभ्यः समागताः शिशवो योषितो मानवाश्चात्र समेत्य धन्यधन्यम् स्वात्मानं मन्यन्ते ।

उद्यानशोभालोकनसक्तमनःशरीराम् शशिप्रभां सम्वोध्य श्रेष्ठी अचकथत् ।

श्रेष्ठी—प्रिये ! अत्र भ्रमतोरावयोर्भूयान् समयः समतीतः । किञ्च, भवत्याः विपुलभ्रमणेन पादसरोजौ पीडितौ नु भवतः ? यदि भवत्यै रोचेत तदा सम्मुखास्थित-तमहत्पादपच्छायायाम् किञ्चिद् विश्रम्य भोजनं कुर्वः । यतो हि एकादशवादनसमयो जातः । भगवान् भास्करोऽपि स्वांशून् किञ्चत्तिग्मान् प्रक्षेप्तुमारब्धः । मम चरणौ दूयेते, गलविलं तृषा परिशुष्यति, शरीरे स्वल्पः स्वेदोद्गमः सञ्जातः । समधिकचलनेन शरीरे शैथिल्यमिवानुभवामि ।

शशिप्रभा—सम्मुखस्थितसप्तपर्णतरूच्छायायामुपविश्य आवाम् क्षणं विश्रामं कुर्वः । अद्य स्वर्गसदृशीं शोभां समीक्ष्य कथं भवान् परिश्रान्तः । अन्तर्वत्न्यप्यहं नाद्यावधि परिश्रान्ताऽस्मि न मम गात्रे काचन पीडा । भवांश्चेद् उद्याने परिभ्रमितुम-धुनाऽक्षमस्तर्हि विश्रामोऽवश्यमेव विधेयः ।

एकस्य वृहत्तमसप्तपर्णतरोश्छायायाम् एकं विस्तृतं वसनं समास्तीर्य तत्र तौ दम्पती समुपविष्टौ । क्षणं विश्रम्य भोजनञ्च विधाय महत् शरीरसुखमन्वभूताम् ।

अथ चञ्चलमनःसरोजिन्या शशिप्रभया स्वघटिकां निरीक्ष्य स्वभर्तारं प्राब्र्यत —"स्वामिन् ! मध्यान्होत्तरचतुःवादनवेला सञ्जाता । आशासे, वहुकालं विश्रामेणऽ-धुना भवान् विगतश्रमः स्वस्थश्च स्यात्, भगवान् दिवाकरोऽपि नाधुना तिग्मातपं

विजहाति, शिशिरः समीरणो वहति, सूर्यस्याऽस्तगमने सार्धत्रिहोराऽवशिष्टः समयः अतोऽत्रत्यं प्रसिद्धम् द्वितीयमुद्यानमपि अत्रैव अवलोकनीयम् ।

श्रेष्ठी—साम्प्रतमहं विगतक्लमो मुदितमनः कमलश्च । भवत्याः योऽभिलाषः प्रकटीकृतस्तमहमनुमोदयामि । तदुद्यानमस्मात् स्थानात् किञ्चिद्दूरे वर्तते, तत्रावाम् पद्भ्यां यातुमसमर्थौ अतः एकं लघुमरुत्तरं भाटकेन संगृह्य, तमारूह्य च गमनं श्रेयः । इत्युक्त्वा स्वप्रियाचेष्टज्ञः श्रेष्ठी एकं मरुत्तरं स्थिरीकृतम्, तत्रोपविष्टौ द्वावपि द्वितीयमुद्यानं भ्रमितुमयाताम् ।

द्वितीयमुद्यानमिदम् "सालिमारमिति" नाम्ना प्रसिद्धं वर्तते । प्रथमापेक्षया नातिविशालम् । चारूतामपि तस्मान्न्यूनतामेव विभर्ति, परमिदमपि समागन्तृणाम् नयनामोदवहन्त्वस्त्येव । शशिप्रभा, श्रेष्ठी च तत्र सत्वरङ्गतौ । प्रधानद्वारेण उद्यानं प्रविश्य तच्छोभायाः दर्शनकामुकौ तौ दम्पती इतस्ततो भ्रमितुमारब्धौ । अस्मिन् उद्याने विविधानि वहूनि जलक्षेपयन्त्रणि विद्यन्ते, यानि दर्शकानां मनांसि सलिलपृषतमिश्रितमृदुशिशिरानिलेन समुल्लासयन्ति । मध्ये–मध्ये दर्शकाणामुपवेशनयोग्यानि रमणीयानि स्थानानि निर्मितानि सन्ति ।

तौ दम्पती पूर्वमितस्ततः परिभ्रम्य पुनरेकस्मिन् स्थाने समुपविष्टौ सलिल–धाराबिक्षेपियन्त्रप्रेक्षणसक्तेक्षणनीरजौ भृशममोदताम् । तस्यादधिष्ठानादन्यत्र यातुमनिच्छयाऽपि श्रेष्ठिजायया कथञ्चिदपि तत् स्थानममुच्यत । किञ्चिद् दूरंगत्वा उद्यानावनिं समवलोक्याह–अहो! कीदृशी रमणीया इयमुद्यानवसुन्धरा कोमलचिक्कणहरित्शाद्वलेनसमाच्छन्ना विधृतहरितशाटिकातरुणिरीव शोभते । छत्राकारतया सज्जीकृता एते लघुपादपाश्छत्राणीव आगन्तून् तिग्मादहस्करातपाद्रक्षन्ति । शिशिर शिशिरः पवनः, अव्यक्तमधुरो विहङ्गमनादश्च शिशुनां मृदुमधुरगिरः, तरुणितरुणानां परस्परं प्रेमालापाश्च, प्रौढयोषितां मानवानाञ्च विविधालापानि, युवतिस्त्रीणां विविधपरिधानभूषणानि च विगतरागकामस्य संयमशालिनो मुनरेपि मनो विक्षोभयन्ति स्म । भवान् कामयते चेत् एकस्य च्छत्राकृतिच्छायायामुपविश्य किञ्चित् कालं विगतक्लमौ भवेव ।

श्रेष्ठिना स्वजायाया आज्ञा परिपालिता । तौ चैकस्याच्छत्राकृतिपादपच्छा–यामाश्रित्योपविष्टौ ।

श्रेष्ठिना ह्यभाषि—प्रिये ! काश्मीरस्य सुषमां किं वर्णयामि । मन्ये, भगवता प्रजापतिना आर्यावर्ते काश्मीरप्रदेशस्य निर्मितौ स्वकीया सकलापि शिल्पकला अत्र व्ययीकृताः–अत्र हि मृदुमधुराणि सेव्रफलानि, अक्षोटानि, वातादानि, कर्कंधुसदृशानि तवाधरोष्ठवत् शोणिमतां परिबिभ्रति मधुराम्लानि चेरीफलानि मिष्टानि कृष्णरक्त–मानि तूतफलानि, मृदूनि निकोठाक्षोटफलानि, लोहितपीतानि, लोहकटानि, शालिधान्यानि चास्य प्रदेशस्याधिकां शोभां परिदधति । रजतवद् भासमानाः हिमाच्छन्नाः महोच्चमहीधराः लघूनि, महान्ति, बहूनि सरोवराणि, समुच्छलन्मुक्ताकारसलिलविन्दवौ लघवो बृहतश्च गिरिनिर्झराः प्रदेशस्यास्य स्वर्गादपि मनोरमतां साधयन्ति । किञ्च, विबुधा–र्चयामुपयोगि, तिलकोपयोगि, आयुर्वेदीयविविधौषधानि निर्मातुमत्युपयोगिघुसृणमपि अत्रैव समुत्पद्यते । अत्रत्यमहीधरेषु कस्तूरीमृगाः, सम्भरशृंगमृगाः, चमरीगावश्चात्र बाहुल्येन परिभ्रमन्ति । अत्रत्यौर्णपेलवता तु विश्वविश्रुता । भारतस्येतरप्रदेशस्याजानां केशाः कृष्णाः कठिनाश्च सन्ति किन्त्वत्रत्यछगलीनां छगलानाञ्च केशाः कोमलः सन्तोऽष्टापदसमरुपतां बिभ्रति । अत्रत्यं कलापाटवमपि विश्ववितत‌म् । अत्रत्यानि महर्घाणि औणदुकुलानि निरीक्ष्य कस्य चेतो न प्रमोदते । दारुमयानि, विविधधातुमयानि चानेकानि विपुलानि वस्तुजातान्यत्र निर्मीयन्ते । अहो! धन्यत–मेयम् काश्मीरकाश्यपी, धन्याश्चत्रत्याः शिशवो योषितो मानवाश्च सुकृतकर्मणैवात्र लभते जनिं प्राणी । योषितो मनुष्याश्च रूचिरवर्णाः, कोमलस्वभावाः, कर्तव्यनिष्ठाश्च सन्ति ।

पुराऽत्र प्रदेशे सुरसरस्वतीसमुपासकाः वहवो विद्वांसो जनिमग्रहिषुः । यद्यप्यत्र साम्प्रतम् यवनानां बहुलता वर्तते किन्तु यवनधर्मावलम्बिनोऽपीमे न दुह्यन्ति हिन्दुभ्यः । ननु कथमेते द्रुह्युः, एतेषां पूर्वजा पुरा हिन्दव एवासन्, केनचिद् यवनसम्राजा धर्मपरिवर्तनं विहितमेतेषाम् । किमपि भवेन्नाम, अन्नत्यानां समेषामपि मानवानां स्वभावो मृदुः द्रोहरहितश्चास्ति । नात्र हिन्दुयवनयोः कश्चिदभेदः । वस्तुतो मानवस्यैतादृगेव स्वभावः समीचीनो वर्तते । विश्वस्मिन्नपि विश्वे मनुष्य एकजातीय एव । स कृष्णो गौरः श्यामो गौरश्यामो व भवेत् किन्तु मानवोऽस्ति । इत्थमेव स रामम्, कृष्णम्, मुहम्मदं वा, ईशामशीहं वा कमपि पूजयेत्परन्न कश्चिदन्यः प्राणी । अस्तु, एतर्हि भगवान् भास्करोऽपि विश्रमितुं अस्तगिरिं समेतुं कामयते । पक्षिणः स्व-स्वनीऽडमानभियान्ति, गावो महिष्योऽजाव्यश्च स्वस्वाधिष्ठानमभियान्ति, आवामपि स्वनिवासगेहम् प्रतियायाव ।

शशिप्रभा निजनिकेतनमाप्य झटिति मृदुशयनीयमाश्रित्य प्रसुप्ता । क्षणेनैव श्रेष्ठी तदभ्यर्णमुपेत्य प्राजल्पत्—"प्रिये ! कथं शयनीये शयनं समनुष्ठितम् । किं

भवती परिश्रान्ता ? अद्यतनः समग्रोऽपि दिवसः परिभ्रमणे व्यतीतः, समधिकपरिभ्रमणेन साधारणो ना नारी च श्रमेण शिथिलतामनुभवतः । भवती चान्तर्वत्नी, यथा-यथा तव गर्भशय्यायाम् गर्भो वृद्धिमेति तथा-तथा भवती शोणिताल्पतया संक्लिश्यति । पूर्वापेक्षया तव कपोलौ साम्प्रतं परिशुष्कौ, धवलौ, म्लानौ च प्रतीयेते । चक्षूण्यपि धवले, अधरोष्ठे शोणिम्नोऽभावः, करचरणनखा अपि हिमसदृशतां परिदधति । अस्तु, अधुना क्षपाया अष्टौ वादनवेला सञ्जाता, अतो भुक्त्वा शेष्व । यदि भवत्यै रोचेत तदा श्वोऽत्रत्यं प्रसिद्धम् डलाह्वयं महत्सरोवरम् पश्येव । इत्युक्त्वा प्रेयसी भोक्तुं सम्प्रार्थ्य स्वयमपि भोक्तुं पाकशालामभ्यगात् ।

अथ विहिताशनौ तौ दम्पती स्व-स्वपर्यङ्कमारुह्य प्रसुप्तौ । शशिप्रभा स्वप्ने गलितवयस्या वलिपलितवत्या कयाचित् स्थविरया समर्पितमाम्रफलं गृह्णाति, गृहीत्वा तत्फलं पुनः प्रसुप्ता । अथ प्रातः प्रबुद्धा सती स्वस्वामिनमुक्तवती—"प्राणप्रिय! अद्य क्षणदायाम् स्वप्ने मया कयाचित् स्थविरया दत्तं सहकारफलम् लब्धम् । अस्य किं फलं भविष्यति ?

श्रेष्ठी—भवत्याः स्वप्नः शीघ्रमेव शुभकुलदाता भविता, अधिगतरसालफलेन स्वप्नेन तवाभिलाषा पूर्णतामेष्यति, त्वं शीघ्रमेव सुताननकमलं द्रक्ष्यसि । स्वामिवचो निशम्य ह्रियाऽवनताशिराः शशिप्रभा स्वमनःसरोजे भृशमतुष्यत् ।

अथ शौचादिभ्यो निवृत्तौ तौ दम्पत्ती डलाह्वयमहत्सरोवरस्य दिदृक्षया स्वनिवासस्थानतः प्रस्थितौ । तटान्तिकमुपागतौ दम्पती एकां नावमारूह्य पानीये तया भ्रमितुमारब्धौ ।

शशिप्रभा—स्वामिन् ! कीदृशं मनोहरमेतत् महत्सरोवरम् । सलिले प्लवन्ती नौरावाम् समारोह्य शनैः-शनैश्चलति । वारिस्पर्शहिमानिलो मनो मोदयते । दृश्यताम् विहर्तुमत्र समागताः नराः नार्य्यश्च नावोऽधिरूह्य अमन्दं सुखमधिगच्छन्ति । अहो ! धन्या इमे स्त्रीपुरुषाः ये स्वर्गीयसुखमनुभवन्ति । यथा-यथा नौरग्रे चलति तथा-तथा जलस्यागाधतायाम् लघवो महान्तश्च मत्स्याः, लघुमृदुतृणांकुराश्च दृष्टिपथमियन्ति तानि प्रसमीक्ष्य भृशं मनो मोदते ।

अथ सरोवरस्य तटाभ्यर्णस्थितानि जलयाननिभानि स्थानानि समवलोक्य शशिप्रभा स्वपतिमपृच्छत्—"स्वामिन् ! जलयानाकृतीनि इमानि कानि सन्ति ?"
श्रेष्ठी—प्रिये ! इमानि पानीयस्थितनावामुपरि रचितानि मनोहराणि आवासगेहानि

सन्ति। काश्मीरसुषमादिदृक्षयाऽत्र समागताविपुलसम्पत्तिशालिनो नराः नार्य्यश्चैतेषु वसतिं कुर्वन्ति। उदकमध्यस्थितेषु गृहेष्वेषु निवसन्तो जना अमन्दमानन्दमुपलभ्य धन्य-धन्यमात्मानं मन्यन्ते। अत्र भ्रमतोरावयोः होराद्वयं व्यतीतम्। अधुना भगवतो दिनकृत आतपस्तीव्रतां धत्तेऽतस्तटमुपगम्य गृहं गत्वा तत्र विश्रम्य चाद्यरात्रौ पुनरपि अत्रागमिष्यावः। इति निश्चित्य नौचालकमादिश्य तटमभ्ययाताम् तौ दम्पती। स्वावसथमागम्य स्थानं देवार्चनं भोजनञ्च विधाय विश्रामकुर्वताम्।

अथ क्षपायाम् नववादनसमये पुनरपि तौ दम्पती डलाभिधसरोवरस्य सुषमां द्रष्टुकामौ तत्तटमुपागतौ। तत्र गत्वा श्रेष्ठी स्वजायामवोचत्—"प्रिये! पश्य, तटान्तिककुड्यारोपितापोदण्डेषु संलग्ना विद्युत्प्रदीपावलिरियं काश्मीरकाश्यपीकामिन्या उरसि विराजमाना हारावलिरिव विद्योतते। सरोवरस्य मध्ये स्थितं नेहरूपवनमपि रक्तपीतहरित्विद्युद्दीपैः भासमानम् समाकर्षतीव चेतांसि दर्शकाणाम्। स्वल्पदूरे स्थिताश्चत्वारः सप्तपर्णपादपा अपि विविधरागरञ्जितविद्युत्प्रदीपरोचिषा भासमानाः मानसानि हर्षयन्ति। तटोपकण्ठनावामुपरि स्थितानि भवनानीमानि चपलारोचिषा विद्योतितानि सन्ति पाकशासनपुरीमपि अधरीकुर्वन्ति। अस्य सरोवरस्य तथाऽन्येषाञ्च शोभां समीक्ष्य-समीक्ष्य एते तरुणास्तरूण्यश्च भृशं मोदन्ते। समीपस्थमहीधरोपत्य-कायामधित्यकायाञ्चं निर्मितानि वसुमतां गेहानि हरिद्धरित् पादपान्तर्हितानि सौदामिनीभाभिः भासितानि विवुधसंकानीव भासन्ते। मन्ये, सुषुमयाऽनया वासवपूरे व वसुधायां समुत्तरिता। कृष्णपक्षस्यान्तिमदिवसलक्षणदा ह्यपि पूर्णचन्द्रनिशा इव प्रतीयते। अहो! एषाञ्चच्चला प्रदीपानां भाभिरिमे गगनस्थिताः ग्रहाः कुमुद-बान्धवश्च हतत्विष इव प्रतीयन्ते। अत्रत्यां सुषमां निरीक्षमाणयोरावयोर्भूयान् समयो व्यतीतः। श्रेष्ठी स्वघटिकामवलोक्य निगदति—सम्प्रति निशाया एकादश वादनवेला सञ्जाताऽतः स्वनिवासभूमिं याव, इत्युक्त्वा स्वप्रेयस्या सह गृहाभिमुखं प्रातिष्ठत।

पथि गच्छतोस्तयोः शशिप्रभा वक्ति—स्वामिन्! अधुना या शोभामहमद्राक्षम् तथाविधान्तु न कुत्राऽपि पूर्वं दृष्टवती। चञ्चलाप्रदीपदीप्त्याः प्रपतनेन सरोवरस्य वारि रजतद्रवमिव शोभते। अत्र क्षणदा ह्यपि दिवसतुल्याः प्रतीयन्ते। राजमार्गा अपि दूरं प्रसृता असितभुजङ्ग्या इव प्रतीयन्ते। अत्र तमसोऽभाव एव। कौशिकानान्तु दुर्दशैवात्र भवति। तेतु तमःप्रियाः। अत्राहनि दिवाकरतेजसा क्षपायाञ्च सौदामिनीभासा तेषां वहिर्निगर्मनमेव न भवितुं शक्यते। इत्यं भाषमाणयोस्तयोः निजनिकेतनद्वारम् दृष्टिपथमागतम्। तौ च करौ, चरणौ, आननञ्च प्रक्षाल्य पानीयञ्च निपीय स्व-स्वशयनागारस्थितमञ्चमारुह्य अशायिष्टाम्।

अथोषसि विनिद्रया विहितशोचादिक्रियया शशिप्रभया स्वप्रियतमो न्यगादि—"आर्यपुत्र ! अद्यतनी कार्यक्रमः कः ।

श्रेष्ठी—अस्मादधिष्ठानादनतिदूरं स्थितमेकमतिरमणीयं निर्झरं द्रष्टुं यास्यावः, स च निर्झरः "चश्माशाही" इति संज्ञया व्यवह्रियतेऽत्रत्यैर्जनैः। भवती शीघ्रमेव सज्जाभवतु। स्वामिवचसोऽनन्तरं सा प्रत्यवोचत्—"आर्यपुत्र ! अहमावश्यककृत्येभ्यो निवृत्ताऽस्मि।

श्रेष्ठी—तर्हि यातव्यम् तत्र।

अथ तौ दम्पती तत्र मरूत्तरयानेन गतवन्तौ। निर्झरोऽयं रमणीयतमः, अस्य संमुखे शाद्वलच्छन्नायामवनौ केदारीषु रक्तपीतश्वेतादि बहुविधानि कुसुमानि तरुण्याः हरित् शाटिकायाम् संसक्तानि बहुमूल्यरत्नानीवातितमां राजन्ते। सुगन्धिरनिलः सलिलविक्षेपियन्त्राणि संस्पृश्य शिशिरो भवन् द्रष्टृणां चेतांसि समुल्लासयति। गिरेरूपत्यकायाम् निर्मित एष निर्झरः अद्वितीय एव। अस्य मधुरम्, लघु, रोचकञ्च सलिलं सुप्रसिद्धमेव। पूर्वोक्तगुणसमुदयैः सहेदं वारि अशितं पाचयति, न चोदरे आध्मानं जनयति, शिशिरमधुरतया तृषां शमयति, आगन्तवोऽत्रत्याः बहवोजनाश्चास्य वारिप्रवाहस्योदकं पानार्थमुपयुञ्जन्ति। अहो ! कीदृशमिदश्चारूस्थानम्। पृष्ठे भूधरश्रेणिः, अग्रे धान्यक्षेत्राणि, परितोऽनेकविधाः पादपाः। श्रेष्ठी, तज्जाया चास्य शोभां समीक्ष्य चेतसो महतीम् मुदमन्वभवताम्। ततश्च मार्गे विविधकथास्वादमास्वादयन्तौ तौ दम्पती स्ववसतीं प्रत्यागच्छताम्।

अथ क्षणदायाम् शशिप्रभा शयनात्प्राक् स्वभर्तारम् व्याहरत्—"प्राणनाथ ! श्वस्तनः कार्यक्रमोऽधुनैव निश्चेतव्यो येनाऽहं प्रातः शीघ्रमेव सज्जा भवेयम्।

श्रेष्ठी–श्रीनगरनिकटानि निखिलान्यपि दर्शनीयानि स्थानानि अवलोकितानि। अधुना नगराद् दूराणि इतराणि कानिचित् स्थानानि सन्ति—यथा गुलमर्ग, सोनमर्गः, पहलग्रामः, भगवतोऽमरनाथस्य स्थानम्, क्षीरभवानी, ऊलराह्वयं महत्सरोवरम्, अहर्वलनिर्झरादयः। एतेषु मध्ये पूर्वं कुत्र गन्तव्यम्, उच्चताम्, यत्र गन्तुं भवती वाञ्छति, तत्रैव पूर्वं यास्यावः।

शशिप्रभा—यद्भवते रोचते तदेव मह्यमपि।

श्रेष्ठी—भवतु नाम श्वो गुलमर्गं यास्यावः । अधुना स्वपिहि, यदि विलम्बेन शयिष्यतै तर्हि प्रातः सत्वरन्निद्रात्यागो नैव भविष्यति । भर्तुराज्ञामुपलभ्य शशिप्रभा स्व-शयनीयमेत्य अशायिष्ट ।

सम्प्रति भगवतोऽहस्करस्य नास्तसमयः परन्तूच्चतमावनिधरशिरैरव रूद्धास्तिग्मभानुरपि मन्दभानुः संजातः । शनैः-शनैः शीतं समेधते, अहो ! अवलोकयतु स्वामिन् ! नभोमण्डलम्, वारिधरैराच्छन्नमिव सञ्जातम् । शनैः-शनैः वाष्पनिचय-रूपेण हिमं पतति । हिमपातेनाऽहं हिमकम्पितशरीराऽस्मि, अधुना अत्रत्यं शीतन्न सहे, अतस्त्वरितम् कश्चिदाश्रयः समाश्रयणीयः ।

श्रेष्ठी—सम्मुखे पश्यतीदं हर्म्यम्, तदावयोः कृते भाटकेन स्थिरीकृतम्, ततस्तत्र गन्तव्यम् । श्रेष्ठिगिरं निशम्य शशिप्रभा हर्म्याभिमुखी प्राचलत् । इत्थं तत्रत्यां सुषमा-मवलोकयतोस्तयोर्दिनकृत् अस्तगिरिं विश्रमितुमिवागात् ।

रात्रौ तत्रैव हर्म्ये प्रसुप्तौ । प्रातः प्रबुद्धौ तौ शौचादिभ्यो निवृत्तौ किञ्चिद्दूर-स्थितोश्चमहीधरशिखरो परिपतितां हिमानीमवलोकयितुकामौ तत्र यातुमेच्छताम् । तत्स्थानमुच्चैस्तमाद्रिशिखिरवर्ती, तत्र मरुत्तरयानं यातुमसमर्थम्, केचन यात्रिणः पदातयोऽपरे पद्भ्यां गन्तुमसमर्थाः अश्वैस्तत्र यान्ति । शशिप्रभा कदाचिदपि अश्वन्नारोहत् अतः सा भीतभीता एकं सरलमश्वमारोहत् । श्रेष्ठी अपि द्वितीयमश्वमारूह्य हिमानी-शोभां दृष्टुकामौ यातुमारब्धौ । होरानन्तरन्तौ हिमानीसमीपं प्राप्तौ । प्रचुरां राजतराशिमिव विस्कन्नां हिमानीं निरीक्ष्य तौ महतीम् मुदम् प्राप्नुताम् ।

शशिप्रभा—स्वामिन् ! सुदूरं प्रसृतन्तुषारनिचयमवलोक्य को न तुष्येत्, भानुजालनिपतनेन भृशं भासते । एहि, किञ्चिद्दूरमस्योपरि यावः ।

श्रेष्ठी—प्रिये ! भवत्या नास्योपरि यातव्यम्, यतोहि चिक्कणेयं हिमानी-स्थली, अत्र चलनेन चरणौ हिमौ भवतः, पतनभीतिरप्यस्ति ।

शशिप्रभा—यष्टिकामवलम्ब्य किञ्चिदेव चलामि । अधुनेदमधिस्थानमवलोक्य महतीमुदमनुभूयते मया स्वल्पं समयन्तत्र परिभ्रम्य भर्तारमाह—"प्राणनाथ ! यथा-यथा भगवानहस्कर उपरि परिवर्धते तथा-तथा तद्रश्मिजालनिपातेन हिमोऽयंद्रवते द्रवीभूतोपरि नेतस्ततश्चलितुं शक्यते, अतः स्वनिवासगेहं प्रतिगच्छावः ।

श्रेष्ठी—यथा रोचते भवत्यै ।

अथ तौ दम्पती स्वकीयं-स्वकीयमश्वमारूह्य निजवसतिं प्रत्यगमताम् । गुलमर्गीयं हर्म्यमाप्य तत्र क्षणं विश्रम्याशनक्रियाश्च सम्पाद्य स्वल्पां वेलां पुनरपि विश्रम्य स्वनिकेतनं यातुं मरुत्तरयानमारोहताम् । ततः प्रचलिते मरुत्तरयाने तौ स्वीयममन्दमानन्दं वर्णयन्तौ स्वनिकेतननिकटतामाप्नुताम् ।

अथान्येद्युस्तौ क्षीरभवान्याः दर्शनं कर्तुम् स्वस्थानात् प्रातिष्ठताम् मरुत्तरयान-मारुह्य, मार्गे हरितहरितानि केदाराणि, अक्षोटसरलपादपांश्च, शालिधान्यक्षेत्रेषु कुल्याभ्यो वारि प्लावयन्ती स्वप्रदेशवाचा सुमधुरगीतनिनादेन पथिकचेतांसि ह्लदयन्त्यो योषितः, अपरत्र पुरुषांश्चालोचयन्तौ भगवत्याः मन्दिरसमीपमुपागतौ ।

भगवत्याः स्थानं प्रसमीक्ष्य शशिप्रभा स्वामिनमाह—"आर्यपुत्र ! कीदृशो मनोरमोऽयं प्रदेशः । इमे महान्तः सप्तपर्णपादपाः स्वच्छयया दर्शनार्थं समागतानां शिशुकलत्रमानवानां क्लमम् हरन्ती, शिशिरानिलं प्रेरयन्ती, अग्रे लघ्वी निम्नगा प्रवहति, इमां क्षीरगङ्गामिति प्रतिपादयन्ति जनाः । भगवत्याः मूर्तिः परमदर्शनीया, भक्तानां तोषिणी चास्ति ।

शशिप्रभा श्रेष्ठी च भगवतीं षोडशोपचारैः सम्पूज्य प्रार्थनामकुरुताम्—

मृगेन्द्रपृष्ठसंस्थिताम् मनोज्ञवेशभूषिताम्
विरञ्चिविष्णुशंकरस्तुतां त्रिशूलधारिणीम्
हिमाचले कृताश्रयाम् मदान्धशुम्भमर्दिनीम्
निशुम्भदर्पदारिणीं नमामि कालिकामहम् ॥१॥

दिवाकरेन्दुलोचनाम् प्रभाप्रभासिताखिलाम्
शिवस्य दूतकारिणीं शिवां नमाम्यहं हृदि ।
यदा-यदा-भुवि स्वकाः सुकृच्छ्रतांगता ध्रुवम्
तदा-तदाऽवतीर्य या करोति भद्रमात्मनाम् ॥२॥

निराश्रयाऽपि साश्रया ह्यलक्षिताऽपि लक्षिता
अलिङ्गिनी च लिङ्गिनी मया प्रणम्यते शिवा ।
यथा धृतं वपुः भयङ्करम् वधाय रक्षसाम्
करोतु सर्वदा शिवं क्षितौ नृणां दयावती ॥३॥

भवाब्धिभग्नतारिणी निवारिणी दुरापदाम्
सताञ्च रक्षिणी सदा भवानि ! भूतधारिणी ।
अदभ्रशक्तिधारिणी प्रहारिणी सुरद्विषाम्
विहारिणी यथेच्छमाशुतोषिणी शिवाय मे ॥४॥

इत्यं तौ दम्पती भगवतीं सम्प्रार्थ्य महतीं मुदमन्वभूताम् । शशिप्रभा भूयोऽपि भगवत्याः सम्मुखे स्थिता प्रार्थयते—भगवति ! भवत्या अनुकम्पया आवाम् अत्रायावः, भवतीम् प्रार्थयावो यदावयोः मनः कामनां पिपूर्हि, तव शरणं प्रपन्नाः स्व, त्वद्दते नापरं रक्षकं मन्यावहे, इत्यं भूयोभूयः प्रार्थयन्ती शशिप्रभा क्षणं विश्रम्य स्वभर्त्रा सह भोजनमकरोत् । भोजनान्तरे इतस्ततः परिभ्रम्य स्वाधिष्ठानाभिमुखमगच्छताम् ।

अथ प्रत्यायान्तौ तौ मार्गे एकं मनोरमम् सरोवरम् समैक्षाताम्, अस्मिन् सरोवरे वह्व्यो नावः आसन्, केचन यात्रिणो नावमारूह्य जलविहारमन्वतिष्ठन्, अपरे सरोवरस्य सुषमां विलोक्य काश्मीरप्रदेशस्य चारुतामवर्णन् । इत्थं परिभ्रमतोस्तयोः समग्रदिवसे नभसि भ्रमणेन परिश्रान्तो द्युमणिरपि अस्ताचलाश्रयं कर्तुमैच्छत् ।

शशिप्रभा—स्वामिन् ! तरणिरयमस्तमेतुं कांक्षते, गगनमण्डलमुडुगणाश्चकासयितुं शनैःशनैरुद्यन्ति । आवामपि स्वनिलयं प्रतियायावः । श्रेष्ठी स्वजायाया भारतीमुपश्रुत्य मरुत्तरचालकमादिशत्—चालक ! मरुत्तरं सज्जीकुरु । अधुना सूर्यास्तसमयो जातोऽत आवाम् स्वगेहम् यावः ।

इत्थन्तौ विविधां शोभां विलोकयन्तौ स्वनिलयं प्रत्यैताम् । अद्य विभावर्य्याम् शशिप्रभा नितान्तं परिश्रान्ता स्वल्पज्वरेणाक्रान्ता सञ्जाता । श्रेष्ठी च तापाक्रान्ताञ्जायां विचार्य चेतसि महान्तं विषादमकरोत् । अथ म्लानाननम् स्वपतिमवलोक्य शशिप्रभा व्याहरत्—आर्यपुत्र ! भवता न भेतव्यम्, ज्वरोऽयम् भ्रमणपरिश्रमेण सञ्जातः, प्रातः विगतज्वराऽहं भवितास्मि । जायायाः वाक्यं निशम्य श्रेष्ठी न्यगदत्—अहमधुनैव कञ्चिद् चिकित्सकमाह्वयामि, स च ज्वरस्योपचारं विधास्यति, ततश्चज्वरो नंक्ष्यति ।

शशिप्रभा—स्वामिन् ! नास्त्यावश्यकता कस्यचिदपि चिकित्सकस्य । यतोऽत्रा वामपरिचितौ, न च कञ्चिच्चिकित्सकञ्जानीवः । अपरिचितश्च चिकित्सको न

मम प्रकृतिं सहसा वेत्स्यति, किञ्च, ममावस्थान्तरं विद्यतेऽधुना, अस्यामवस्थायाम् नास्ति भेषजग्रहणस्यावश्यकता, अतो जहिहि निश्चयमेनम् इति निगद्य अशायिष्ट। श्रेष्ठी अपि स्वशयनीयमासाद्य अस्वपत्।

अथ प्रातः विगतनिद्रः श्रेष्ठी जायायाः समीपमेत्याऽब्रवीत्—प्रिये ! कीदृशम् भवत्याः स्वस्थ्यम ? अपि साम्प्रतम् विगतनिद्रा भवती ? रात्रौ निद्राः सम्यग् गृहीता किम् ?

शशिप्रभा—स्वामिन् ! विगतज्वराऽहमधुना, निशायाम् निद्रा अपि समीचीना प्राप्ता। भवता न काऽपि चिन्ता विधेया, अहम् सर्वथा स्वस्थाऽस्मि। अहङ्कामये यदद्यात्रैव विश्रामो विधेयः, कुत्रचिदपि न गन्तव्यम्।

श्रेष्ठी—अहमपि कामये यदद्य विश्रामोविधेयः। भगवती क्षीरभवानी आवयोरनुकूला, परप्रदेशे रुग्णता नोचिता, भगवत्या अनुकम्पया सत्त्वरमेव विगतज्वरा सञ्जाता भवती, साप्रतमहं भृशं मुदितोऽस्मि। श्वः परश्वाह्नि वा यत्र गन्तुं भवती कामयिष्यते तत्रैव गमिष्यावः।

अथ परमुदितस्वान्तौ तौ एकस्मिन् दिवसे सोनमार्गं द्रष्टुकामौ मरूत्तरयानेन तत्र गतौ। सोनमार्गस्य मार्गोऽतिविषमः, मध्येमार्गमत्युच्चभूधराः, क्वचन-क्वचन क्षुद्राः सरितः कठोराण्यपि प्रस्तराणि पानीयजवेन गोलाकृतीनि रूचिराणि च विदधत्यः प्रवहन्ति। क्वचिच्च पथि हिमानी भासते, क्वच विरल-विरलाः सरलाक्षोऽतरवो विलसन्ति। गन्तव्याधिष्ठानस्य सुदूरतया तौ चतुःपञ्चहोरानन्तरं सम्प्राप्नुताम्।

सोनमार्गादनतिदूरं हिमानीगिरिर्विद्यते, तं द्रष्टुकामा काश्मीरपर्यटनार्थं मागताः सकला अपि जनाः समायान्ति। अत्र किञ्चिद्रमणीयम् दर्शनीयञ्च स्थानन्नास्ति। हिमानीमहीधरस्य पन्था अतिविषमो वर्तते, तत्र पदातिरश्वैर्वायातुं शक्यते। यदाऽत्र यात्रिणो मरुत्तरयानेभ्य अवतरन्ति तदां नैके अश्वपाला यात्रिणामुपकण्ठमुपगम्य निगदन्ति—"महोदय, ममाश्वो यात्रायां सुखकरः, इत्थमेवान्यो वदति, इत्थं परस्परम् विवदन्ते, यात्रिणश्च स्वानुकूलतया अश्वं संगृह्य तेन हिमानीपर्वतं गच्छन्ति।"

शशिप्रभा–प्रागपि अश्वं समारोहदतोऽश्वारोहणस्याभ्यस्ता जाता। अद्यापि तौ अश्वामारूह्य हिमानीगिरिं प्रातिष्ठताम्। यदा तदभ्यर्णमुपगतौ तदा दूरादेव रुचिरचन्द्रभूधरमिव हिमानीं प्रसमीक्ष्य परितुष्टा शशिप्रभा प्रोक्तुमारब्धा—

"स्वामिन् ! स्थानमिदं गुलमर्गादपि रमणीयम्, भगवत्याः प्रकृत्याः देव्याः लीला-वैचित्र्यं समीक्षताम् भवान्, क्वचन भूधराकृतिः वालुकानिचयः, क्वचिञ्च रजतपर्वत-निभा हिमानी, क्वचिञ्च विषमोच्चभूधराः, क्वचाभितः प्रसृताः वितताः जलनिधयः। अस्तु, अयं हिमनिचयो धवलतायाम् सुधामपि अधरीकरोति, सूर्यप्रभया भासमानो-ऽतितरां मनो मोदयते, दिवकरातपेन सन्तप्तः सलिलो भूत्वा शनैः-शनै वहति। अहो ! अत्रत्यं वारि अतिशीतं वर्तते, करेण स्प्रष्टुमपि न शक्नोमि, पाणौ गृहीतं हिमशकलम् त्वरितञ्चूर्णीभवति। अत्र हिमेऽहम् शीघ्रम गन्तुन्नोत्सहे, चेद्गमने त्वरमाणा भवेयन्तदा पतनभीतिर्जायते अतः शनैः-शनैरस्योपरि भ्रमामि।

श्रेष्ठी—प्रिये ! यद्भवती प्रतिपादयति तदवितथम्, अस्मिन्नुपरि यष्टिसहायेनैव गन्तु शक्यते, अन्यथा पतनभीतिरस्त्येव इत्थं जल्पतोस्तयोरश्वैरन्येऽपि यात्रिणस्तत्र समायान्ति। अथ तेऽपि तां हिमानीं समवलोक्य स्वस्वान्तसरोजेषु महतीं मुदं प्राप्नुवन्। तेषु कश्चित् हिमगिरेश्चित्रं गृह्णाति, कश्चिन्निजप्रियाकरं संगृह्य तत्रोपरि भ्रमति। कश्चित् हिमशकलं गृहीत्वा स्वकीयान् प्रति निक्षिपति। इत्थन्तौ तत्रत्यं शोभातिशयं प्रेक्ष्य परममतुष्यताम्। यथा-यथा भानुमपूखाः तिग्माः भवन्ति तथा-तथा हिमनिचयो द्रवितुमारब्धः। सद्रवहिमे गमनमपि कठिनं भवति, बृद्धेन सूर्यातपेन किञ्चिन्म्लाना शशिप्रभा स्वामिनमवोचत्—"स्वामिन् ! यथा-यथा घर्मः समेधते तथा-तथा मम चेतो म्लानतामनुभवति अतोऽधुना अस्मान् स्थानात् गन्तव्यम्।

अथ तौ दम्पती हिमानीगिरेः सोनमर्गम्, तस्माच्च स्ववपतिमुपेत्य तत्र दिनैकं विश्राम्यान्येद्युः अहरवलनिर्झरसुषमां समीक्षितुं प्रायाताम्। पथि प्रयन्तौ तौ लघवृहत्यः सरितः, कुल्याः, नदानि, भूधरमालाञ्च समालोकयन्तौ निर्झरसमीपस्थ-भूखण्डमाप्नुताम्।

जलप्रवाहोऽयं सुरमणीयः। शशिप्रभा विलोक्यैनञ्चेतसि परं परितुष्टा भर्तारमजल्पत्—"स्वामिन् ! गिरिं विदार्य प्रवहन्नयं सलिलप्रवाहः समुच्चस्थाना-ज्जवेन प्रपतति, वेगेनाधो निपतत् जलं सुभगमौक्तिकव्रजमिव समुच्छलति। अस्य वेगं तरुणो वली गजेन्द्रोऽपि सोढुमसमर्थः, अपरेषां प्राणिनान्तु कथैव का। अविरतं प्रयतन् महान्निनादं विदधाति। अहो ! दूरादेव समवीक्षणेनाऽयं रमणीयतमः प्रतीयते। अहमवलाऽस्मि, नोचेदहमपि निकटमस्य यायाम्। पश्यतामस्य सलिलं समधुरं स्वच्छं तृषाशामकञ्चास्ति। अस्य समीपस्थं भूखण्डमपि चारु वर्तते। पर्वतमालासु प्रपतन्नयं

निर्झरः विधातुः कलाया अनुपममुदाहरणम् । भाग्यवन्तो मानवा एव द्रष्टुं प्रभवन्त्येनम्, नान्यः कश्चित् । काश्मीरप्रदेशे भूधरेषु वहवो वारिप्रवाहाः सन्ति किन्त्वस्माद्धीना एव ।

श्रेष्ठी—प्रियतमे ! यद्भवती जल्पति तदवितथम् । एतादृशो निर्झरो नास्त्यत्र प्रदेशो मन्ये, साक्षादत्र चिक्रीडितुं भगवत्या प्रकृत्या स्थानमिदं निर्मितम् । विषमे-निदाधेऽपि नात्र सन्तापश्चेतो दुनोति, अत्रत्यानि विविधानि रुचिराणि अधिष्ठानानि समीक्ष्य समीक्ष्य नाकसुखमिवानुभवामि ।

शशिप्रभा—अहो ! सत्वरं समयो व्यतीतः, सम्प्रति एकादशवादनसमयो जातः । अहं क्षुधापीडिताऽस्मि अतः कुत्रचित् महात्पादपच्छायायाम् शाद्वलाच्छन्नावनौ समुपविश्य भुञ्ज्वहे ।

श्रेष्ठी—यद्रोचते श्रीमत्यै तदेव करणीयम् । इत्युक्त्वा तौ भोक्तुमारब्धौ । भोजनानन्तरं कश्चित् कालं विश्रम्य ततः स्वस्थानमागच्छताम् ।

अथैकस्मिन् दिवसे तौ दम्पती ऊलराह्वयं महत्सरोवरमवलोकयितुं मरुत्तर-यानेनाचलताम् । इदं महत्सरोवरं भूधरावलिमध्ये सुदूरं विस्तृतं वर्तते । एशिया-महाद्वीपे नास्त्येतादृशं विततं महत्सरः । यथा विस्तृतन्तथैवातिगभीरमपि । अस्मिन् सरोवरे वह्व्यः नावः सन्ति, आभिः केचनजनाः जलविहारमपि विदधति । अस्मान्नैकाः लघुवृहत्कुल्याः निसरन्ति, ताश्च केदारेषु शालिधान्यानि पोषयन्ति । अस्य सरोवरस्य तीरोपान्ते अतिविस्तृतं दीर्घञ्च सुमनोहरं सेवाक्षोटनिकोठादीनां पादपाः अस्य शोभां वर्धयन्ति । एषान्तरूणाम् च्छायास्वपविष्टाः शिशवः, कलत्राणि, पुरुषाश्च वारिस्पर्शहिममरुता स्वर्गीयसुखमनुभवन्ति । अनतिदूरे राजकीयाधिकारिणां कृते वहूनि लघूनि गेहानि विद्यन्ते ।

शशिप्रभा—पतिदेव, इदं महत्सरोवरम रमणीयतममस्ति । आवयोरधिष्ठा-नादिदं दूरतमं वर्तते । पथि वहुः समयो व्यतीतः । अत्रापि सरोवरस्य शोभानि-रीक्षणेन भूयान् समयो व्यतीतः इत्युक्त्वा स्वप्रकोष्ठस्थितां घटिकामालोकते— “अहो ! एकादशबादनसमयो जातः ।” क्षुत्तृषे मां क्लेशयतः, किं भवानपि क्षुत्तृ-ड्भ्यां क्लिश्नाति । वाञ्छाम्यहं, यदस्मिन् सेवपादपच्छायायामुपविश्य क्षणं विश्रम्य च किञ्चिदद्वः ।

श्रेष्ठी—ममाऽपि वाञ्छा वर्तते भोजनस्य ।

अथ तौ द्वावपि एकस्य तरोरधः समुपविश्य भोक्तुं प्रावर्तताम्। भोजनानन्तरे तौ कञ्चित्कालं यावदेकस्य तरोश्छायायामुपविश्य व्यरंसिष्टाम्। अनन्तरञ्च तौ स्वस्थायिनिवासमभिमुपगतौ।

द्वितीयदिवसे तौ पहलग्रामम्, भगवतोऽमरनाथस्यायतनञ्चावलोकयितुं ततः प्रचलितौ। मार्गे बहुविधां शोभां विलोकयन्तौ तौ पहलग्राममासादितवन्तौ। तत्रैकं यात्रिविश्रामगेहं भाटकेन स्थिरीकृत्य तत्रावसताम्।

शशिप्रभा—लघुरपि ग्रामोऽयं मनोहरः। अत्रैका लघ्वी विपणिः वर्तते। प्रत्येकापणेषु अत्रत्य शिल्पिविरचितानि बहूनि वस्तूनि विक्रीणनार्थं सज्जीकृतानि विराजन्ते। अस्यां विपणौ अत्रत्यं कलाकौशलम् प्रेक्षितुं शक्यते। अभितः पर्वतमालाः, भूधरेषु चात्युच्चसरलपादपाः स्वहरितिम्ना समागन्तॄनां मनांसि समाकर्षयन्तीव।

अस्य लघुग्रामस्याग्रे सरिदेका प्रवहति, अविरतं प्रवहन्तीयं स्वमधुरनिनादेन यात्रिणां स्वागतमिव समाचरति।

इमे अश्वपालकाः स्वकीयं-स्वकीयमश्वमानीय यात्रिणो निगदन्ति—महोदय, ममायमश्वः सालोनोद्भ्रान्तश्च वर्ततेऽतः एनमारूह्य महीधरसुषमां विलोकयितुं यान्तु श्रीमन्तः। इत्थं ममाऽयमश्वः, ममायमश्व श्रेष्ठ इतिनिगदन्तोऽश्यपालका यात्रिणः परितः समुत्तिष्ठन्ते।

अस्मात् स्थानात् भगवतोऽमरनाथस्याधिष्ठानमष्टौ नव वा गव्यूतिपरिमितं दूरं वर्तते। अग्रे पन्थाश्चातिविषमः, किञ्चिद् दूरं यावत्पर्वतीयभूभौ यातव्यम् अग्रे च हिमनिचयो विद्यते। तत्राश्वैर्गम्यते, शिबिकाभिर्वा, सुदूरं यावत्तुषारसमुदये गच्छन्नरः हिमकन्दरायां विद्यमानं भगवतोऽमरनाथस्यलिङ्गाकृतिं तुषारमूर्तिं पश्यति। प्रति क्षणमस्योपरि जलबिन्दुर्निपतति भक्तजनाः एनां षोडशोपचारैः समर्च्य प्रमोदन्ते। न चात्र तरवो लताः विद्यन्ते, यतोऽस्य स्थानस्य हिमानीत्वेन नात्र प्ररोहन्ति तरुलताविरुधः। भगवतः शङ्करस्य हिममूर्तिः दर्शनीयाऽस्ति, भक्तजना एनां सम्पूज्य धन्यधन्यमा—त्मानं मन्यन्ते।

तौ दम्पती पहलग्रामं प्रतिनिवृत्य तत्र द्वित्रिदिनमुषित्वा पुनः मरुत्तरयान स्वनिवासं प्रत्यायाताम्। इत्थं काश्मीरप्रदेशे भ्रमतोस्तयोः सकलोऽपि निदाघसमयो व्यत्यगात्।

शशिप्रभा—स्वामिन् ! अत्र क्षेत्रे भ्रमणं कुर्वतोरावयोः मासद्वयम् व्यतीतम् । साम्प्रतं तपनवेला गन्तुमीहते । विगते तपने प्रावृष्यारम्भे चावयोर्जन्मभूरपि शीतला-भवति । अतोऽधुना निजजन्मभूवसतिं गन्तुं वाञ्छाम्यहम् । अत्र परिभ्रमणे न मम वपुः स्वास्थ्यमनुभवति, न च काचिदपि पीडा, नहि चेतसि ग्लानिः, आननकमलमपि अम्लानं वर्तते । किन्त्ववस्थान्तरत्वेन स्वल्पं दौर्बल्यमनुभवामि । अस्मात् स्थानात् सुदूरं यावन्मरुत्तरयानेन यातव्यमावाभ्याम्, मरुत्तरयानयात्रया च विपुलं कष्टं भवति । यदि श्रीमते रोचेत तदा वायुयानेन यात्रा विधेया ।

श्रेष्ठी—यद् भवत्यै रोचते तदेवाऽहं कर्तुमनाः । नाऽहं कांक्षे भवतीं कृच्छ्रा र्चितां द्रष्टुम् । भवती सत्यं वदति, नाधुना भवत्या साधारणी अवस्था, अपि तु अन्तर्वल्यवस्था वर्तते, सा चाऽपि चतुःपञ्चमासात्मिका, जानेऽहमस्यामवस्थायाम् यानि कष्टानि योषितोऽनुभवन्ति अतो निवर्तनसमये विमानेनैव यात्रां करिष्याव इति-निश्चित्य श्रेष्ठिना तथा व्यवस्था विहिता ।

शशिप्रभायाः काश्मीरजातानि यानि वस्तुजातानि क्रेतुं वाञ्छा वर्तते तानि श्रेष्ठिना क्रीतानि ।

अथ शुभे मुहूर्ते तौ मरुत्तरयानेन विमानप्रस्थानकं प्राप्नुताम् । विमाने तौ दम्पती अन्ये यात्रिणश्च प्रविश्य सुखेनोपविष्टाः । सुखोपविष्टेषु तेषु विमानं गन्तु मारब्धम् । पूर्वं कियद्दूरं भूमौ प्राधावत्पुनः क्षणेनैवोडडीयत । विष्णुपदे उच्चैर्गत्वा विमानं समं यातुमारब्धम् ।

शशिप्रभा—विमानयात्रया किञ्चद् विभेमि ।

श्रेष्ठी—प्रिये ! न भेतव्यम्, अनन्ताकाशे स्वीयनिर्दिष्टपथा गच्छदिदं सार्ध-कहोरानन्तरमिन्द्रप्रस्थीयपालमाभिधविमानविश्रामस्थानमधिगमिष्यति । स्वल्पयैव-वेलया स्वयातव्यस्थानं यास्यावः । अपि तव वपुषि काचित् पीडा वर्तते ? किं शिरो-भ्रमति ? किस्वित् हृल्लासो वर्तते ?

शशिप्रभा—न मे तनुः क्लेशमनुभवति, नच शिरो भ्रमति नाऽपि हृल्लासः, प्रफुल्लितं मम स्वान्तसरोजम् । विमानेन वियति प्रयान्त्या मया भूधराः क्षुद्रकुण्ड्या-कारा दृश्यन्ते । पुरनगरीग्रामपल्यः अतिसूक्ष्मा दृश्यन्ते, महानद्योऽपि वारिणो लघ्वी रेखेवावलोक्यते । इत्थं मिथः सञ्जल्पतोस्तयोः इन्द्रप्रस्थीयपालमाह्वयं विमान-प्रस्थानकम् समागतम् । अथ विमानं शनैः-शनैः नीचैरवातरत् । किञ्चिद् दूरं

वसुन्धरापृष्ठे प्राधावत् । ततो विरतगतेः विमानात् शनैः-शनैः सर्वे यात्रिणोऽवातरन् । तौ दम्पती चापि शनैः-शनैः विमानादवतीर्य बहिरागच्छताम् ।

ततश्च मरूत्तरयानेन वाष्पयानप्रस्थानकमाप्य तेन स्वपुरमायातौ । स्वपुरनिवृत्तयोस्तयो काञ्चनपुरनिवासिनः सकला अपि जना अभिनन्दनमन्वतिष्ठन् ।

अथ काश्मीरक्षेत्रात् प्रतिनिवृत्तायाः शशिप्रभायाः समानवयसो योषितस्तदुपकण्ठमुपगम्य तत्रत्यं विवरणमप्राक्षुः ।

नार्य्यः—धन्यतमा खलु भवती या भारतवसुन्धराखण्डस्य स्वर्गं काश्मीरधरणिः स्वलोचनगोचरीकृता । अपि तत्रत्यं किञ्चद् वैशिष्ट्यं वर्णयतु ।

शशिप्रभा—भवतीनां समक्षे काश्मीरप्रदेशस्य सुषमां किं वर्णयामि । तत्र मृदुलानि औ‍र्णवसनानि, दारुमयानि विविधानि वस्तुजातानि, सनिर्झराः हरितहरिताः गिरयः, लघूनि महान्ति सरोवराणि, सरितश्च काश्मीरवसुधावनितायाः सुरुचिराणि आभूषणानि सन्ति ।

नार्य्यः—भवती भाग्यशालिनी, येन काश्मीरमुपेत्य तत्रत्यमानन्दमलमत ; भाग्येनैव नराः नार्य्यश्चाधिगच्छन्ति सुखम् दुःखम् वा सम्पदो विपदो वा । नान्यः कश्चिद्धेतुः ।

शशिप्रभा—भवतीनामुक्तिरियं समीचीना वर्तते । नयकोविदैरपि लिखितं यद् "भाग्यं फलति सर्वत्र न विद्या न च पौरुषम्" अस्यायमभिप्रायो यत् विद्यापौरूषाभ्यामपेक्षया भाग्यमधिकं फलदायकम् किन्तु भाग्यस्य नायमर्थो यत् पुरुषेण कदाचिदपि यत्नो न विधेयः । पूर्वस्मिन् शरीरे कृतं यत् कर्म तद्भाग्यं दैवमिति वा निगद्यते । तच्च कदा फलेदिति ज्ञानं पुरुषाणात्र भवति, अतः परिश्रमः उद्योगो वा न हेयः । दैवसहायेन उद्योगेनैव सफलताया अनिवार्यता ।

अत्रान्तरे श्रेष्ठी गृहं प्रतिनिवृत्तः सन् जायामवदत् प्रियतमे ! अपि भवत्यत्र निरामया ? कच्चिद् घर्मो न वाधते ? काश्मीरवदत्र साम्प्रतमपि शैत्यन्नास्ति ।

शशिप्रभा—स्वामिन् ! यद्यपि काश्मीरवत् शैत्यन्नास्ति तथापि साम्प्रतम् विषमो निदाघो व्यतीतः, मनोहरो वृष्टिसमयः नैदाघतापद्रवितां क्षोणीरमणीं रमणीयां कर्तुं समायाति । अहो ! असितक्षितिमृदाकृतीन् वारिदान् विष्णुपदे प्रसमीक्ष्य प्रहृष्यन्ति सकलप्राणिमानसकुमुदानि । स्वामिन् ! श्रूयताम्, नभसि

स्तनयित्नवस्तुमुलं गर्जन्ति, शिशिरो मरुद् वाति, बृहन्मौक्तिकधवलाः सलिलविन्दवो निपतन्ति। मकरध्वजसन्तप्तायाः कामिन्या वपुसि सेवतीविन्दव इव तरणिसन्तापितवसुधाया उपरि निपतिताः प्रथमजलवृष्टिविन्दवस्त्वरितं विशुष्यन्ति, वसुमतिश्चोष्णवाष्पं समुद्वमति। ततः प्रवृद्धायां वृष्टयां विपुलोदकवर्षणेन भुवस्तापः प्रशमिष्यति, क्रमेण नदसरोह्लदपल्वलानि सलिलेन परिपूर्णानि भवन्ति। अहो ! श्रवणप्रियो दर्दुरध्वनिरियं निशिदिवा च श्रूयते क्रीडनासक्तपरस्परसम्मिलिताशिशूनां कोलाहल इव। शनैः-शनैः दिवाकरतापदग्धायामवनौ हरितहरितानि तृणानि प्रादुर्भवन्ति। आसाम् वासवगोपानान्तु शोभा अद्वितीया एव। अधुना धरणिरियं विधृतहरिदंशुकसंसक्तशोणिमरत्नाधोवसना वधूरिव विराजते। रात्रौ च चिरप्रभाया भासोऽपि क्षणं तिमिराच्छन्नं निखिलमपि चकासयन्ति।

शुचिविशोषितनीरकृशा इमा निम्नगा अपि आतङ्केप्रशोषितमांसरुधिराः क्षीणा वामलोचना इव सम्प्रति प्रावृट्सलिलपरिपुष्टाः एत्य प्रियपतिं वारिधिमुपगूहितुमभिद्रवन्ति।

श्रेष्ठी–प्रिये ! समयोऽयं चारुतान्तु विभर्त्येव, नात्र संदेहः, न केवलं चारुतया एवास्य महत्वमपितु भगवता विश्वसृजा सृष्टोऽयं भूतानामुपकारार्थम्। प्रमुदिताः कृषिवलाः, प्रातरेव स्वानडुद्हलानादाय निज-निजकेदाराण्यभियान्ति। परितुष्टा, शिशवोऽपि कुत्रचित् क्रीडन्ति जलेन क्वचिच्च स्वल्पजलेषु पल्वलेषु प्लवन्ति, केचिच्च स्वतातैः सह वप्राणि प्रयान्ति वप्रेषु कृषिकर्म कुर्वतां कृषकाणां वितानकृत्यं समनुतिष्ठन्ति जलधरा इमे। अहो ! दिनमणिरयं सहस्रांशुरपि कालप्रभावान् बलाहकाच्छन्नो न लोचनगोचरी भवति। नास्त्यनेन समं कश्चित् परोपकारी, प्रागयं स्वतेजसा सलिलमाकर्षति, पुनश्चोदकस्य वाष्पं निर्माय तेन मेघान् विरचति, तैस्तिरस्कृतो भूत्वा भूयो वृष्टिं विदधाति लोककल्याणहेतोः। किं सूर्यादृते कश्चिदपिशङ्करः यो लोककल्याणार्थं तिरस्कारं प्राप्नुयात् नीरदेभ्यः।

शशिप्रभा—स्वामिन् ! अहम् नगरात् किञ्चिद् दूरं विद्यमानमस्मदीदमुप वनमुपयातुकामाऽस्मि भवता साकम्, यतो हि साम्प्रतं वारिदकालो वर्तते तस्य च शोभा दर्शनीया। अत्र हर्म्ये दिनन्न व्यत्येति, यदि भवतामाज्ञा स्यात्तर्हि एकस्मिन् दिवसे तत्र गन्तव्यम्।

श्रेष्ठी—आवाभ्यामुपवनेऽवश्यमेव गन्तव्यम्। कथय, कदा गन्तव्यम्।

शशिप्रभा—समयस्य निश्चियस्तुभवतैव विधेयः।

श्रेष्ठी—तर्हि श्व एव यातव्यम् । श्वः प्रातरेवावाम् तत्र गन्तास्वः । भवती शीघ्रमेव शोचादिभ्यो निवृत्ता भवेत्तथाऽनुष्ठेयम् ।

शशिप्रभा—अहम् भवदाज्ञां पालयिष्यामि ।

अथान्येद्युस्तौ दम्पती पूर्वनिश्चयानुसारमुपवनं यातुं स्वहर्म्यात् प्रायाताम् । प्रातः समयः । भगवान् पतङ्गः प्रखरवैश्वानरसन्तापितायोगोलकवद् शोणितीभूतविग्रहः स्वशोणिम्ना प्राचीदिग्वधूं गगनमण्डलञ्च रञ्जयन् बलाहकसपत्नेषु प्रकुपित इव समुदयते । यथा-यथोर्ध्वमायाति तथा-तथा तस्य शोणिमा शनैः-शनैरपयाति, यतोहि वर्षाकाले विष्णुपदे पयोदानां प्राबल्यं भवति, प्रबलसपत्नश्च विनाऽनुकूलकालन्नैव जेतुं शक्यते, अतः समयज्ञेन भानुनोर्ध्वमेत्य स्वकोपः परिमुञ्चते । शाखिशाखासु विहङ्गमा अव्यक्तमधुरारावं तन्वन्तः भगवतः स्तुतिमिव समाचरन्ति । गोपाः निपीत-दुग्धवत्साः धेनूः गोचरभूमिं नयन्ति. वेदविदो महीसुराश्च स्थातुं तड़ागादीनुपयान्ति । कृषकाश्चत्वर्य्यन्ते निज-निज वप्राणि समभियातुम् । क्वचन नवोढास्तरुण्यः शिरःसु कृशकटितटेषु च धृतताम्रकलशाः मृतकुम्भाश्च जलजिघृक्षया अपोनलान्यभिसरन्ति, काश्चन कूपस्योपकण्ठं प्रयान्ति । इत्थं पथि विविधां सुषमां विलोकयन्तौ तौ उपवनं प्राप्नुताम् ।

श्रेष्ठी—इयमुपवनावनिः सुरुचिरा । नैदाघतापदविताऽधुना कोमलशाद्वलै-रास्तृता हरितवर्णकौशेयांशुकाच्छन्ना इव प्रतीयते, वियतो निपतिता उदकविन्दव अस्या उपरि द्युमणिद्युतिभासिता धवलमौक्तिकाः इव प्रतिभासन्ते । चेतोह्लादि मयूराणां नर्तनं केका चास्याधिकां रुचम् समेधयन्ति । मन्ये, मृदुतृणास्तृतायामवनौ भुजङ्गभुजां नर्तनम् भेकारावः मृदंगध्वनिरिव मेघगर्जनञ्चैतानि मिलित्वा वृष्टिमहिष्याः स्वागतमिवोपहरन्ति ।

शशिप्रभा—प्रियतम,धन्येयं वृष्टिः, मया तपनतापतप्तायाः वसुधायाः अभिनवं रमणीयम् रुपम् सम्पादितम्, आयान्तु श्रीमन्तः, अत्र इतस्ततः परिभ्रमणं कुर्वः ।

श्रेष्ठी—प्रिये ! नीपकुटजसर्जपादपाः पल्लविताः कुसुमिताश्च सन्तः उपवनस्य सुषमां वर्धयन्ति । प्रातःकालिकोऽनिलश्चैषां सुगन्धिं गृहीत्वा आवयोः घ्राणेन्द्रियं प्रीणयति ।

शशिप्रभा—स्वामिन् ! वृष्टिजलेन उपवनमध्ये वर्तमानमिदं सरः पूर्णता-मगमत् । वारिणा पूरितेऽत्र सरसि क्षुद्राः महान्तश्च दर्दुराः शिशवः इव प्लवन्ति ।

वैचित्र्यमिदं खलु क्षितिमलङ्कृतायां वृष्टयांमिमे सहसा प्रादुर्भवन्ति । किमिमे नभस्तः वृष्ट्योदकेन सहैव निपतन्ति क्षोण्यामाहोस्वित् भूम्यास्तलतो निःसरन्ति ।

श्रेष्ठी—प्रिये ! विगते वारिदसमय इमे क्षोण्यास्तरे मृतवत् स्वपन्ति, समागते च मूर्छिताः सञ्जीवनीमिव वृष्टिजलं प्राप्य चेतनां लभन्ते ।

शशिप्रभा—अद्य उपवनस्य सुषमां समीक्ष्य-समीक्ष्य मदीयं स्वान्तं परां तृप्ति लभते । भवतामाज्ञाचेदत्र सरसि स्नायाम् ।

श्रेष्ठी—वर्षासु जलं मलिनं भवति, तास्मिन् स्नानेव वपुषि विस्फोटकण्ड्वादय उपद्रवाः समुद्भवन्ति अतोऽधुनाऽत्र सरसि स्नानं नोचितम् ।

शशिप्रभा—यदाज्ञापयति भर्ता, बहुसमयं यावदस्य सुषमा लोचनगोचरी कृता घटिकायां दशवादनवेला सञ्जाता अतो यातव्यमधुना स्वहर्म्यं प्रति ।

श्रेष्ठी—याहि तर्हि, सम्प्रति स्नानभोजनादेः वेला सञ्जाता । इति मनसि कृत्य तौ ततः प्रस्थितौ ।

शशिप्रभा—स्वामिन् ! इमाः कृषीवलगृहिण्यः स्वगेहकृत्यं परिसमाप्य क्षेत्राणि गच्छन्ति कृषिकर्मरतानां स्वभर्तॄणामशनपानादिकं गृहीत्वा । धन्या एताः कृषकयोषितो याः गृहकर्माणि सम्पाद्य क्षेत्राणि गत्वा स्वस्वामिनां साहाय्यमनुतिष्ठन्ति ।

श्रेष्ठी—एताः मानवानप्यतिशेरते, पूर्वन्त्वेताः भानूदयात्प्राक् जाग्रति, शौचादिनिवृत्ताः अन्नं पिंशन्ति, पुनश्च दुग्धदोहनादिकं सर्वमपि गृहकार्यजातंसम्पाद्य भोजनं पचन्ति, ततः क्षेत्राणि गत्वा तत्र पूर्वं स्वभर्तॄन् भोजयित्वा भुञ्जते भुक्त्वा च स्वपतिभिः सार्धमेव कृषिकर्मणि संलगन्ति । कृषकाः केवलं कृषिकर्म एव विदधति, एता वराकास्तु गृहकृत्यमपि ।

शशिप्रभा—नन्वेताः समर्थाः सन्ति सर्वविधकृत्यसम्पादने । कथन्नाम एताः अबलाः, सबलाः स्वल्वेताः पानाशनांशुकपरिधानरताः मादृश्य एव काञ्चन अबलाः न तवेतादृश्यः । मादृशानान्तु स्वल्पीयसी संख्या, यतोऽस्माकं देशः कृषिप्रधानः । योषित्सु अपरिमेमा शक्तिर्विद्यते, तया ताः मानवानधरीकुर्वन्ति ।

श्रेष्ठी—त्वया ह्यवितथं निगद्यते । स्त्रीषु प्रकृत्या शक्तेराधिक्यं विद्यते । बाल्यावस्थात एव बालिकानां स्वास्थ्ये न तथा ध्यानं दीयते यथा बालकानान्तथापि

बालकापेक्षया बलवत्यो भवन्ति। तासां पितरौ ध्यानं मा दत्ताम्, प्रकृतिस्तु तासां सुस्वार्थं चिन्तत्येव, यतो हि एतासाम् महद्दुत्तरदायित्वमस्ति सृष्टिसञ्चालने। यदा इमास्तरुण्यो भवन्ति तदा स्वभावत एवैतासां वपुषः शोभा दर्शनीयतमा भवति, यतोहि गर्भं गृहीत्वा तं प्रसवसमयं यावत् स्वशोणितेन पोषयन्ति ततश्च यावत् शिशुरन्नाशी न भवति तावत् स्वस्तन्येन परिपालयन्ति। इत्थं स्वजीवने बहूनां शिशूनां पोषणं पालनञ्च कुर्वन्त्येताः। यद्येता अबलाः स्युस्तदा कथन्नाम शिशुपालनपोषणात्मकं सुकठिनं कर्म सम्पदायितुं समर्थाः भवेयुः।

शशिप्रभा—सत्यमेतत्, योषितामुत्तरदायित्वयधिकमेव।

श्रेष्ठी—अस्तु एकादशवादनकालोऽधुना, अतः स्वहर्म्यमेत्य तत्र स्नानं कृत्वा भोजनं कुरु, भोजनान्ते च विश्रामं करोतु भवती, यतो यथा-यथा प्रसवसमय आयाति तथा-तथा गर्भवृद्धया शक्तिह्रासो भवति।

शशिप्रभा—यदाज्ञापयति भर्ता।

अथैकदा शशिप्रभा स्वप्रियतममवादीत्—आर्यपुत्र, हर्म्यं एव निवसन्त्या मम दिवसो न व्यत्येति अतोऽद्य प्रातः सायं वा स्वोपवनान्तिककेदाराणां सुषमां द्रष्टुं यातुकामाऽस्मि, तदाज्ञापयतु श्रीमान्।

श्रेष्ठी—यथा भवत्याः मनोमोदः स्यात्तथाऽहं विधास्यामि, यतो हि सम्प्रति तवावस्थान्तरं वर्तते। आयुर्वेद-शास्त्रे लिखितमस्ति, यदन्तर्वत्नी यद-यद वाञ्छेत् तत् सर्वं भर्ता सम्पादयेत्। ब्रूहि, कदा गन्तुं कामयसे, अद्य सायं गन्तव्यम्।

सायंकालस्य वेला, दिवाकरोऽयं सम्पूर्णे दिवसे व्योमवर्त्मनि परिभ्रमन्नपि नाशक्नोत् पयोमुचो जेतुम्। पक्षिणोऽपि दिवसपरिभ्रमणेन परिश्रान्ता इव स्वनीड्डुमानमभिसरन्ति। कृषीवलगृहिण्यश्च विधृतशिरोघासमात्राः, क्रीडन्त्यस्तार्भकाः, स्वगृहाभिमुखं प्रयान्ति। कृषकाश्चेमे मध्ये-मध्ये परिश्रान्ता अपि मिलिताः सन्तः तमाखुपानव्याजेन क्षणं विश्रामं कुर्वाणाः अधुनाऽपि कृषिकार्यरताः सन्ति।

शशिप्रभा—स्वामिन्! दिनकृदयम् साम्प्रतमस्तगमनवेलायामपि लौहित्यं बिभर्ति।

श्रेष्ठी—प्रिये! भानुरयमभ्राणि वशीकर्तुं प्रयतमानोऽपि नाधिगच्छति साफल्यम्, ततश्च स्वकोपोद्भूतानललौहित्यं प्रशमयितुमिव पयोधौ निमज्जति।

शशिप्रभा—स्वामिन् ! साम्प्रतमस्तमनवेलायाम् वप्रसीतासु धान्याङ्कुरावलिः धरणिपृष्ठस्थिता, शुकावलिरिव प्रतीयते। हरितिमानं प्रसमीक्ष्य मदीयं स्वान्तं भृशं प्रमोदते। यावन्ति क्षेत्राणि आवयोः दृष्टिगोचराणि भवन्ति तेषु सर्वेष्वेव हरितिमा भृशं शोभते। इमे मृगा इतस्तत उत्प्लुत्य-उत्प्लुत्य धावन्ति कर्षकभीताः, केषुचिदकृष्टक्षेत्रेषु गावो महिष्य अजाव्यश्च चरन्ति। अहो ! इमे कृषीवलतनयाः मुरलीकावादनेन सम्मोहयन्तीव कर्षकाम्। नन्वेतेषां जीवनं श्रेष्ठम्। मानसिकाधि-व्याधिरहिता इमे प्रातरेवात्रागच्छन्ति, क्षेत्राणां शोभां दृष्ट्वा-दृष्ट्वा परां मुदं प्राप्नु-वन्तोऽत्रत्यं शुद्धं समीरं लभन्ते, भानुमयूखांश्च सेवन्ते, स्वास्थ्यरक्षार्थं शुद्धवायोः भानुभानूनां निषेवणञ्च हिततमं निगदितमायुर्वेदशास्त्रेषु। इदमेवकारणमस्ति यदेते कृषकाः, एतेषां तनयाः, सुताः, योषितश्च स्वस्था भवन्ति मादृशीनामपेक्षया। मादृश्यो योषितो हर्म्येष्वेव प्रत्यहं निवसन्ति, तत्रैव सूर्य उदेति, तत्रैवास्तमेति च। परं किं क्रियते, अस्माकं हर्म्येषु नास्त्येतादृशी व्यवस्था।

श्रेष्ठी—एते कृषीवला अपि स्व-स्व-गौ-वृषभादीन् गृहीत्वा स्वगृहाणि गन्तुकामा अवलोक्यन्ते। शनैः-शनैस्तमः स्वसत्तां भुवि नभसि च प्रसारयितुं कामयते। तमो व्याप्त्या पन्थानोऽपि तमसाच्छन्नाः सन्तः कृच्छ्रगमना भविष्यन्ति। अत्र बहुसमयं यावत् वप्राणां शोभा समीक्षिता भवत्या, अधुना स्व-हर्म्यं यातव्यम्। वर्षासु पथिषु भुजङ्गवृश्चिकादीनामपि भीतिरस्ति।

शशिप्रभा—एषाऽहं गच्छामि हर्म्याभिमुखम्।

श्रेष्ठी—प्रियतमे ! विविधाकृतिवलाहकाच्छन्ने नभसि गुहाश्चन्द्रमाश्चापि न दृष्टिपथमायान्ति। साम्प्रतमेते ग्रहाः सदोषा मानवा इव मेधान्तर्गताः सन्तः स्वाननं न दर्शयन्ति। अहो ! क्रमेण तमो वर्धते। यथा-यथाऽग्रे चलामि तथा-तथा चेतसि भयमिव सञ्जायते। त्वरमाणेन मयाऽद्य विद्युद्वर्ती अपि न समानीता। इत्थं संजल्पन्तौ तौ स्वनगरसमीपतामधिगतौ। दूरादेव विद्युद्दीपभाभिः भासितं वीक्ष्य तौ दम्पती भृशमतुष्यताम्। काञ्चनपुरे विपणिषु, आपणेषु, वीथिकासु, गृहेषु च सर्वत्रैव विद्युद्दीपाः विधौतन्तस्तमोभयं दूरं प्रणाशयन्ति। अत्र कृष्णापक्षक्षपास्वपि न बाधते तमस्ततिः। अथ क्षणेनैव तौ स्वहर्म्यमागच्छताम्।

अथैकदा शशिप्रभा न्यगादीत्—"स्वामिन् ! अस्मान्नगराद् गव्यूतित्रयं दूरमेकोऽत्युच्चमहीधरो विद्यते, तस्य कन्दरायामेकः साधुस्तपति" इति मया योषिद्भ्य श्रुतम्, यदि भवानाज्ञापयेत्तदाऽऽवाम् तत्र गच्छावः। महात्मनो दर्शनं गिरेः शोभा-दर्शनश्चेति युगपत् कार्यद्वयं सेत्स्यति।

श्रेष्ठी अवदत्—मयाऽपि श्रुतम् पुरुषेभ्यस्तत्र पर्वतगह्वरायाम् मुनिरेकस्तपति बहुवर्षेभ्यः । यदि भवत्यास्तत्र जिगमिषा वर्तते तर्हि गन्तव्यम्, श्वोयन्तास्वः ।

अथान्येद्युस्तौ मरुत्तरयानेन गतौ । तत्र गत्वा मुनिनिवासकन्दरा अन्वेषिता । तत्र कतिपये मुनिशिष्या आसन् । श्रेष्ठिना मुनिशिष्याः पृष्टाः—भोः बान्धवाः, मुनिवर्यः क्व वर्तते । आवाम् तद्दर्शनार्थमागताः स्वः । शिष्या उदतरन्—'श्रेष्ठिन् ! अधुना गुरुदेवः समाधिमग्नो विद्यते गिरिगह्वरायां, अनुमानतो होराद्वयानन्तरमत्रायास्यति तदा यथेच्छं दर्शनं विधेयम् । शिष्यगिरोनिशम्य श्रेष्ठी स्वजायामजल्पत्—"प्रिये ! यावत् साधुवर्यो नैति बहिस्तावदावाम् भूभृतः शोभां प्रेक्ष्वहे ।

शशिप्रभा—यदाज्ञापयति भर्ता ।

अथ द्वावपि गिरेः शोभादिदृक्षया इतस्ततः पर्याटताम् ।

श्रेष्ठी—प्रिये ! अत्युच्चोऽयं भूभृत् । पश्य अस्योपरिमहानि सानूनि उच्चैस्तमत्वेनाऽयं गगनं स्पृशति । भगवानम्बरमणिरपि निरुध्यतेऽनेन बहुसमयं यावत् । विविधास्तरवो लतागुल्माश्चात्र विलसन्ति । प्रिये ! पश्य इमे पयोदाः अस्य मध्यकटकेषु पयोभारनिपीडितास्सन्तः विश्राममिव गृह्णन्ति । अहो ! इतोऽयं गिरिप्रवाहः कल-कलनिनादेन प्रवहन् शोभते, वर्षर्तुतयाऽस्योदकं मलिनं सञ्जातम् । नैदाघतापेन वराकोऽयं पूर्वं कार्ष्ण्यमुपागतोऽधुना हरितच्छविना विधृतहरितदुकुलो महीपतिरिव राजते । गावो महिष्योऽजाव्यश्चात्र स्वैरतया चरन्ति । इह बहुविधा औषधयोऽपि विद्यन्ते । शरदि भिषज आगत्यैतान् गृह्णन्ति, तैश्च लोकोपकारन्तथाऽऽत्यत्रश्च प्राणयात्रां साधयन्ति । रुग्णानां समुल्लासन भूरि यशश्चाऽपि समुपार्जयन्ति । अत्र न सामान्या औषधयः किन्त्येतादृशो भेषजश्च सन्ति यैः निशास्वपि विना प्रदीपैः विद्योततेऽयं पर्वतः । अस्य प्रस्तराणि पश्य, कीदृशानि गुरुणि सन्ति, एभ्य एवापो निष्कास्यते, तस्य च महानुपयोगोविधीयते जनैः । अन्येऽपि धातवोऽत्र सन्ति अन्वेषणेन ते प्राप्तुं शक्याः । महीधरेऽत्र बहून्यलभ्यानि वस्तूनि विद्यन्ते । यदि तानि कश्चिदन्वेषयेत्तदा महान् लाभो भवितुं शक्यते । अहो ! अस्य पार्श्वत एका निम्नगा प्रवहति, इयमपि सूर्यातपशोषितसलिला पूर्वं कृशा किन्त्वधुना तारुण्यमधिगता युवातिरिव स्वभर्तारमुदधिं समालिङ्गितुं त्वरयति । प्रवहतो वारिणो मधुरो ध्वनिः श्रवणान् तर्पयति । उदकाक्लिनतया पर्वतीयामृत् सुचिक्कणा वर्तते, अत्र सावधानतया गन्तव्यम्, नो चेत्पतनभीतिर्भवेन्नाम ।

शशिप्रभा—स्वामिन् ! शनैःशनैरहम् निदधामि चरणौ। यद्यपि मृत् सुचिक्कणा चार्द्रा वर्तते तथाऽपि सावधानाऽहम्। अहो ! कीदृशः भीषणः भुजङ्गम इतः प्रसर्पति, आवाम् शीघ्रतया अस्मात्स्थानात् गच्छावः, कदाचिदयं दशेत् भीता सा पतिमवदत्।

श्रेष्ठी—प्रिये ! न भेतव्यम्, वर्षासु भुजङ्गमवृश्चिकादीनां बाहुल्यं भवत्येव, किन्त्वनपराधिनं कञ्चिदपि नैते दशन्ति। यद्येतान् कश्चिद्धन्तुमुद्यतते, पादेनाभिमृष्टा वा तदा दशन्ति। अतो न भीतिर्विधेया। इत्थं सञ्जल्पतोस्तयोः सर्पोभीतः सन् स्वबिलं प्राविशत्। इत्थं भूधरशोभाविलोकने होराद्वयं व्यतीतम्। ततश्च तौ मुनिवसतिगह्वरान्तिकं प्राप्तुनाम्, समाधेरुत्थितो मुनिरपि बहिरायात्। तौ दम्पती तं मुनि श्रद्धया प्राणुताम्। मुनिस्तौ शुभाशिषा सदकरोत्।

मुनिरसौ जटाजूटः अस्थिचर्मावशिष्टवपुः विगतेच्छादम्भरागद्वेषः परमकारुणिकः, तेजस्वी, जीर्णतया अपि तरुणसमः, विजितमन्यवः समद्रष्टा, शान्तः, वाताम्बपर्याशनश्चासीत्। अथ तौ दम्पती मुनये उपहारं दातुं याचितौ। मुनिना निगदितम्—प्रभो, नाऽहं किञ्चिदपि जिघृक्षुः, भद्रमाप्तुम् युवाम्। मया सर्वं विहाय इहागत्य च परमपदप्राप्तये तपस्तप्यते, अहं भवतो द्रव्यं गृहीत्वा तस्य कुत्रोपयोगं विधास्यामि। प्राणयात्रार्थं बहवः कन्दा सन्ति। पानार्थं पानीयमपि वर्तते, श्वासार्थं वायुरपि पवित्रो वाति। प्राणधारणार्थं यदशनपानमरुतायावश्यकता भवति ते त्रयोऽप्यत्र बाहुल्येन सन्ति, पुनः क उपयोगो द्रव्यस्य। अत्र न मे गृहिणी, न तनयाः, न च कन्या अपि सन्ति यदर्थं द्रव्यस्यावश्यकता भवेत्। महर्षेः पेलवं वचो निशम्य तौ दम्पती व्याहर्ताम्—"भगवन्, क्षन्तव्यावावाम्।" अस्मिन् कलिकाले भवादृशः निर्लोभी, रागद्वेषरहितश्च साधुः परमदुर्लभः। न च मयाऽद्यावधि मम जीवने भवद् सदृशो कश्चिदपि मुनिः कुत्रचिदपि दृष्टः। भवत्समाः विरलतमा एव साधवः सन्ति। कपटसाधुवेशधारिभिरधुना साधु शब्दः कलङ्कितः। पूज्यतमाः सत्कार्या इति विचार्यैव आवाभ्याम् पूज्यतमो भवान् प्रार्थितः, यदि श्रीमतोऽनीहा वर्तते तर्हि शोभनतमम्।

मुनिरवदत्—पुत्र, अधुना कलिकालप्रभावात् बहवः साधवोऽरि दाम्भिकाः सञ्जाताः, किन्तु नेदं पयुः सदातनं तर्हि किमर्थं मिथ्याडम्बरो विधेयः। न च भूयोभयः मानवजन्म प्राप्यते प्राणिना, जीवात्मनः कल्याणार्थं मनुष्यतनुर्लभ्यते यद्येतत् प्राप्याऽपि रागद्वेषलोभादिषु संसक्तो मनुष्यो भवेन्नाम तदा को लाभोऽस्य मानवदेहस्य, अतो मनुष्येण सर्वदा एतादृक् पन्थाः समाश्रयणीयो येन लोकयात्राऽपि सम्यङ्

निष्पन्ना भवेत् तथा परलोकोऽपि शोभनो भवेत्। निशम्य चैनां गिरं श्रेष्ठी अवोचत् —"भगवन् ! अत्रागत्य श्रीमतां सुधासम्मितां भारतीं श्रुत्वाऽद्याऽहमात्मानं कृतकृत्यं मन्ये।" इत्युक्त्वा गन्तुमाज्ञां जिघृक्षन्तौ पुनरपि प्राणमताम्। मुनिराह—पुत्रौ, युवयोः कल्याणं भूयात्। अचिरेणैव युवां सुताननकमलं द्रक्ष्यथः। ततः परमप्रीतौ स्वस्थानमेतुं मरुत्तर समीपमागत्य चालकमादिशताम्। अथ चालकेन यानचालनक्रिया सम्पादिता, तौ च यानमारुह्य स्वहर्म्यं प्रति प्रातिष्ठेताम्। मार्गे तौ मुनेश्चरितं वर्णयन्तौ महतीं मुदं समनुभवन्तौ काचित् वेलामतिक्रम्य स्वहर्म्यं प्राप्तानुम्।

अथैकस्यां क्षणदायान्तौ दम्पती स्वहर्म्यतलमेत्य तत्रोपविश्य च परस्परं वार्तालापं कर्तुं प्रारभताम्, तत्र श्रेष्ठी प्राह—प्रियतमे ! अद्याह्नि महत्यावृष्ट्या विद्युत् तन्त्राणि विघंहितानि, तेन नगरे विद्युत् प्रकाशाभावो जातः। क्वचन-क्वचन मृत्तैलप्रदीपानां म्लानतामुपगता द्युतिरवलोक्यते। अहो ! पृथुलश्यामाभ्रविततं नभोमण्डलम् सञ्जातम्, सर्वतस्तमसः साम्राज्यं विद्यते, न किञ्चदपि वस्तुजातं दृष्टिपथमायाति। नक्षत्राणि विधुश्च वलाहकतिरोहिता नावलोक्यन्ते। सर्वतः रात्रिरियं मुक्तमूर्धजा, धृतासिताम्बरा कुरूपा योषिदिव विभाव्यते। गुहाः निशाकरश्च विरूपामेनां निरीक्षितुं न वाञ्छन्ति। यदा-कदा चञ्चला स्वचञ्चलया प्रभया नभो भूमण्डलञ्च क्षणं चकासयति। तमस इदृशं साम्राज्यं वर्ततेऽधुना यदहं तवाननकमलमपिद्रष्टुन्न पारये। शशिप्रभा—स्वामिन् ! नूनं वृष्टियामिन्यः गाढतामिश्राः भवन्ति, तथापि सौदामिन्या भासिता एता क्षणं चकासति तदेवैतासां मनोहरत्वम्। प्रगाढतमसा गगनमपि असितवसनाच्छन्नो महिष इव प्रतीयते। अहो ! नभस्तः सलिलबिन्दवो निपतन्ति, स्तनयित्नवोऽपि गर्जन्ति, चपला अपि त्वरयन्ति अतो नीचैः गच्छावः।

शैशवतस्तारुण्यमधिगतायास्तरुण्या इव प्रावृड्राज्ञाः तरुण्यसूचके श्रावणमासे शुक्लपक्षे तृतीया तिथिः। अस्यां तिथौ सौभाग्यशालिन्यः सधवाः युवतयः प्रौढाश्च योषितः गुल्फेषु विधृतनूपुराः, कटितटेषु विधृतकाञ्चनकाञ्च्यः, विविधरागरञ्जितवसनानि परिधाय, हारावलिभिरुरोभूषयित्वा, जाम्बुनदवलयभूषितप्रकोष्ठाः, अलंकृतमस्तकाः चूडामणिभिः, सिन्दूरबिन्दुभिर्भूषितललाटाः, शोणिमरक्ताधराः, मारवधूपमसुषमाः अञ्जितलोचनाः वामलोचनाः नगराद् वहिः कञ्चिज्जलाशयं प्राप्प परस्परं सम् मिलन्ति। तत्र काश्चित् मधुरमधुराणि गीतानि गायन्ति, काश्चिन्नृत्यन्ति, अपराः आर्द्रचणकगोधूयमन् कण्टकैर्विध्यन्ति। नवोढाः युवतयश्च स्वप्रियतमे स्नेहं प्रकाशयितुं तेषाम् नामानि गृह्णन्ति।

अस्मिन्तु उत्सवे सम्मिलितुं शशिप्रभायाः मनस्यपि कामना समुद्भूत् । स्वभर्तारमुपसृत्य साऽवदत्—प्रियतम ! अद्य योषितां विशिष्टो महोत्सवो वर्तते यदि भवतामाज्ञा भवेत्तर्हि अहमपि तत्र व्रजेयम् । स्वप्रियायाः वाक्यं श्रुत्वा श्रेष्ठी समजल्पत्—प्रिये ! यदि तवोत्कण्ठा वाञ्छा वर्तते तत्रोपयातुं तर्हि गच्छ, किन्तु तव वपुः साम्प्रतम् कार्श्याधिक्यं बिभर्ति । गर्भवृद्धया उदरमपि काञ्चिदधिकां स्थूलतां दधाति । नाहमवरुणध्मि, किन्तु सावधानता रक्षणीया । भर्तुराज्ञामुपलभ्य साऽपि तत्राव्रजत् । शशिप्रभा यौवतम् प्रौढञ्च प्रसमीक्ष्य स्वान्तर्नीरजे महतीं मुदमन्वभूत् । तत्र गीतानि निशम्य नर्तनञ्चावलोक्य स्वर्गसुखमिवामन्यत । तत्रैका शशिप्रभाया सखी अपि समागमत् । सा च कृशां, शुष्काननां श्वेतपाण्डुराञ्च शशिप्रभां वीक्ष्य प्रावोचत्—भद्रे ! तवेदृशी दशा कथं सञ्जाता ? किंस्वित् केनापि व्याधिना पीडिताऽसि ? आहोस्विदन्यः कोऽपि हेतुरस्ति । सख्याः गिरं श्रुत्वा शशिप्रभा न्यगदत्—सखि ! त्वं सम्विदत्यपि किमेवमं पृच्छसि ? किं त्वन्न वेत्सि । अस्यामवस्थायाम् अस्माकं सर्वासामवि इदृशी एव शारीरिकी स्थितिर्भवति । शशिप्रभायाः वाक्यं निशम्य साऽचकथत्—"भगिनी ! मयाऽद्यावधि इयमवस्था नानुभूता, तस्मादेवाहमप्राक्षम् । अस्तु, तद्दिनं कदाऽऽगमिष्यति यस्मिन् मम श्रवणौ शशिप्रभायाः सुतजन्मगिरं श्रोष्येते । शशिप्रभा—भगिनि ! पौषमासस्य तृतीयसप्ताहसमयः प्रसवस्य यदि काचिद् विकृतिर्नस्यात् । सख्योक्तम्—भगिनि ! यस्मिन्नहनि अहम् शशिप्रभायाः सुतजनिवृत्तं श्रोष्यामि तद्दिनं मम महद्धर्षप्रदं भविष्यति । इत्थमुभे अपि वार्तालापं कुर्वती आस्ताम् । युवतयः प्रौढाश्च नृत्यगानरताः परां प्रीतिमवाप्नुवन् इत्थं रति-युक्तासु तासु भगवान् भास्करो विश्रमितुमिव तासां हावभावप्रेक्षणश्रान्तोऽस्तशिखरं यातुमेच्छत् ।

इत्थं स्वसुषमया शशिप्रभायाः मनोमोदं समुवहन्त्याः मुक्तविविधभोगायाः वृद्धमहिलाया इव वृष्टेः स्थविरता समागता । शनैः-शनैः नभसि मेघानाम् गर्जनमपि स्वल्पतामभजत् । मेघा अपि विरला एव, सौदामिन्यपि स्वभासा न भासयति नभो-मण्डलं भूवलयञ्च । शनैः-शनैः भूमिस्थमुदकमपि परिशोषमाप्तम्, पन्थानश्च गमना-गमनसुकराः सञ्जाताः । लक्षणैरेभि प्रावृण्वेला गता, शरद्वधूश्च शनैः-शनैः वसुधायां नभसि च स्वाङ्घ्रिसरोजौ न्यधाताम् ।

शरद्—अथावनिमलङ्कृतायां शरदि प्रथमन्तावत् विगतारिवलाहको दिवा-करः स्वमयूखास्तिगमन् व्यधात् । अर्कतेजोभिरुपशुष्कं वृष्टिजलं पथीन् अकष्टदान-करोत् । अद्भिः शुष्का धूलिरधुना नोड्डीयते, पन्थानश्च यातायातसौविध्यमभजन् ।

केदारेषु निखिलान्यपि धान्यानि परिपाकमुपागतानि । कृषिवलाश्च परिपक्वानि धान्यानि च यानि विलोक्य परमां मुदमवाप्नुवन् । परिपक्वधान्यैः सह विविधानि फलान्यपि पक्वीभूतानि । केदारेषु मध्ये धान्यम् वहुविधाः व्रततयो विलसन्ति, तासु क्वचन मधुरिम्नि सितातिशायिनि अरुणमज्जानि मधुर-मधुराणि मतीराफलानि शोभन्ते । क्वचन मृदुलपीतानि चिर्भटिकाफलानि स्वसुरभिणा चेतांसि आह्लादयन्ति ।

अथ कदाचित् शशिप्रभा स्वस्वामिना सह स्वकीपमुपवनमयात् । तत्र चैकत्रोपविश्य परस्परं व्याहर्तुमुपाक्रमताम् । श्रेष्ठी—प्रिये, ईक्षस्व, भगवान् भास्वानयं निदाघसमयवन्न शोणिमानं विभ्रत् अपितु मुदितमुदितः प्रहसन् सन् पूर्वस्यां दिशि समुदेति, खगाः अव्यक्तमधुरारावं विदधति, कृषीवलाश्च परिपक्वानि धान्यानि लवितुमुषस्येव ससत्त्वरं स्वकीय-स्वकीय क्षेत्राणि अभियन्ति । गगनमपि निर्मेघतया निर्मलं प्रतीयते । अहो ! उपवनमध्ये विद्यमानोयं तडागोऽपि विमलापः सकमलश्च शोभते । शशिप्रभा—स्वामिन् ! यदि रोचेत भवते तदाऽत्रतडागे स्नायामहम् । अधुनाऽस्य सलिलमपि विमलं वर्तते ।

श्रेष्ठी—यदि भवत्याः स्नानवाञ्छा वर्तते तदाऽवश्यमेव स्नातव्यम् । भर्तुराज्ञामुपलभ्य शशिप्रभा स्नातु तडागे सोपानैरवातरत् । आकटितटे गभीरे वारिणि स्नान्ती सा भृशममोदत । पित्तोष्मदविता सा हिमेनोदकेन स्नानं कुर्वती नितान्तं सुखमध्यगच्छत् । तड़ागोदकमपि अद्य शशिप्रभायाः वपुः स्पृष्ट्वा स्वात्मनि परां तृप्तिमगमत्, यतोहि पित्ततापितशरीरवल्लरी सा वारिणः शैत्यमाप्य नीरुजाऽभवत् । सा च वारिणि भूयोभूयः समुन्मज्य स्वाधिकं तापं परिहाय भर्तारमाह स्वामिन् ! अद्यात्र स्नानेन मम वपुषि काचिदपूर्वा शक्तिः समुद्पद्यत, यदि श्रीमतामाज्ञाभवेत्तदा प्रसवं यावदत्र तडागे प्रत्यहमेव समागत्य स्नायाम् । प्रियावचनमाकर्ण्य श्रेष्ठी अभाषत—प्रिये ! तव यादृशी वाञ्छा तथा विधेयम्, अधुना सार्धाष्टवादनवेला जाता, साम्प्रतम् स्वभवनं गन्तव्यम् । सत्वरं नूतनानि वासांसि परिधाय आगच्छ येन भवनं प्रतियावः । अथ विघृतनवांशुका शशिप्रभा निजभर्त्रा सह स्वभवनं समायात् ।

अद्य शरत्पूर्णिमा । शशिप्रभा परं मुदिता स्वामिनमाह—आर्यपुत्र ! अद्य सूर्यास्तसमये हर्म्यतलमुपयावः । तत्रोपविश्य उदयकाले पूर्णचन्द्रस्य शोभां पश्यावः ।

अथ पूर्वनिश्चयानुसारं शशिप्रभा स्वपतिना सह हर्म्यतलमुपगम्य तत्रैकस्मिन् स्थाने तौ समुपविष्टौ। भगवान् दिनमणिः पश्चिमाशागगनस्तमुपागमत्। श्रेष्ठी स्वजायां सम्बोध्य व्याहार्षीत्—इतो मघवतो दिशि चामीकरचक्रनिभः, पूर्वदिऽग्ध्वाश्चूडामणिरिव, दिवसे दिवस्पतितापितवसुमतिकामिन्याः सुधापूरनिःष्पन्देन शारीरमानससन्तापं शमयन् नभोमण्डलं क्षोणिललनाञ्च परितो परिभूषयन्, कुमुदिनीं समुल्लासयन्, पारावारं समुच्छालयन्, परं मुदितः पूर्णचन्द्रः समुद्यते। अस्तमिते भगवति दिनकृति परं प्रीतिमापन्नं सन्तमसम् शनैः-शनैः स्वपादौ विष्णुपदे भूलवये च प्रसारयितुमारब्धवान्। परं हिमांशोः हिमतया जातशीतज्वरः सन् तत् यथायातन्तथैव स्वप्राणरिरक्षया पुनः भूधरगुहासु यथाकथञ्चित् प्रतियातुमुपाक्रामीत्।

अथ यथा-यथा विधुः विष्णुपदे उपर्युपरि उपयाति तथा-तथा तस्य ज्योत्स्ना सर्वत्र प्रासरत्। अद्य प्राचीदिक् प्रोषितभर्तृका योषित् पतिमिव समवाप्य परं मुदिता सञ्जाता। अहो! अधुना नभोमण्डलमपि प्रहसतः सुधापृषतः प्रविकिरतः चन्द्रमसश्चन्द्रिकामाप्य विशदर्क्षगणमौक्तिकजटितं मसृणचिक्कणनीलाम्बरमिव प्रतिभासते। क्षितिरपि सुधांशोः भास्वरतां सम्प्राप्य मुदितेव भाति। वृष्टिरजन्या निर्धौतरजोभुवनान्यमूनि कुमुदवान्धवस्य विशददधिपयोहिमनिभैः मयूखैः सुधाद्रवविलिप्तानीव भासन्ते। प्रिये! पश्य वसुन्धरामभिसम्मिलिताः शिशवस्तरुणाश्च शरदिन्दुचन्द्रिकया परां तुष्टिमधिगताः क्वचन कबड्डि खेलयन्ति, क्वचिच्च कन्दुकेन क्रीडन्ति। पुराद् वहिः किञ्चित्दूरं स्थिता इमे वालुकानिचयाः चन्द्रिकानिपातेन राजतनिचया इव राजन्ते। अहो! धन्यवादार्हो विश्वसृट् यो हि स्वप्रजासुखहेतोः जगति विविधानि दृश्यानि सृजति।

शशिप्रभा—आर्यपुत्र! शरदियं सुषुमया भृशं माम् मोदयते। यथा-यथा गर्भाशये शिशुरेधते तथा-तथा मे तनुरियं क्लाम्यति, ग्लायति च, परं विविधैः दृश्यैरहं विस्मरामि गर्भवृद्धिजन्यां पीडाम्। मन्येऽहं विधिर्भमानुकूलो वर्तते, अन्यथा यदाकदा ऋतूनां वैषम्यमपि भवत्येव किन्तु अस्मिन् वर्षे प्रत्येकः स्वोचिते समये समायाति, व्यतीते च काले प्रतियाति। अहो! धन्याऽहम्, धन्यश्च गर्भस्थः शावकः। इन्दुरयममृतविन्दून् निषिञ्चन् मां भृशं सुखयति। ममेयं कामना वर्तते यदद्य क्षपायामत्रैव शेवहे आवाम्, येन समग्रायामपि क्षणदायाम् पीयूषविन्दूनपिबाव।

श्रेष्ठी—भवत्या अवितथं व्याहृतम् किन्तु क्षपायामत्र स्वापो नोचितः। हर्म्यतलोऽयमनावृत्तः, सम्प्रति क्षणदायाम् स्वल्पशीतता समारब्धा, तव तनुरियं

अन्तर्वर्त्न्यतया कृशिमानं भजते, प्रसवसमयोऽपि समीप एव, शरीरदौर्बल्यतया त्वं शीतं सोढुमक्षमा, चेद्रात्रावत्र शयनेन प्रतिश्यायो भवेत्तदा महाननर्थो भविष्यति, अतो यावद्रोचते तावदत्र विश्रम्य पुनः नीचैर्गत्वा शयनं शयनागार एव विधेयम्।

शशिप्रभा—भर्त्ता यदपि निगदति तन्मम हितायैव, अतोऽहं भवत आदेशं परिपालयामि। अथ यथारुचि शीतांशोः शीतांशून् परिषेव्य तौ दम्पती स्वशयनागारमुपेत्य प्रसुप्तौ।

उषःकालः। गुहाः विधुश्च भगवतोद्युमणेस्तिग्मतेजः सोढुमशक्नुवन्तः सुदूरं पलायितुमिव समीहन्ते। दिनकृदागमनाशङ्कया परिम्लानकान्तयः कुत्रचिदात्मानं गोपयितुमिव त्वरं प्रयान्ति। शशिप्रभा सहसा स्वमञ्चं विमुच्य स्वकीयभर्तारमबोधयत्—स्वामिन्! किं सूर्योदयं यावत् स्वपन्त्येव भवन्तः। साम्प्रतम् भगवान् मरीचिमाली विष्णुपदं धरणिञ्च चकासयितुं कामयते। नैशन्तमोऽपि भीतभीतः सत्त्वरं प्रतिगच्छति। अण्डजा अपि स्वनिद्रां विमुंच्य उषःकाले भगवन्तं स्तुवन्ति। जागृहि, शोचादिभ्यो निवृत्तो भवतु भवान्, अहं सज्जाऽस्मि। मम वाञ्छास्ति अद्य स्वोपवनसमीपस्थमुपकेदारं भ्रमावः। स्वप्रेयस्या अमन्दानन्दप्रदां वाचं निशम्य श्रेष्ठी प्राजल्पत्। अहो! उषःकालः सञ्जातः। रात्रौ निद्रा सम्यङ् न लभे तस्माद् विलम्बो जातः। अहन्त्वरितमेव शोचादिभ्यो निवृत्तो भवामि। पुनः यथारुचि स्थानं गच्छावः।

अथ तौ स्वोपवनं यावत् मरुत्तरेणोपागच्छताम्। अग्रे च तौ पदाती इतस्ततो भ्रमितुमारब्धौ।

शशिप्रभा—रुचिरेयं वेला, हिमः समीरो वाति, मुक्तवालवत्सा धेनवः स्वोदरज्वालां शमयितुमित आयान्ति। कृषीवलाश्च परिपाकमुपागतानि वार्षिकधान्यानि प्रलूनानि विधाय सम्प्रति केदारेषु शारदधान्यानि गोधूमादीनि वप्तुं सूर्योदयात्प्रागेवात्र समायान्ति। अहो! विश्वसृजा एतेषां जीवनं कीदृशं निर्मितम्। एते वराकाः स्वजीवने कदाचिदपि विश्राममन्न लभन्ते। सम्पूर्णो दिवसः क्षेत्रेष्वेव व्यत्येति, क्षणदायामपि नाधिकं विश्राम्यन्ति।

श्रेष्ठी—प्रिये! इमे अस्माकं जीवनरक्षकाः अन्नदातारः सन्ति। एते यथोपकुर्वन्ति तथा न कोऽपि। यतोहि नान्नेन विना कश्चिदपि प्राणी जीवितुं शक्नुयात्, अन्नञ्चैत एव समुत्पादयन्ति। धन्यवादार्हाः एते खलु, भगवतो वेधसः सृष्टिरक्षार्थमेते रात्रिन्दिवं परिश्राम्यन्ति। नैते मनुजा अपितु विष्णुस्वरूपा एव।

शशिप्रभा—तथ्यं निगदन्ति श्रीमन्तः ।

श्रेष्ठी—प्रिये ! ग्रीष्मसन्तापसन्तप्तायाः क्षोण्याः सन्तापनिवृत्त्यर्थं प्रावृट्कालो निर्मितः । अधुना शारदार्कसन्तप्तायाः वसुधाराज्ञाः सन्तापं शमयितुं विशदकाशच्छत्रमिव निर्मितम् । पश्य, भूवलये सुदूरं विततैः पयः फेनसंकाशैः काशैरियं शरद्वधूः परिहित विशदशाटीवधूरिव प्रोल्लसते । इमे असनपादपा अपि शरद् वधूं मोहयन्तीव । अहो ! कीदृशा रुचिरेयं शरद्रमणी, अत्र नाधिकं शीतम् न चोष्णता । प्रात एव कृषीवलवालकाः सरःसु प्लवन्तः अमन्दमानन्दमनुभवन्ति । सर्वतः शान्तेः साम्राज्ये वर्तते ।

शशिप्रभा स्वघटिकां वीक्ष्य निगदति—स्वामिन् ! नववादनवेला सञ्जाता, अधुना स्वगृहं गन्तव्यम् ।

कार्तिकमासः कृष्णपक्षः । धन्वन्तरिजयन्ती, दीपमाला चामुमेव पक्षमलंकुरुतः । कृषकाः धान्यलावनशोधनतत्पराः तज्जाया अन्याश्च योषितः स्वगृहादिकानां सम्मार्जनलेपने समनुतिष्ठन्ति ।

श्रेष्ठी—प्रिये ! धन्येयं शरत्, अस्यामेव आरोग्यप्रदं सकलामयधातुकं लोकहितहेतोः आयुर्वेदं भुवि प्रचारयितुं भगवान् धन्वन्तरिराविर्बभूव कार्तिककृष्णात्रयोदशी दिवसे । महालक्ष्मीपूजनमपि द्वित्रिदिनान्तरं समायाति । सर्वेजनाः स्व-स्वगृहाणि, वणिग्जनाश्च स्वस्वापणानि विशोध्य चूर्णद्रवेण विविधरागैश्च समलंकुर्वन्ति ।

अद्य दीपावलिरस्ति, सर्वेजनाः परं मोदमापन्नाः स्व-स्वनिकेतनानि, भुवनानि, आपणानि, रथ्याः, मार्गाश्च चूर्णरागैरालिप्य विविधैश्चित्रैः वस्त्रैश्च भूषयन्ति । शिशवो मानवाः योषितश्च परं हर्षमुपागताः स्व-स्वकार्येषु संलग्नाः सन्तः केचन फुल्लझरीः पट्टारवांश्च, अपरे मिष्टान्नानि, परे विविधानि वसनानि, केचन श्रीलक्ष्मीपूजनसामग्रीश्च विक्रीणन्ति । शशिप्रभा अपि अद्य प्रहृष्टा नवांशुकानि विविधानि कनकहीरकमौक्तिकनिर्मितानि आभूषणानि परिधाय भर्तारमाह—"स्वामिन् ! अद्य दीपावलिः, निशायां श्रीलक्ष्म्याः पूजनं विधास्यते, तच्चनिशायां कस्मिन् भागे करिष्यते, का का च पूजनसामग्री इति स्वकीयं पुरोहितमाहूय प्रष्टव्यम्, येन तेषां व्यवस्था क्रियेत ।

श्रेष्ठी—प्रिये ! पूजनसामग्री सज्जा वर्तते, समयोऽपि निश्चप्रचः । यदि भवत्याः वाञ्छा चेद्रात्रौ पुरस्य शोभा द्रष्टव्या ।

दीपावल्यां निशायाः वेला । गृहे-गृहे, विपणौ-विपणौ, प्रत्यापणञ्च, ग्रामे-ग्रामे, पुरे-पुरे, सर्वत्र मार्गेषु वीथिकासु च क्वचन मृत्तैलनिर्मितदीपाः, क्वच विद्युत्प्रदीपाः अन्यत्र मृत्तैलदीपितकाचावृतलौहप्रदीपा निखिलमपि क्षितिमण्डलं भासयन्ति । अद्य मनुष्यलोकोऽपि स्वर्गायते । भवनोपरि प्रतिष्ठापिताः प्रदीपाः गगनत आयाताः ग्रहा इव लसन्ते । गृहे-गृहे, हर्म्ये-हर्म्ये, विविधोपचारैः पद्मालयायाः अर्चनां विदधति जनाः । अहो ! कीदृशं मनोरमं दृश्यम् । अस्यां निशि न कोऽपि एतादृक् प्राणी यो मनसि न हृष्येत् । शशिप्रभा रमणीयतमं दृश्यं समीक्ष्य परां मुदमनुभवति । सर्वे मानवाः स्वशक्त्यनुसारं मधुरान्नं निर्माय स्वकीयान् भोजयन्ति, मित्राणि वान्धवांश्चापि मोदयन्ति मिष्टान्नैः । शिशवस्तरुणाश्च फुल्लझारीपट्टाखैः प्रमुदिताः सन्तः क्रीडन्ति ।

श्रेष्ठिनो हर्म्यमपि अद्य मृत्तैलदीपैः विद्युद्दीपैश्च सुषमायां नाकमपि न्यक्कुरुते, षोडशोपचारैः भगवत्याः कमलायाः अर्चनं विधीयते । तौ दम्पती परं मोदमापन्नौ पूजायां संलग्नौ स्तः । अथ निशीथे किञ्चित् परिश्रान्ता शशिप्रभा सुप्ता, श्रेष्ठी च सर्वामपि रात्रिं नाशयिष्ट, पूजासक्तत्वात् ।

श्रेष्ठी—प्रिये ! प्रौढमनोरमेव मनोरमा शरदियम्, अत्र नाधिकं शीतन्नच चोष्णम्, यद्यपि दिवसे स्वल्पोष्णताऽनुद्भूयते किन्तु क्षपायाम् हिमांशुचन्द्रिका सर्वानपि आह्लादयति । मशकाः, दंशाश्च न वाधयन्ति मनुजान् । वलमपि मनुष्याणाम् शनैः-शनैः वर्धते । क्षणदायां यदा हिमांशुमयूखाः तडागोदरस्थितेषु वारिषु निपतन्ति तदा तानि दुग्धभृतानीव प्रतीयन्ते । निरभ्रे नभसि निरातङ्कोऽयं सुधांशुः प्रमुदितः सन् सुधां प्रकिरन् निखिलानपि सुखयति ।

शशिप्रभा—शरद्यहन्तु विपुलमानन्दमनुभवामि, विशेषतः क्षणदायाम् क्षणदेश्वरेण ।

एवं शरत् चन्द्रमसश्चन्द्रिकया शशिप्रभामाह्लादयन्ती शनैः-शनै विगता ।

अथावनौ हेमन्तः अहानि लघुकुर्वन्, क्षपाश्चायतीः विदधत, क्षितौ, गगने च सर्वत्र शैत्यं तन्वन्, विधुवलं समेधयन् भगवतो दिनमणेस्तेजोक्षपयन्, वामलोचनासु मन्मथमुद्दीपन्, सलिनानि हिमानि समनुतिष्ठन्, महिषोरभ्रकुञ्जरेषु मीनकेतनं प्रेरयन् प्रादुरभवत् ।

मार्गशीर्षमासः । शीतं शनैः-शनैः समेधते । गर्भवृध्या शशिप्रभा विपुलां कृशतां प्रापत्, तस्या अयमस्टमो मासः प्रचलति । अन्तर्वत्न्या अष्टमोमासः कष्टद

एव । यतोहि अस्मिन् मासे ओजसोऽस्थिरता, यदा गर्भे ओजसः सञ्चरणन्तदा माता म्लानानना, यदा च मातारि ओजः सञ्चरति तदा गर्भो म्लानतां प्राप्नोति । अस्मिन् मासे शिशुजन्म अनिष्टकरं मन्यन्ते आयुर्वेदविदोभिषजः ।

श्रेष्ठी मुहुर्मुहुः पृच्छति—प्रिये ! कथय, त्वदर्थे किं वस्तु आनयामि । अस्मिन् मासे त्वया गोदुग्धपानं विशेषेण विधेयम्, ऋतुफलान्यपि सेव्यानि । अष्टमे मासे गर्भ वृद्धया न सम्यक् मलशुद्धिर्भवति अतोऽहमेकां प्रसवविद्यादक्षतामधिगतां परिचारिकां नियोजयामि, सा त्वामास्थापनवस्त्या उपचरिष्यति, तेन पुराणमलशुद्धिः सम्यग् भविष्यति, वायोः कोपश्च न स्यात् ।

शशिप्रभा—भवद्भ्यो यद्रोचते तदेवानुष्ठातव्यम् । स्वप्रेयसीनां कृते पतयः सर्वदैव प्रियङ्कराः भवन्ति ।

अथ शशिप्रभायाः निदेशं प्राप्य श्रेष्ठिना एका परिचारिका नियौजिता, सा च प्रत्यहन्तां परिषेवितवती । सम्यक् सेवया सा किञ्चित् स्वास्थ्यमपि अधिगता । एवं मार्गशीर्षमासो व्यत्ययात् ।

पौषमासः प्रारभत । शीतस्य प्राबल्यम्, उत्तराः शीताः वाताः वान्ति । वसुमन्तो मानवाः धृतौर्णवसना अपि प्रकम्पमानशरीराः समीक्ष्यन्ते । निर्धनाश्च गोमयतृणकाष्ठानि परिदाह्य यथा-कथाञ्चिदपि शीतमपनयन्ति । कदाचित्तुषारपातः, कदाचिञ्च वर्षोपलैः सह वृष्टिः, कदाचन स्तनयित्नुतातिततम् गगनम् । इत्थं हेमन्तः स्वप्रभावं वसुधायां प्रादर्शयत् ।

शशिप्रभायाः प्रसवसमयोऽतिनिकटः । पौषमासतस्तस्याः नवमो मासो लग्नः । यथा-यथा समयो व्यतति तथा-तथा दौर्बल्यमनुभूयते ।

अथ शास्त्रानुसारं नवमे मासि गर्भवत्या सूतिकागारे प्रवेशो भवति, अतः श्रेष्ठिना स्वहर्म्यस्यैकं कक्षं प्रसवार्थं सज्जीकृतम् । अधिष्ठानमिदं पूर्वं सुधाद्रवेण संस्कारितम् पुनश्च वारिणा प्रगाढं सम्मार्जितम् । कक्षेऽस्मिन् वायोरागमनप्रबन्धोऽपि वर्तते, अस्मिन् पञ्चष लघुकपाटद्वाराणि सन्ति, शैत्यरक्षार्थं विद्युतः प्रबन्धोऽपि विद्यते । मलत्यागमूत्रत्यागस्थाने अपि वर्तते । अयं श्रेष्ठी न साधारणो ह्यपितु विपुल-सम्पत्तीशाली, अतोऽस्य न कस्यापि वस्तुनः स्वल्पता ।

अथ शुभे दिवसे शशिप्रभा गजाननार्चनपूर्वकं गोब्राह्मणवैद्यान्च पूजनं विधाय सूतिकागारे परिचारिकया सार्धं प्रवेशिता। तत्र त्रिचतुःपरिणतवयसो वृद्धाः स्त्रीरपि न्ययुक्त श्रेष्ठीमहोदयः। इत्थं परिचारिकया परिणतवयोभिः योषिद्भिश्च परिचारिता सा सूतिकागारे प्रसवकालं प्रत्यैक्षत।

पौषमासः, शुक्लपक्षः, प्रतिपत्तिथिः, शनिवासरः। अद्य प्रातःकालत एव शशिप्रभा किञ्चिद् विमनस्का इव प्रतीयते, उदरे अवरुध्याऽवरुध्य स्वल्पं शूलम्, न चाशनेच्छा, स्वल्पं पय एवापिबत्, इत्थं सम्पूर्णो दिवसो व्यतीतः। निशायाःप्रादुर्भावः, मुहुर्मुहुरावीनां प्राप्तिः, कदाचिन्मूत्रयति कदाचिच्च मलमुत्सृजति, कटिपृष्ठं प्रति समन्नान् वेदना भवति। न च निद्राप्रादुर्भावः। क्लेशमनुभवन्त्याः यथा शशिप्रभायाः निद्रा प्रणष्टा तथा श्रेष्ठिनोऽपि जायायाः कृच्छ्रत्वेन तथा पुत्रोत्पत्तिरद्धदिति सुधापूरपूरितवचःश्रवणोत्सुकस्य निद्रा पलायिता। इत्थं व्यतिकरसक्तायाः सर्वाऽपि क्षपा क्षपिता।

रविवासरः। द्वितीया तिथिः। भगवान् भास्करः स्वारुणिम्ना प्राचीदिग्वधूं अरुणांशुकं परिधापयन् नैशन्तमो नाशयन् समुदगात्। निखिलोऽपि जीवव्रजः मुक्तनिद्रः सन् स्व-स्वव्यापारेषु संलग्नः। अस्मिन् क्षणे आव्यः शशिप्रभान्त्वरयन्ति, मुहुर्मुहुः शकृन्मूत्रे उत् सृजति। परिचारिका गलितवयसः स्त्रियश्च तां भूयोभूय आश्वासयन्ति। अथ क्षणेनैव शिशुजनिरभूत्। शशिप्रभा विगतक्लेशासनी स्वास्थ्यमिव प्रापत्। अथ परिचारिका शिशोः नाभिनालच्छेदनपूर्वकं तस्य स्नानन्तथा शशिप्रभायाः सर्वा अपि व्यवस्थाः विहितवती। अथैका वृद्धा वहिरागत्य श्रेष्ठिनं "पुत्रजनिरभवदिति" विज्ञापितवती। निशम्य च कुमारजन्म श्रेष्ठिमहोदयस्य मानसकलिका भृशमस्फुटत्। ततः स स्वकीयं प्रधानप्रवन्धकमाहूय अवोचत्—भवान् कञ्चिदनुचरं सम्प्रेष्य श्रेष्ठवाद्यवादकानाहूयताम्। पुरोधसेऽपि सन्देशं प्रेषय, येन स नवशिशोः जन्मकालिकं कृत्यं समयश्च सम्यग् विचार्य ग्रहादिविचारं कुर्यात्। विपणेः विपुलं मधुरान्नमपि आनयतु भवान्। अथ क्षणेनैव श्रेष्ठिनः सुतजन्मवार्ता सर्वस्मिन्नपि पुरे प्रासरत्। श्रेष्ठिनो वान्धवाः, मित्राणि सुहृदश्च तत्क्षणमेव हर्म्यमुपसृत्य सुतजन्ममुदं प्राकटयन्। अथ वाद्यवादकाः समुपेत्य मधुरमधुरं वाद्यध्वनिमकार्षुः। केचनानृत्यन्। वाद्यनर्तने उभे ह्यपि मिलित्वा समागतानां जनानां स्वान्तसरोजततीः भृशममोदयताम्। परमप्रीतः प्रधानप्रवन्धकः श्रेष्ठिवान्धवादीन् मधुरान्नदानेन सदकरोत्।

अथाधनोलब्धवसुमतिसाम्राज्यमिव प्रहृष्टः पुरोधा अपि हर्म्यमभूषयत् । स च जन्मकालिककृत्यानन्तरं तन्महत् कामनयाऽधस्तनपद्याभ्याम् भगवन्तमप्रार्थयत्—

दयानिधे ! चिराद् ध्रुवं सुताननं समीक्षितम्
चिरायुषं निरामयं नवार्भकं विधेहि भोः
समोदयं सुमार्गगामिनं करोतु सर्वदा
विधाय सर्वथा कृपां गजेन्द्रमोक्षकारकः ॥१॥

नगेन्द्रनन्दिनीपतिः शिवो विनायको रविः
विधुर्ग्रहाः कपीश्वरः सुरेश्वरः सुरापगा ।
यमस्वसा विभावसु र्विधिर्जलं नभः क्षितिः
भवन्तु मंगलाय वै नवार्भकस्य सर्वदा ॥२॥

ततोऽर्भकस्य जन्मलग्नं निर्माय ग्रहाणां विषये विचारः प्रारभत । पुरोधाः श्रेष्ठिनमाचष्ट— श्रेष्ठिवर्य, उत्पन्नस्यार्भकस्य सर्वे ग्रहाः श्रेष्ठस्थानस्थिताः सन्ति । अयमर्भकः भवद्वंशस्योन्नायकः, रघुरिव कुलस्य कीर्ति प्रसारयिष्यति । आयुरपि दीर्घमस्यास्ति, भवान् यथाशक्ति महीसुरान् सत्करोतु ।

विघृतविविधरागरञ्जितशाटिकाः जाम्वुनदभूषणभूषिताः लोचनाङ्कितकज्जलाः प्रौढाः नवोढाश्च वामलोचनाः मधुरमधुराणि गीतानि गायन्त्यः विबुधललनाः सुरेन्द्रभवनमिव श्रेष्ठिनो हर्म्यमचकासयत् । ततः श्रेष्ठिनः प्राप्तानुज्ञाः प्रधानप्रबन्धकः वाद्यवादकेभ्यो रुप्यकाणि प्रादात् । तत्रागता अन्येऽपि केचन याचका आसन् तेभ्योऽपि यथायोग्यं रुप्यकधान्नादिकं दत्त्वा सत्कृत्य च प्रातोषवत् । तेऽपि परमसन्तुष्टा नवार्भकस्य दीर्घायुषं कामयमाना स्वकीयां—स्वकीयां वसतिमयुः ।

अद्य श्रेष्ठी तदनुयायिनश्च परमप्रीताः लक्ष्यन्ते । उत्सवेनामुना हर्म्यमपि परां तुष्टिमध्यगच्छत् । यः कोऽपि आयाति स परमप्रीत एव प्रतिनिर्वतते ।

शशिप्रभाऽपि भृशमतुष्यत् । मातृशब्दाधिकारिण्यो योषित एव जगति स्वजनेः साफल्यं मन्यन्ते । ललनाजनः सन्तानाप्तये सर्वमपि कर्तुं प्रयतन्ते—सिद्धान् पूजयन्ति, भूतगणानर्चन्ति श्मसानं सेवन्ते, विविधानि व्रतानि समाचरन्ति ! किं बहुना, यदा-

कदा गृहाणि उटजानपि च दाहयन्ति। विविधं प्रयतमाना अपि याः सन्ततिमुखं नेक्षन्ते ताः आत्मानं भारस्वरुपमेव मन्यन्ते। वस्तुतो विश्वसृजा स्वसृष्टेः सम्यक् परिचालयितुं योषितां तनुष्येका विशिष्टा शक्ति सृष्टा।

अथ सम्पन्ने उत्सवे श्रेष्ठिमहोदयः शशिप्रभाया आरोग्यं प्रष्टुकामस्तदन्तिके एकामनुचरीं प्रैषयत्। योषित्पृष्टा शशिप्रभा न्यगदत्—अधुना ममोदरे स्वल्पं शूलं समुत्पद्यते। कोऽस्य हेतुरिति तु नाऽहं वेद्मि, मलमूत्रप्रवृतिरपि सम्यग् जाता। योषितोक्तम्—भवत्याः सुश्रुषार्थं नियुक्ता परिचारिकेयं पृष्टव्या। शशिप्रभया पृष्टम्—ननु ममोदरे समुत्पन्नस्य शूलस्य किन्निदानम्? सा उदत्तरत्—देवि! अस्य शूलस्य किमापतनमिति नाऽहं ज्ञातु शक्नोमि। प्रसूतायाः समुत्पन्नं शूलमिदं कदाचिद् वृद्धि नोपेयात् अतस्तन्निवृत्यर्थं त्वरितमेव कञ्चिदनुभवशालिनं भिषजमाहूय स पृष्टव्यः।

अथ सूतिकागारे प्रेषिता योषित् प्रतिनिवृत्य श्रेष्ठिनमजल्पत्—मया देवी आरोग्यार्थं पृष्टा, तयोत्तरितम् यन्ममोदरे स्वल्पं शूलं समुद्भवति। मया अस्य कारणं ज्ञातुं परिचारिका पृष्टा तयोक्तम् न जानेऽहमस्य शूलस्य निदानमतः कञ्चिद् वृद्धवैद्यमाहूय पृष्टव्यम्। ततः श्रेष्ठी शीघ्रमेव प्रधानव्यवस्थाकमब्रूत—देव्या उदरे शूलं समुत्पन्नमतः भिषजमाहूयताम्। प्रधानव्यवस्थापकः शीघ्रमेव एकमामयनिषूदनं भिपजमाहूतवान्। हर्म्यं प्राप्तश्च वैद्यस्तस्याः नाडी परीक्षामुदरपरीक्षाञ्च कृत्वा कांञ्चित् प्रश्नाञ्च पृष्ट्वा व्याहार्षीत्—पुत्रि, जहिहि भीतिम्, शूलमिदं कष्टप्रदन्त्ववश्यमेव किन्तु शीघ्रमेव शमनमेष्यति। बाहिरेत्य निखिलमपि वृत्तजातं श्रेष्ठिमहोदयं विज्ञाप्य त्वरितमेवास्य प्रतिकारोपायं विधास्ये इत्युक्त्वा भिषङ्महोदयः श्रेष्ठितमकथयत्—श्रेष्ठिमहोदय, देव्या उदरे यच्छूलं समुदपद्यत तन्मक्कलाह्वयं शूलमस्ति। प्रजातायाः स्त्रियाः प्रायेण भवति। शूलमिदं दूषितशोणिता शुद्धयाः प्रजायते। अहम् भेपजं ददामि, तमदुष्णोकेन देवीं पाययेत्, उदरे रबरकूपिकायामुष्णजलं भृत्वा स्वेदो विधेयः, शीघ्रमेव शूलशान्तिर्भविष्यति।

अथ श्रेष्ठी भिषग्वरादिष्टं सर्वमपि विधिं परिचारिकया कारितवान्। त्रिचतुः होरानन्तरं तन्मक्कलशूलं शनैः-शनै शान्तिमयात्। ततः प्रसन्ना शशिप्रभा अभाषत—पीयूषपाणिना वैद्यवरेण यद्भेषजं दत्तन्तेनाऽहमधुन्ना सर्वथा निरामया। ताञ्च विगतामयां ज्ञात्वा श्रेष्ठी, तदनुयायिवर्गश्च भृशमतुष्यत्।

अद्य षष्ठी निशा। पुरोधसा श्रेष्ठिसमीपमुपगम्य अभाषि आयुर्वेदशास्त्रे लिखितमस्ति यत् षष्ठयां निशायाम् विहितरक्षा—वलिक्रियाः शिशोः सर्वेऽपि वान्धवाः जागृयुरतोऽधुना सर्वे विहिताशनाः सन्त आगच्छेयुः। अद्य रात्रौ सर्वैरेवास्माभिः जागरितव्यम्। अथ पुरोधस आज्ञया श्रेष्ठी, तद्‌वान्धवाः सुहृदश्च सम्पादिताशनाः श्रेष्ठिनः सुरमणीये एकास्मिश्चतुःशाले समुपविश्य पद्धिकाभिः, वराटिकासाधन क्रीडेनन (चोपड़ इति लोके प्रसिद्धम्) च क्रीडितुमारब्धाः। इत्थं मध्ये-मध्ये क्षणं विश्रम्य सर्वामपि निशाम् अनिद्राणा एव क्रीडनतत्पराः व्यत्ययापयन्।

निर्गतगर्भशल्या शशिप्रभा प्रत्यहं यवानीशुण्ठीकृतमोदकाशनेन पयःपानेन च शनैः-शनैः प्रचीयमानशरीरा अभवत्। अन्तर्वत्न्यवस्थायाम् या ग्लानिः सा व्यपगता, दौर्वल्यमपि तादृशन्न आननकमलकान्तिरपि नेदानीं श्वेता किन्तु शनैः-शनैः शोणिमानं गृहीतुमारभत। पूर्ववत् शरीरे शैथिल्यमपि नानूभूयते किन्तु स्वल्पा दुर्वलता। परिचारिका च तां सततं सेवमाना आसीत्। सोष्णतैलेन तामभ्यज्य उष्णवारिणा च स्नपयित्वा समये—समये सम्वाहनादिभिस्तां परिचारितवती। इत्थं नवदिनानि व्यतीतानि।

अद्य दशमो दिवसः। पुरोधाः श्रेष्ठिसमीपमागत्याब्रवीत्—अद्य दशमो दिवसः। अस्मिन् दिवसे प्रसूतायाः स्नानेन वस्त्रपरिवर्तनेन च शुद्धिर्विधीयते। शिशोः नामकरणसंस्कारोऽपि अद्यैव विधेयः। स्थानशुद्ध्यर्थं हवनमपि कारणीयम्। प्रमुदितेन श्रेष्ठिनाऽजल्पि—शास्त्रेषु यो विधिर्वर्णितः स पूर्णतया सम्पादनीयः। अथ पुरोधस आज्ञया विहितस्नाना शशिप्रभा नूनतानि वासांसि अधृत। शिशुमपि स्नपयित्वा नूतनवसनैः समलङ्कृतवान्। ततो हवनविधेरनन्तरं शिशोः नामकरणार्थं प्रवृत्तः पुरोधाः श्रेष्ठिनमाह—श्रेष्ठिवर्यं, नवशिशुरयन्तव हर्म्यस्य प्रदीपः। मया प्रागेव प्रजल्पितम् यदस्य सर्वेऽपि ग्रहाः उच्चस्थानस्थिताः सन्ति अतोऽयं भाग्यशाली भविष्यति। त्वदीयवंशे एतादृशो पूर्वन्नाभूत् काञ्चित्। अस्य रवौ जन्म, अतोवारनाम्ना अस्य रविप्रकाशोनाम। यथाहि समुदितो रविः संसारस्य तमो नाशयति तथाऽयं शिशुरपि तव हर्म्यस्य, अस्य नगरस्य, प्रान्तस्य स्वदेशस्य चाज्ञानतमो निराकरिष्यति। अथ शशिप्रभा श्रेष्ठी चात्मजं रघुं प्राप्य सुदक्षिणादिलीपाविव भृशमतुष्यताम्। पुरोधसा कृतेन नाम्नाऽपि तौ भृशमतुष्यताम्।

शीतं प्रवृद्धम्, वियन्मेघवृन्दैराततम्। यदा-कदा ते गर्जन्त्यपि। चञ्चलाऽपि स्वचञ्चलनं प्रदर्शयति। हिमः समीरो वाति, गगनतः सहिमोपलाः उदकपृषताः

पतन्ति । क्षणेनैव दिवसोऽपि रात्रिरिव प्रतीयते । हिमेन सहिमोपलवृष्टया च साधन-विहीनानां जनानां दन्ताः प्रकम्पन्ते । साधनवन्तश्च विधृतमहर्घौर्णवस्त्रा अपि शीताद् बिभ्यति । यद्यपि बहि शिशिराधिक्यमस्ति परं सूतिकागारे न स्वल्पमपि शीतमनुभूयतें स्म शशिप्रभया, यतोहि श्रेष्ठिहर्म्यस्य निर्माणं पटुतमैः वास्तुविद्याविद्भिः कारितम् । तन्मध्ये च एतादृशी व्यवस्था विद्युता विहिता आसीत् येन हिमे हिमभीतिर्न भवति, तपने च तापभीतिर्न । अथ वृष्टेरनु वायुः विपुलशीततामभजत् ।

हिमे हिमांशुशक्तिः समेधते, स च वृद्धो भास्करबलं ह्रासयति अतो हेमन्ते रविरपि विमना इव उदयते, उदीय च दशहोरानन्तरमेव शीतभीतो गोपायति स्वात्मानं अस्तगिरिमाप्य । अनेहष्यपि दिनकृद्देशवो नातिभासो भवन्ति अतो दिवसेऽपि शीतं बाधत एव । यदा-कदाऽतिवृष्ट्यनन्तरं तुषारातिपातनेन दिशो नभोमण्डलं वसुन्धरा च सन्तमसाच्छन्नाः सत्यः नैशं रूपं बिभ्रति ।

अयं विसर्गकालस्यान्त्यः समयः । अत्र सर्वे प्राणिनः शक्तिसमृद्धिमन्तो भवन्ति । अग्निरपि प्रबलः, तं शमयितुं विविधमधुरान्नानि सेवन्ते समर्थाः मानवाः, अत्तानि गुरूण्यन्यान्यपि अनायासेन पचन्ति । अयं कालो निर्धनानां कृते कृच्छ्रत-मस्तेषां समीपे हिमवारणार्थं न वसनानि न चोदरज्वालां शमयितुं विविधान्यन्नानि ।

परिचारिकया परिचर्यमाणा शशिप्रभा साम्प्रतं निरामयतया विसर्गकाल-प्रभावाश्च क्रमेण प्राप्तबला नवोढा युवतिम् व स्वशरीरलाण्यमभजत् ।

अद्य शिशुरेकमासवयः अभूत् । श्वस्तस्याः जलपूजायाःमुहूर्तोऽस्ति । पुरोधसा चागत्य श्रेष्ठी संसूचितः । श्रेष्ठिवर्य, श्वोजलपूजायाः मुहूर्तोऽस्ति, अतः प्रसवित्री सवत्सा उष्णेन वारिणा स्नात्वा नवीनानि वासांसि ध्रियात् । जलपूजायाः समय सायं त्रिवादनकालोऽस्ति ।

अथ श्रेष्ठिना स्वप्रबन्धकर्तारमाहूय प्रोक्तम्—श्वो जलपूजा भविता अतस्तदर्थं वाद्यवादकमानवानां व्यवस्था विधेया । पुरोधाः यत् किमपि आज्ञापयति तत्सर्वं सज्जीकुर्वन्तु । श्रेष्ठिन आज्ञामाप्य प्रबन्धकर्त्रा सर्वा अपि व्यवस्थाः सम्यक् सम्पादिताः ।

अद्य जलपूजायाः दिवसः, अतः शशिप्रभा परमतुष्टा सती सवत्सा उष्णोदकेन स्नात्वा सज्जाऽभूत् । गृहकार्येषु व्यापृतेषु अन्यमानवेषु द्विवादनसमयोऽभूत् । अथ

वाद्यवादका: पुरुषा अपि समायन्। अन्ये च श्रेष्ठिमहोदयस्य बान्धवा सुहृदश्च समायुः। अथ विभृतविविधमनोहरवसनाः सनूपुराः, सग्रैवेयकाः, मौक्तिकहाराः वलिराजिताः ललाटेषु धृत सिन्दूरविन्दवो नवोढाः प्रौढाश्च वनिता अपि श्रेष्ठी हर्म्यमभूषयन्।

त्रिवादनसमयो जातः। शिरस आपादं समाततं पीतरक्तहरित्तिर्यग्विन्दुपंक्तिभिः प्रोल्लसितं कनकराजतपुष्पतारिकासमलंकृतं पीतांशुकम् (पीला इति प्रसिद्धं वस्त्रम्) पीतवर्णां शाटिकाञ्च परिधाय शिरसि शिरोरत्नम्, ग्रीवायां ग्रैवेयकम्, ललाटे सिन्दूरविन्दुम्, उरसि मौक्तिकहारावलिम्, पयोधरयोः पीतां कञ्चुकाम्, चरणयोः नूपुरे, करयोः वलये, अङ्गुलिषु मौक्तिकहीरकजटितमङ्गुलीयकम्, कठितटे काञ्चन-काञ्चीं धृत्वा सा इन्द्राणीव व्यराज। अथाग्रे वाद्यस्य मनोहारिणी ध्वनि पृष्ठे शशिप्रभा तदनु च मांगलिकानि गीतानि गायन्त्यो योषितो जलपूजार्थं गृहाच्चलितु-मारब्धा। मार्गे क्वच शिशवः, क्वचिञ्चवनिताः, कुहचिञ्च याचकः दृश्यमिदं समव-लोक्य भृशं प्रमुदिताः शिशोरमितायुः कामयमानाः भगवन्तमस्तुवन्। मन्दंमन्दं गच्छन्ती शशिप्रभा स्वात्मनि हृष्टा सती भृशमशोभत।

अथ सम्पन्नायाम् जलपूजायां प्रतिनिवृत्तायाम् शशिप्रभायाम् परमप्रसन्नः श्रेष्ठी तदनुयायिवर्गश्चासहायेभ्यः प्रचुरं द्रविणम्, वासांसि, अन्नानि च प्रादाताम्। वसनकाञ्चनराजतभूषणैः द्रविणधान्यादिभिश्च पुरोधा अपि संस्कृतः परमोत्साहेन श्रेष्ठिना। पुरोधा अपि प्रहृष्टः सन् शिशोः दीर्घायुः कामयमानः श्रेष्ठिनमाशीभिर्यो-जयित्वा स्वनिवासमयासीत्। प्रत्यहं वृद्धिमापन्नो हिमोऽतिप्राबल्यमभजत्। वराका-स्तरवोवल्लर्य्थश्च पर्णरहिताः दीर्घामयपीडिता रुग्णा इव भृशं कृशिमानमभजन्। वसुधावनिता अपि शीतसंकुचिते वाभवत्। शीतभीतोष्यता च द्यु मणिसन्त्रस्त कौशिको गुहास्विव पृथिव्यान्तरुपेत्य प्राप्ता। यः कश्चित् सीमानमतिक्राम्यति तस्यान्तोऽवश्यम्भावी इति हि प्रकृत्याः नियमः। नियमोऽयं शिशिरमपि नाजहात् अतोऽधुना शिशिरः प्रयाति। ऋतुराजो मधुश्च निखिलमपि मधुरयन् स्वाभ्रिकमलैः क्षोणीं गगनं नाकमपि अलङ्कुर्वन् स्मयमान इव अदृश्यत।

अथ विगते शिशिरे ऋतुसम्राट् कुसुमागमः कुसुमाश्रिया तरुलतासु कल्पित निवास इव समागमत्। शिशिरापगमात् सकलप्राणिषु मनसुः विशिष्टा तुष्टिः पदं-न्यदधात्। अहान्यपि वृद्धिं गतानि क्षितिरपि उष्माणमाप्य स्वसंकुचिततां परिहाय

मुदितमुदितेवावभाति । भगवान् भास्करोऽपि प्रहसन्निव समुदेति । इतोऽस्यैव क्रमेण समृद्धिर्भवति, विधुवलञ्च क्रमशो ह्रसति । स्वल्पशीतं वसन्तमाप्य शशिप्रभा श्रेष्ठी व मनसि भृशं प्राहृष्यताम् । अथैकस्मिन् दिवसे श्रेष्ठी स्वप्रबन्धकर्तारमाह—सम्प्रति सुरभि समयो वर्तते, अस्माकं कृते प्रसन्नतायाः समयोऽस्ति अतो नगरवासिनोऽखिलानपि सरस्वतीसमुपासकान् विदुष आहूय एकस्याः कविपरिषद आयोजनं विधेयम् । श्रेष्ठि गिरं निशम्य प्रबन्धकर्त्ता निगदितम्—भवतोऽभिलाषमहमपि अनुमोदये । प्रबन्धकर्त्ता तथा व्यवस्था कृता ।

अद्य श्रेष्ठिनो हर्म्यं विबुधभारतीसमुपासकसमुदयेन विभ्राजमानमास्ते । कवि-नामागमनात् प्रागेव श्रेष्ठी तदनुयायिवर्गश्च मुदितमुदितः तेषां सत्कृतये करकिसलया-योजित सचूर्णपूगीफलसुरभितचूर्णमिश्रितताम्बूलैः समागतान् तान् सदकुर्वन् ।

अथ प्रचलिते परिषत् कार्ये कविरेकः समुत्थाय सुमधुरपद्यैः सुरभिः वर्णनं कर्तुमारभत—

दिनमणौ घटमीनगते सति
मधुरयं समुदेत्यवनितलम् ।
जनमनांसि समुल्लसितान्यतः
कविवरैः ऋतुराज इतीर्यते ॥१॥

शिशिरकालजशीतविशेषताम्
परिहरन्नृतुराजमधुः प्रियः ।
अवनिमण्डलमण्डितसौरभो
जयतु मानवमानसमानदः ॥२॥

उपवनेषु वनेषु च पादपाः
व्रततयश्च हिमेन विषादिताः ।
प्रियमधौ पृथिवीं समुपागते
नववयः परिलभ्य मुदान्विताः ॥३॥

तरूषु कोमलपल्लवशालिषु
परभृतो मधुपाः सततम् स्वनम् ।
विदधति श्रवणप्रियमुन्मदाः
ऋतुवरे भुवने समुपस्थिते ।।४।।

मलयचन्दनसौरभसंगतः
स्मरसखः स्मरणीययशा मृदुः ।
मदनमत्तमनोजनमोदनो
जगति वाति हि दक्षिणमारुतः ।।५।।

पृथुकुचाहिततन्तुजकञ्चुकाः
कनकभूषणभूषितपाणयः ।
गुरुनितम्बतया गमनालसाः
कटितटस्थितकाञ्चनमेखला ।।६।।

नयनकञ्जविलग्नसुकज्जलाः
अरुणबिन्दुविभासित मस्तकाः ।
विघृतपीतनवांशुकशाटिकाः
उपवने वनिताः विहरन्त्यलम् ।।७।।

नवदलैः सुमनोभिरलंकृताः
वटरसालपलासशिरीषकाः ।
वकुलवारिजवञ्जुलनिम्बकाः
मधुरमाधवकालसमागमे ।।८।।

विपुलशीतविदग्धदला इमे
मृदुलघुच्छदपुष्पसमाचिताः ।
स्वसुरभि प्रकिरन्त इतस्ततः
प्रतिदिशं विलसन्ति हि निम्बकाः ।।९।।

मसृणकोमलशोणिमपल्लवै—
रयमशोकतरुर्विलसन् रुचा ।
पथिकचित्तविलोभनपाटवे
सफलतामयितुं मनुते स्वकम् ॥१०॥

अधिवसन्तमसावतिसौरभः
रुचिरतामुपलभ्य विराजते ।
समुपविश्य शिखासु वनप्रियः
प्रियरुतं वितनोति मदोद्धतः ॥११॥

उदितचन्द्रनिभप्रभयान्वितैः
तरुणिकाकुसुमैः मधुगन्धिभिः
मलयमन्दसमीरसमाहृतै—
रुषसि चैत्रमसि ह्रियते जनः ॥१२॥

कनककान्तिसुमाक्तसुपेशल—
हरितपत्रचयो शुकराजिताः ।
नववधूरमणीयतरा धरा
समवभाति भृशं बकुलश्रिया ॥१३॥

हिमसमीरविकम्पिकलेवराः
शिशुकलत्रनराः ह्यखिला अपि ।
क्रमसमेधितसूर्यगभस्तिभिः
सुखमवाप्य मुदा विकसन्त्यलम् ॥१४॥

शिशिरशीतं विकम्पितविग्रहाः
क्षितिवधूस्त्वपि हर्षमुपागता ।
पतिमिवाप्य महीं समलंकृते
ध्रुवमुपाकुरुते सुजनोऽखिलम् ॥१५॥

भवविलोचनदग्धवपुः स्मरः
प्रियसखायमुपेत्य वरानने !
अतनुरप्यतुलां विकृतिं भृशम्
जनयति प्रसभं हृदये नृणाम् ॥१६॥

उपलरूपमपां सरितः शनैः
दिनकृदंशुभिराऽवते ततः ।
चिरवियुक्तकृशा अपि सागरं
मिलितुमाददते सरणिं निजाम् ॥१७॥

सुमनवृन्दसुगन्धि जिघृक्षवो
मधुलिहो मधुमासदिनेऽवहो !
विविधनादकराः मिलिता भृशम्
सुरभिगौरवगानरता इव ॥१८॥

अलिसमूहमनीकमिवालघु
तरुणकोकिलकम्बुरवो महान् ।
रुचिरपल्लवपुष्पवरासने
मधुनृपो विजयाय विजृम्भते ॥१९॥

त्वयि वसन्त ! धरामधिकुर्वति
मधुरभावमुपैत्यखिलं जगत् ।
मधुरीति प्रथितश्च तवाह्वयम्
त्वमत एवविभर्षि नृपास्पदम् ॥२०॥

सुरभिताः वनपर्वतवायवः
उपवनानि तडागसरांसि च ।
प्रकृतिसर्वकरणा अधिकं किमु
सुरभिनाम यथार्थमिदन्तव ॥२१॥

त्वयि वसन्ति गुणाश्च विभावसोः
प्रणिगदन्ति वसन्तमतो जनाः ।
विगतशीततुषारवसुन्धरा
प्रमुदिता वनितेव विभाव्यते ॥२२॥

वहति दक्षिणमन्दसमीरण
विटपनीड़विहङ्गमनिःस्वनैः ।
स्तुतिरिवोषसि विश्वसृजः परा
कुसुमकालदिनेषु वितन्यते ॥२३॥

मरुतरुष्वपि पुष्पचयो नवो
मनसि कस्य न हर्षवहोऽधुना ।
मधुविलासमवेक्ष्य नरो यदि
त्यजति नेह मनोदवथुं मुधा ॥२४॥

मृदुसुगन्धशिरीषसुमैर्मनः
परभृतप्रियकाकलिभिस्तथा ।
प्रमुदितन्न भवेत् कुसुमागमे
नरवरस्य च कस्य सुखैषिणः ॥२५॥

विधृतपीततनुः सुरभिर्मुदा
मलयजेन समं भ्रमति क्षितौ
ऋतुमिमञ्च निरीक्ष्य शिवाद् ऋते
मनसि को नु ? विभर्ति न मन्मथम् ॥२६॥

न च हिमन्न तुषारचयो मधौ
नहि पयोदकुलैर्वियदत्वृतम् ।
नहि चलन्ति च पश्चिमवायवः
गतमलाः ककुभो विलसन्त्यलम् ॥२७॥

विमलपुष्करपूरितवापिकाः
विकसितैः कुमुदैश्च विभासिताः ।
जलजगन्धसुगन्धितजीवनम्
पिबति पक्षिगणो विहरन् जले ॥२८॥

सरसि जानि सरःसु विभान्त्यलम्
धवलपक्षविहङ्गमसंगतैः ।
सुरभिसौरभलुब्धसुमानसै–
निजनिवाससरः परिहीयते ॥२९॥

विधुकरद्युतिनष्टतमस्ततिः
मधुनिशासु सुगन्धि सुभानिलः ।
वितनुतेऽमितमोदमहो ! हृदि
जगति पश्य सखे ! सुरभिच्छविम् ॥३०॥

यवचणकसतीनाः राजिकाः सर्षपाश्च
सुमनजरपदीप्या धान्यमेथी शताह्वाः ।
कुसुमितफलिताः स्युः पीतपालासवर्णा
धरणिरिह विभाति प्राप्तपीतांशुकेव ॥३१॥

कविमुखात् वसन्तवर्णनं निशम्य श्रेष्ठी स्वस्वान्ते भृशमतुष्यत् । कविष्वेको भिषक् कविरासीदतस्तेनाऽपि अधस्तना कविता श्राविता ।

शिशिरकालचितो मधुरैः कफो–
घृतमिव द्रवितोऽर्ककरैः शनैः ।
शिखिनमत्र विधाय भृशं कृशम्
कफजरोगकरो भवति ध्रुवम् ॥३२॥

सुभगकुसुमकालस्तत्र कोपः कफस्य
प्रकृतिरचित एव प्राणिनां दुःखहेतुः ।
यदि हि चरकतन्त्रप्रोक्तसत् स्वस्थवृत्तम्
सततमनुसरेद् यो नैव रोगांल्लभेत् ॥३३॥

कफगदशमनाय त्याज्यमेवाखिलन्तत्
चयनमिह कफस्य स्याद्धि यैः द्रव्यजातैः ।
गुरुमधुरसुशीतान् स्निग्धमम्लञ्च धीमान्
गुड़दधिदिननिद्राः वर्जयेद् दुर्जरश्च ॥३४॥

वमनक वलनस्योद्वर्तनान्यव्यथाञ्च
सह कुसुमरसेनाद्याद् यवान् षष्टिकांश्च ।
सुमनविविधशालीन् रुक्षमुष्णञ्च मुद्गान्
मधुकृतवरमद्यान्यासवांश्चानवीनान् ॥३५॥

व्यायामं बहुविधमाचरेत् स्वशक्त्या
पथ्याशी गदितदिशा च नित्यमेव ।
धूमाश्चामयहरर्वापिता ये
सेवास्ते, नहि कफरोगभीतिरत्र ॥३६॥

कौपप्रास्रवणं वारि पेयम्, शुद्धौ सुखोदकम् ।
स्नात्वा चन्दनकर्पूरकुंकुमालेपनं हितम् ॥३७॥

आदानमध्यः समयः किलैषः
सञ्जाय ते मध्यबलंनराणाम् ।
श्लेष्मक्षयार्थं मनुजः स्वभार्या–
सार्धं मितं मन्मथवृत्तिमियः ॥३८॥

कृमिजतौलकपीतकतन्तुभी
रचितचौलकवस्त्रधरः पुमान् ।
अगदतामुपलब्धुमनामयः
उषसि शुद्धसमीरचरो भवेत् ॥३९॥

अगदङ्कारकवेः सुरभौ मानवशरीरेषु जायमानं परिवर्तनं रूचिरकवितानिबद्धं निशम्य श्रेष्ठी स्वानुयायिवर्गमभाषत, ज्ञातं युष्माभिः वैद्यकवेः सरसकविताया: रहस्यम् । रूचिरकवितारसास्वादनेन सममेव निरामयताऽपि प्राप्तुं शक्यते पुरुषेण यदि हि कविनोक्तनियमाननुपालयेत् । आयुर्वेदस्य प्रधानं प्रथमञ्चेदमेव प्रयोजनमस्ति यद् रोगाणामुत्पत्तिरेव न स्यात् । तच्च ऋतुचर्योक्ताहारविहाराभ्यां भवितुं शक्यते । वैद्यवरकविना चारुपद्यैः वसन्तर्तोः यावद्वर्णनं तावदेव स्वल्पम् । वस्तुतोऽस्यर्तो विपुलं महत्वं वर्तते । गीतायां श्रीमता भगवता वासुदेवनापि लिखितं यत् "ऋतूनां कुसुमाकरः" अस्यायमभिप्रायोऽस्ति यदहं ऋतूनां मध्ये वसन्तोऽस्मि । अस्येदं तात्पर्यं पर्यवस्यति यत् कालरूपस्य भगवतोंऽशो वसन्ते विशेषेण वर्तते । उक्तपद्येषु अस्य यथार्थनामाङ्कनमपि विहितम्, वस्तुतस्तदवितथम् विद्यते । नास्ति कश्चित्संदेहो यदयं ऋतुराजः । अस्येदमपि वैशिष्टयमस्ति यत् होलिकापर्व, गणगौरीपर्व, भगवत्या अम्बिकायाः प्रादुर्भावः, भगवतो दाशरथेः जनिः, कपीश्वरस्य मारुतेरपि जनिः, एभिरस्य विशिष्टं महत्त्वं वर्तते ।

कुसुमागम एव शरदि प्रवारिता यवचणकादयः परिपचन्ति अतोऽपि महत्त्वमस्य वरिवर्ति । श्रुत्वा चेमां सुषमां वसन्तस्यामितमानन्दमभजन् श्रेष्ठी तदनुयायिनश्च । अथ श्रेष्ठी तान् वसनकाञ्चनरौप्यालङ्कारैः समर्च्य हृत्सरोजे महती मुदमन्वभवत् । तेऽपि सन्तुष्टाः सार्भकं श्रेष्ठिनं चिरञ्जीवेतामिति शुभाषिा ह्यभिनन्द्य स्व-स्ववसतिमगच्छन् ।

अथ गतेषु तेषु परमप्रसन्नेन श्रेष्ठिमहोदयेन प्रावोचि अहो ! अद्यतनः कार्यक्रमो महदानन्ददायकः । अद्य श्वो वा यामिन्यां ढफाह्वयवाद्यविशेषस्य सम्मेलनस्यायोजनं विधेय । श्रेष्ठिन आज्ञामधिगम्य प्रबन्धकर्त्ता तथा व्यवस्था कृता ।

अथ क्षणदायां हर्म्यविरामिदायाम् वेत्रासनपंक्तयः सज्जीकृताः । अग्रेतेन भूखण्डे नर्तनप्रबन्धो विहितः । ततः श्रेष्ठिसहिता तद्बान्धवाः अन्ये च नागरिकाः

आसन्दी अलमकार्षुः। क्षणेनैव वाद्यवादकनर्तकाश्चोपेत्य स्वकार्यक्रमं कर्तुमारभन्त। तेषु केचन योषिद्वेशधारिणः, केचिच्च करगृहीतमुरलिकाः वासुदेववेशवन्तः, अपरे भाण्डवेशधारिणः, केचनान्यविविधवेशधारिणः सन्तः विविधनर्तनगायनहावभावैः सम्पानतोषयन्। सभ्याश्च परमसन्तुष्टाः तान् हर्षध्वनिभिः अमोदयन्। इत्थं नैशोऽसौ कार्यक्रमोऽपि नितरामोदप्रदोऽभवत्।

इत्थं पुण्यकालो निखिलानपि प्रतोषयन् शनैः-शनैः क्षोणितो ह्यपसर्तु प्रारब्धः। जनाञ्च गन्तुमुत्सकं पुष्यकालं वीक्ष्य मनःकमलेषु भृशमदूयन्त। अहो! मासद्वयस्य कुसुमागमवेला विविधमोदमग्नानां सत्वरमेव व्यत्यगात्। प्रकृतेरय नियमो यत् सुख-दिवसानि सत्त्वरं व्यतियान्ति। ननु विधिना किमिति परिवर्तनं विहितम् सुभगकालस्य, सर्वदैव सुखात्मकः समयः कथन्न विहितो जगति। नैषः विधेर्दोषः अपितु स्वभावेनैव परिवर्तते सर्वमपि जगति। जगत् शब्दस्यायमर्थो यद् "गच्छतीति जगत् इति" अर्थादत्र न किमपि वस्तु स्थायित्वं लभते। अत्रोत्पद्यमानस्य वस्तुनः परिवर्तनम-वश्यम्भावी, न तत् परिरोधयितुं कस्यापि सामर्थ्यमस्ति। मनुष्यादयः स्वार्थिनः सन्ति, ते स्वार्थपरवशाः सर्वस्मिन्नपि समये सुखमेवाधिगन्तुं कामयन्ते परन्तु मृत्युलोके जनिमाप्य न कोऽपि सर्वदा दुःखी सुखी वा भवति। महाकविकालिदासेन मेघदूते लिखितम्—

"कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥

रविप्रकाशस्यायुरधुना मासत्रयस्य संजातम्। जननी तं दोलायाम् शाययित्वा समीप एवोपविष्टा। स च चञ्चलतया पादौ, करौ चेतस्ततः प्रक्षिपति। कदाचिच्च स्वांगुष्ठमानेन प्रवेश्य लेढि। कदाचित् किञ्चित् हसति, कदाचिच्च रोदिति। तच्च रूदितं विज्ञाय माता स्वान्तनीरजे चिन्तयति क्षुधितोऽयमर्भकोऽतः स्तन्यं पाययामि। तमङ्कमारोप्य स्तन्यं पायन्ती शशिप्रभा अपरां मुदमुपगता। अहो! भगवतो जगदीश्वरस्यानुकम्पया अद्य ममाङ्के शिशुः क्रीडति। अस्य जन्मनः प्राक् मम-मानसकलिका अस्फुटितैवासीत् किन्तु धन्याऽहमद्य शावकमिममवाप्य। भगवन्तं याचे यदयं शिशुः दीर्घायुः भवेन्नाम। इत्थं कल्पयन्ती सा बालकं स्तन्यं पाययित्वा मञ्चे स्वापयामास।

अथ क्रमेण व्यतीते काले (विप्रकाशस्यायुः षण्मासस्थाभूत्। तदा स किञ्चिद् जिघ्रक्षति, कदाचिच्च क्रीडनकानि वीक्ष्य मोमुह्यमानस्तानि आदित्से, कदाचिदवनौ

उपविष्टुं चेष्टते, यदा-कदा स्वल्पं समयं यावत् माता तं वसुधायामुपवेशयत्यपि किन्तु पतनभयान्नाधिकं कालं यावदुपवेशयति। यदा-कदा जानुभ्यामपिचलितुं चेष्टते परं सम्यक्तया षठमासवयसि जानुभ्यां गन्तुन्न समर्थः। प्रसूस्तस्येदृश्यश्चेष्टाः समीक्ष्य स्वात्मनि महतीं तुष्टीमलभत। यदा-कदा मातुरङ्कमुपयातुमपि अचेष्टत। अथ व्यतीते षष्ठे मासि सप्तममास प्रारम्भे एव तस्य कर्णौ अविध्यत। कर्णवेधनेन शिशूनां ग्रहजन्या आमया न भवन्ति। कर्णयोः भूषणाणि धारयतः पितरौ, कनकभूषणैश्च शिशवो भूष्यन्त इति हि आयुर्वेदप्रवर्तकानाम् मतम्।

अद्य पौषशुक्ला द्वितीया तिथि वर्तते। अद्य रविप्रकाशस्य जन्मदिनतः श्रेष्ठी पुरोधसमाहूय प्रावोचत्—महीसुरवर्य ! अद्य शिशोः जन्मदिनम्, अतो भवता गणपतिनवग्रहषोडशमातृकादीनामर्चनं कर्तव्यम्। वेदमन्त्रैश्च रक्षा विधेया। श्रेष्ठिनो भारतीं निशम्य पुरोधाः वेदमन्त्रैः गणपत्यादिपूजनं विदधाति, अपरत्र युवतयः गीतानि गायन्ति। श्रेष्ठी प्रहृष्टः सन् स्व बान्धवेभ्यः समागतमित्रेभ्यश्च मधुरान्नानि ताम्बूलानि च वितरति। अथ सम्पन्ने पूजनकर्मणि पुरोधसं सत्कृत्य प्रास्थापयत्। एकरूपावया रविः जानुभ्यामवनौ सत्त्वरञ्चलति। कदाचिन्मातुरंगुलिं गृहीत्वा पदातिरपि चलति, किञ्चिदव्यक्तं "माँ" इत्यपि वक्तुञ्चेष्टते। शनैः-शनैः सोऽन्नमपि अशितुं वाञ्छति। सहायमाप्य एकको अपि उत्तिष्ठति, भीतभीतश्चलत्यपि। शशिप्रभा श्रेष्ठी च शिशोरनेनव्यतिकरणस्वर्गीयसुखमनुभवतः। अहो ! स एव गृहस्थाश्रमो धन्यो यत्र शिशूनामव्यक्तमधुरध्वनिरभितः श्रूयते, गृहिणी चानुकूला, साधारणावश्यकतापूरकं धनञ्चेति। इत्थं तृप्तिमनुभवतोस्तयोः द्वितीयवर्षमतिवाह्य द्वितीयवर्षे पदं न्यधासीत्।

अथैकदा पुरोधाः समागत्य श्रेष्ठिनमभाषत—तवायं शिशुः तृतीये वर्षे पदं न्यधादतः शास्त्रानुसारमत्र बालानां चूड़ाकर्मसंस्कारो विधीयतेऽतस्तदर्थं प्रयत्नो विधेयः। पुरोधसो वचांसि निशम्य श्रेष्ठी व्याहरत्—"भगवान् ! शिशोश्चूडाकर्मसंस्कारोऽवश्यमेव करणीयोऽधुना, यतोऽस्य शिरशि कचाः विपुलदीर्घाः सञ्जाताः।" तपने तापेन कष्टमनुभविष्यति। अस्य संस्कारस्य विधाने किं किं विधातव्यमिति आज्ञापयन्तु येन तत्तद्वस्तूनां व्यवस्थां विदधामि। पुरोधाः श्रेष्ठिवाक्यमुपश्रुत्य व्याहार्षीत्—भगवत्याः जगदम्बायाः आवाहनं पूजनञ्च विधाय ततो गणपतिनवग्रहषोऽशमातृकाणामर्चनम् ततश्च शिशोः केशानां वपनम्। अस्मिन् काले स्वसुहृद्बान्धवां कृते प्रीतिभोजरूपे जेमनमपि करणीयम्। यद् यदुचित तत्सर्वं मया कर्तव्यमिति श्रेष्ठी न्यगादीत्।

अद्य रवेः चूडाकर्मसंस्कारस्य दिवसः। श्रेष्ठिनो हर्म्ये पुरोधाः वेदमन्त्रानुच्चारयति। अभिनवांशुकैराभूषणैश्च समलंकृताः वनिताः माङ्गलिकानि गीतानि गायन्ति, श्रेष्ठिवान्धवाः सुहृदश्च परस्परम्मुदमास्थिताः विविधैः क्रीडनसाधनैः क्रीडन्ति, तदनुयायिवर्गश्च श्रेष्ठिन आदेशानुसारं विविधकर्मसु व्यापृताः सन्ति। भगवत्या अम्बायाः, गणपतेः, नवग्रहाणाम्, षोडशमातृकाणाञ्चार्चनं विधाय रवेः केशाः प्रवापितास्तं स्नपयित्वा नूतनैः महार्हवासोभिः समलंकारितः, हस्तौ, पादौ च मदयन्त्या रागेण रञ्जिताः, नेत्रकमलयोरञ्जनम्, ग्रीवायां विशदमौक्तिकहारम्, शिरसि सुसूक्ष्मजम्बुनदसूत्रविन्दुसमलंकृतमुष्णीशम्, चरणयोः कटकानि, करयोः कनकमयं रक्षासूत्रम् पर्यधारयत्। रविरद्य परमप्रसन्नः, अधुना सम्यग् गदति, चलति, अन्नमश्नाति क्रीडति सवयोभिरन्यैः शावकैः। यदा-कदा पट्टीं गृहीत्वा लघुपुस्तकञ्च जननीं वक्ति—मातः, अहमधीये, इत्युक्त्वा किञ्चिन्मनस्येव ब्रवीत्यपि।

सायं षड्वादनसमयः। समयोऽयं शीतकालस्यातो दिनमणिः पश्चिमगिरिमाशीश्रियत्। हिमत्रासिततनुर्मनुष्यो निजनिकेतनमेत्य शीतादात्मानं रक्षति।

सम्प्रति श्रेष्ठिनो हर्म्यं परितो विद्युद्दीपैः प्रभासितं यामिन्यामपि दिनायते। मञ्चैरासन्दिभिश्च भृशं राजते, क्वचिच्चासितरक्तनीलश्वेतादिविविधवर्णसमन्वितानि लघुमरुत्तराण्यपि शोभन्ते। अपरत्र श्रेष्ठिनः कर्मकराः प्रबन्धकर्त्तारश्च जेमितुं समागतानां पुरुषाणां व्यवस्थायां संलग्नाः सन्ति। श्रेष्ठी च समागतानां स्वागतं विदधाति। अथ हर्म्यस्य वितते भागे पुरः स्थितोच्चकाष्ठपट्टकेषु वेत्रासनेषूपविष्टेषु मानवेषु अग्रे स्थितेषु भोजनपत्रेषु क्षणेनैव अनुचरवर्गः क्रमेण मोदकानि, जलवलयकानि, हृन्मोदप्रदं चणकचूर्णकिलाटसर्पिःरचितं मधुरान्नम् वातादनिर्मितकत्तलिकाः, दधिवटकान् पूरिकाः, शाकानि, अवलेहांश्च परिवेश्य, तदनु च श्रेष्ठिमहोदयस्तानजल्पत्—भोः, भोः मित्राणि, बान्धवाः, सुहृदश्च अशितुं प्रारभन्ताम्। अद्य मम महत् सौभाग्यमस्ति यत् श्रीमन्तो मम हर्म्यमुपगम्यैतत् पवित्रीकृतम्। सौभाग्यशालिनामेव गेहेषु मित्राणि, बान्धवाः, सुहृदश्च समागत्य अश्नन्ति। मदीये मानससरोरूहेऽद्य या मुदुदपद्यत तां वाचा वर्णयितुन्न शक्नोमि। अहमाशास्ये, यदाऽस्य शिशोः परिणयो भविष्यति तदाऽप्यहमित्थमेव भवतः सत्करिष्यामि।

अद्य श्रेष्ठि हर्म्ये सर्वत्र समुल्लासष्य तरङ्गास्तरङ्गायन्ते। एकत्र सुहृद्बान्धवमित्राणि अपरत्र महिला समुदायो जेमति। श्रेष्ठी पुरुषान्, शशिप्रभा च महिला

भूयोभूयः सम्पृच्छति—महोदयाः किमभिलषन्ति श्रीमन्तः, श्रीमत्प्रश्चेति । इत्थं निशायामेकादशवादनं यावत् पुरुषाणां महिलानाञ्च सम्मेलनमिव सञ्जातम् तस्मिन् दिवसे ।

रविर्यदा षण्मासवया आसीत्तदैव श्रेष्ठिना विपणेरनेकविधानि क्रीडनकानि क्रीत्वा समानीतानि । तैः परिवेषिशिशुभिः सह प्रत्यहमक्रीडत् । रविः कदाचिदुष्ट्रा-ह्वयक्रीडनके समुपविशति, कदाचिदवतरति, कदाचन मरूत्तमारोहति, कदा च हस्तिनि, कदाचिद्विडालिकया क्रीडति, अथ च क्षणेनैव तामपहाय चटकया, क्षणान्तरे मयूरेण इत्थं संक्रीडतस्तस्य वयसस्तृतीय चतुर्थो वर्षौ व्यत्यगाताम् ।

रवेः परिचर्यायै एका परिचारिका नियुक्ता आसीत् परं शशिप्रभा तं स्वयमेव अस्नापयत्, कङ्कतिकया केशप्रसाधनम्, नेत्रयोः कज्जलम्, प्रत्यहं स्वच्छश्वेतवसनपरि-धापनम्, स्नानात्प्राग् अभ्यङ्गानमुद्वर्तनञ्चापि अकरोत् । परिवेषिशिशुभिः समं संक्रीडतो रवेः मधुरया वाचा शशिप्रभायाः हृत्सरोजकलिका रविसमुदयेन सरोजकलिकेव भृशमस्फुटत् ।

यदा रविः पञ्चमवर्षे पदं न्यदधात्तदा श्रेष्ठी मनसि विचारितवान् यदिमं शिशुं कस्मिंश्चिद् बालशिक्षामन्दिरे प्रवेश्याध्यापयेयम् । एवं निश्चित्य स काञ्चनपुरीय राजकीयशिक्षामन्दिरस्य प्रधानसमीपमुपगम्य व्याहार्षीत्—महोदय, मदीयः पञ्चहायनः शिशुरस्ति, वाञ्छाम्यहं यत् स अस्मिन् बाल शिक्षानिकेतने अधीयित, अत्र शिशूनांकृते का व्यवस्था वर्तते । प्रधानः समुदतरत्—श्रेष्ठिवर्य, अस्मिन् बालशिक्षाकेन्द्रे त्रिचतुः पञ्चहायनाः बहवोऽर्भका अधीयन्ते । शावकानां स्व-स्वगृहेभ्य आनेतुन्तथा पुनः गृहाणि प्रापयितुं मरूत्तराणां प्रबन्धो विहितोऽस्ति । शिक्षामन्दिरे बह्व्यः परिचारिकाः सन्ति, समये-समये तान् पयः फलोदकानि पाययन्ति । क्रीडनार्थं बहूविधानि विपुलानि क्रीड-नकानि विद्यन्ते, तैरेव लिपेः ज्ञानं कार्यते, शिशूनामत्र स्वल्पमपि कष्टन्नभवति । श्रीमन्तो निरीक्षतामत्रत्यां व्यवस्थाम्, यदि भवद्भ्यो रोचेत तदा स्वकीयं शिशु सहर्षं प्रेषयन्तु । अथ प्रधानः श्रेष्ठिवर्यं तत्रत्यां सर्वामपि व्यवस्थामदर्शयत्, स च तयाऽतितरां प्रमुदितः । श्रेष्ठीवर्यः स्वहर्म्यमागत्य शशिप्रभामजल्पत्—प्रियतमे, अत्रैकं बालविद्याम-न्दिरं वर्तते, तस्य व्यवस्थाऽद्य मया सम्यगवलोकिता, यदि भवत्यै रोचेत तदाऽवयोः रविरपि तत्र गत्वा पठेत् । तंत्र हि बह्व्यः परिचारिकाः सन्ति, आयामविस्तारवन्तो बहवः चतुः शालाः सन्ति, प्रापणार्थं मरूत्तराणि सन्ति, क्रीडनकान्यपि बहूनि सन्ति, अर्भकाणां सुविधायै श्रेष्ठः प्रबन्धो वर्तते ।

शशिप्रभा—तत्र चेच्छोभना व्यवस्था वर्तते तदाऽवश्यमेव प्रेषणीयः शिशू रविः ।

अथ कृतनिश्चयौ तौ दम्पती शुभे मुहूर्ते रविं राजकीयबालशिक्षामन्दिरं सम्प्रेषयितुमारभताम् । रविः सन्तुष्टः सन् प्रत्यहं बालशिक्षामन्दिरं प्रातः अयात्, मध्यान्हे च प्रत्ययात्, इत्थं वर्ष-द्वयं व्यतीतम् । एतावति समये सामान्येनाक्षरलेखनाध्ययने सम्यगधिगते । रविः प्रकृत्या कुशाग्रमतिरस्ति, स चैकदा यत् किमपि पश्यति, अधीते, लिखति वा तत्पुनर्नविस्मरति । अध्ययनेऽपि तस्य महत्युत्कण्ठा विद्यते । पञ्चहायनावस्थात एवं स सूर्योदयात् प्रागेव शयनं विहाय, शौचं विधाय च पितरौ प्रणमति । ततस्तैलाम्यङ्गोद्वर्तनानि कृत्वा स्नाति, भूयश्च पवित्राणि वसनानि परिधायाऽधीतुं सज्जो भवति ।

बालशिक्षाकेन्द्रस्य शिक्षासमाप्त्यनन्तरं स राजकीयप्राथमिकशालायामध्ययनाय प्रवेशितस्तत्रापि स्वाभितयाधिया अध्यापकाः यत् किमपि अध्यापयन्ति तद् सम्यक्तया अभ्यस्यति । वर्षद्वयं यावद् प्राथमिकशालायामधीत्य तत्रत्यमध्ययनं समापितम् । अधुना तस्य वयः दशवर्षात्मकं सञ्जातम् ।

अथैकस्मिन् दिवसे पुरोधाः श्रेष्ठिनमुपेत्यागदत्—शिशुरयमधुना दशवर्षवयस्कः संजातोऽतोऽस्य यज्ञोपवितसंस्कारो विधेयः । श्रेष्ठि अभाषत—यज्ञोपवितसंस्कारस्य मुहूर्तं पश्यतु भवान् । शुभे मुहूर्ते संस्कारोऽयमवश्यमेव करणीयः । विना यज्ञोपवितं द्विजसंज्ञैव न भवति । ततः पुरोधाः मुहूर्तो निरीक्षितः ।

चैत्रशुक्ला पूर्णिमा तिथिः । अद्यैव रवेः यज्ञोपवितसंस्कारस्य मुहूर्तः, भूसुराः वेदमन्त्रैः स्त्रियञ्च माङ्गलिकगीतिकाभिः हर्म्यमशोभयन् । अथ उचिते समये विहितमुंडनस्नानम् विधृतपीताधावसनम् परिहितपीतचौलकञ्च रविं वरासने समुपवेश्य गणपति नवग्रहादिपूजनपूर्वकं पुरोधाः कर्णे गायत्रीमन्त्रं श्रावयित्वा यज्ञोपवितेन समलङ्कृतवान् । अद्य रवेश्चेतसि काऽऽपि अपूर्वामुद्विद्यते, सचासनादुत्थाय सर्वान् प्राणमत् । पुरोधसा च तस्मै बहुविद्याशिक्षा दत्ता, ताश्च सर्वा प्रतिज्ञाय स तमपि प्राणुवत् । श्रेष्ठिनाऽस्मिन्नवसरे याचकेभ्यो बहुविद्यमन्नं वसनानि च दत्तानि। भुसूरवर्येभ्यो कानकराजतमुद्राः वसनानि च प्रदाय ते प्राज्यं सत्कृताः । पुरोधा अपि प्राज्यं सत्कृतः ।

अथ यज्ञोपवितग्रहणानन्तरम् रवि- प्रत्यहं प्रातः सायम् सन्ध्याम् गायत्रीमन्त्रमपि जपति तेन तस्य मतिरधिकां तिग्मतामभजत् । प्राथमिकशालायाः शिक्षा

समाप्त्यनन्तरं रविरूच्चप्राथमिकशालायाम् प्रवेशितस्तत्रत्यमपि अध्ययनम् वर्षत्रयं यावदधीत्य समापितम् । ततश्च सोऽग्रेऽध्ययनार्थं माध्यमिकशालायाम् प्रवेशितः ।

रविर्यदा माध्यमिकशालायाम् प्रविष्टस्तदा तस्य वयसश्चतुर्दशो वर्षः प्रारब्धोऽभूत् । तस्य वेशभूषा भारतीया वर्तते न तु आङ्ग्लदेशीया । स सर्वदा कटितटे अधोवस्त्रं (धोती) पर्यधात् गात्रे ग्रीष्मे तूलसूत्र (खादी) निर्मितं चोलकम्। शीतकालेचोर्णसूत्रनिर्मितं पर्यावरकं (कोटि) शिरसि ऋत्वनुसारमुष्णीषं दधाति । मुखे श्मश्रूप्रादुर्भावो न, शिरसि नातिदीर्घाः कचाः, तांश्च प्रत्यहन्तैलेन निषिञ्चति । शिरसि शिरसि तैलेन सेचनम् स्वास्थ्यप्रदम्, यतो हि शिरः सर्वेषामिन्द्रियाणामधिष्ठानम् "प्राणाः प्राणभृतां यत्रश्रिताः सर्वेन्द्रियाणि च । यदुत्तमाङ्गभङ्गानां शिरस्तदभिधीयते" इति हि चरकाचार्य अतः इन्द्रियाणां बलाधानार्थं शिरसितैलाभ्यङ्गो लाभप्रदः ।

माध्यमिकशालायामध्ययनार्थमिमे विषयाः गृहीताः । हिन्दी, गणितम्, समाजशास्त्रम्, सामान्यविज्ञानम्, आङ्ग्लभाषा, वाणिज्यञ्चेति । स च स्वकीयाञ्चर्यामित्थान्निर्मितवान् । ब्राह्मणमुहूर्तात्प्रागेव चतुःवादनवेलायाम् निद्रां विहाय पाठ्यग्रन्थान ध्यगीष्ट । सूर्योदयात् पूर्वमेव आवश्यककृतेभ्यो निवृत्तःसन् लघुव्यायाममभ्यङ्गश्च कृत्वा स्नाति, ततश्च सन्ध्यावन्दनपूर्वकगायत्रीमन्त्रस्य जपम्, अनन्तरं दुग्धपानम् पुनश्च सार्धनववादनसमये अशनमशित्वा सार्धदशवादनसमये शालागमनम् ।

रविरमितमतिमानस्ति अतः अध्यापकाः ईदृशं छात्रं प्राप्यमनःसु परमसन्तुष्टाः सन्ति. सहाध्यायिनश्च बुद्धिमन्तं सहपाठिनं प्राप्य भृशमहृष्यन् । स च स्वगुरुभिः सहाध्यायिभिश्च समं परमस्नेहेनव्यवहरत् । इत्थं व्यवहारतस्तस्याध्ययनप्रक्रिया प्राचलत् ।

स यथाऽध्ययने पटुस्तथैवकन्दुकक्रीडादिषु पटुरस्ति । सायं शालाया अवकाशानन्तरं प्रत्यहं करकन्दुकेन (वालीवाल) अक्रीडत् । प्रत्यहं करकन्दुकक्रीडनेन स तत्राऽत्यर्थं पाटवमध्यगच्छत् ।

अथैकस्मिन् दिवसे रविशालायाश्छात्राणामन्यशालेभ्य छात्रैः सह क्रीडाप्रतियोगिताऽभूत् । तत्र रविरपि भागमगृह्णात् । स क्रीडायाम् परमप्रवीण आसीत् ।

अथ निश्चितसमये क्रीडाप्रतियोगिता प्रारब्धाऽभूत् । तां द्रष्टुञ्छात्रा अध्यापका नगरवासिनोऽन्ये च मानवाः समायन् । ते सर्वेऽपि रवेः क्रीडापाटवमभिवीक्ष्य चेतःसु

अत्यर्थं प्रमुदिता अभूवन् । मध्ये-मध्ये करतलध्वनिभिः हर्षध्वनिभिः हर्षध्वनिभिश्च तस्योत्साहं समवर्धयन् । होरां यावत्क्रीडाप्रतियोगिता प्रचलिता । रवेः पाटवेन तथाऽन्येषां सहपाठिसहयोगिनां सहायेन रवेः मण्डली विजयं प्राप्त् । ततश्च सर्वेऽपि रविसहपाठिनस्तथाऽन्ये जनाश्च चेतःसु भृशं प्रहृष्टाः अभवन् ।

अथ पूर्वोक्तचर्यामनुसरन् स माध्यमिकशालायाम् वर्षद्वयं यावदधीत्य प्रवेशिका (मैट्रिक) परीक्षां सर्वोत्तमा सन् समुदतरत् । अधुना तस्य वयः पञ्चदशवर्षात्मकं सञ्जातम् ।

अथाऽग्रेऽध्ययनार्थं रविमेकस्मिन् राजकीयवाणिज्यमहाविद्यालये (राजकीय कामर्स कालेज) प्रवेशितवान् । तत्राऽपि रविः पूर्ववत् प्राध्यापकानां सहाध्यायिपनाञ्च परमस्नेहभाजनो जातः । अध्ययनेन सममेव महाविद्यालये प्रतिसप्ताहं भाषणम्, प्रत्यहं कन्दुकादिभिः क्रीडनम्, तथाऽन्योऽपि कार्यक्रमः प्राचलत् ।

इत्थमध्ययने रतस्य रवेश्चर्या प्रचलति । अथैकस्मिन् दिवसे रवेः महाविद्यालयस्य छात्राणामन्यमहाविद्यालयछात्राणाञ्च परस्परं भाषणप्रतियोगिताया आयोजनमभवत् । भाषणप्रतियोगिता प्रारब्धाऽभूत् । प्रतियोगितायाः विषयः "छात्रैः राजनीत्यां भागो गृहीतव्यो न वा" इत्यस्ति । तत्र रवेः पक्षः "छात्रैः राजनीत्यां भागो न गृहीतव्यः" इत्यासीत् । अथ प्रचलिते भाषणक्रमे यदा रवेः वादी समायाता तदा रविरुत्थाय स्वभाषणं प्रारब्धवान् ।

भाषणस्य श्रवणार्थं प्राध्यापकाः, अध्यापकाः, छात्रास्तथाऽन्ये पुरवासिनो मनुनाश्चापि समागच्छन् । मध्ये-मध्ये करतलध्वनिभिः हर्षध्वनिभिश्च तस्योत्साहं वर्धितवन्तः ।

रविरपि प्रमाणयुक्तिपुरःसरं स्वकीयं पक्षं सम्यग् रूपेण स्थापितवान् । विपक्षिण सर्वाअपि युक्तयश्छेदिताः । अन्ते च विजयो रविणा लब्धः ।

इत्थं विविधकार्यक्रमेषु भागं गृह्णन् रविश्चतुर्भिर्वर्षैः वाणिज्यशास्त्री (वी.काम्) परीक्षां प्रथमश्रेण्यां सर्वप्रथमः सन् समुदतरत् ।

अथ वाणिज्यशास्त्रिपरीक्षोत्तरणानन्तरम् रविः स्वजनकमब्रवीत्—पितृचरणा !!! अहमग्रेऽध्येष्टे, एतदर्थं श्रीमतां निदेशं गृहीतुकामोऽस्मि, आशासे मह्यमग्रेऽध्ययनार्थं स्वकीयामनुमतिं दास्यन्ति । श्रेष्ठिना प्रोक्तम्—पुत्र ! तवाऽग्रेऽध्ययनस्य

वाञ्छा वर्तते चेत्तदा त्वमधीस्व । स्वजनकस्य आदेशं प्राप्य रविः स्वमानसे भृशमतुष्यत्, एकस्मिन् स्नातकोत्तरवाणिज्यमहाविद्यालये (पी. जी. कामर्स कालेज) वर्षद्वयं यावदधीत्य वाणिज्यविषये विशिष्टयोग्यतापुरःसरं "मास्टर आफ कामर्स" इति परीक्षाम् समुदतरत् ।

आदित एव सुरसरस्वतीवाचं स्वकीये हर्म्ये एवैकोऽध्यापकस्तमध्यापयत् । श्रेष्ठिनो विचार आसीदयं बालकः आधुनिकविषयैः सह गीर्वाणवाणीमपि पठेत् । संस्कृतज्ञानमन्तरा मानवो मानवो न भवति । भारतीयसंस्कृतेः ज्ञानमपि न स्याद् विनाऽमरवाचा । सदाचारशिक्षाऽपि अनयैव प्राप्तुं शक्यते । सत्यं वद, धर्मञ्चर, मातृदेवोभव, पितृदेवोभव, गुरून् प्रणमेदित्यादयो महोपदेश अस्यामेव सन्ति । रवेः शेमुष्याम् तिग्मता वर्ततेऽतः सो आधुनिकविषयैः सह सुरवाच्यपि प्रौढतामध्यगच्छत् । स देवगिरः गद्यपद्ययोरभिप्रायं सम्यक्तया ज्ञातुं प्राभवत् । स सुरवाचा भाषितुमपि अशक्नोत् । स यादृशीमाङ्ग्लीं लिपिं क्लिष्टाममन्यत न तथा देवभाषाम् । यतो हि सुरगीरस्मद्देशीया, अस्याः संस्काराः परम्परया अत्रत्येषु विद्यन्ते । न चापि विबुधभाषा क्लिष्टा वर्तते, केचनेमां महतीं कठिनां प्रतिपादयन्ति किन्तु नैषा क्लिष्टा । अस्माकंदेशो दीर्घसमयं यावत् पराधीनतामभजत् तदा तत्कालिकैः शासकैरस्याः समूलनाशार्थं उदघोषि यत् संस्कृतभाषा कठिना, अस्माकं लिपिश्च सरला । भारतीयाः बराकाः किं कुर्युस्ते शासनाद् भीताः सन्तः स्वकीयां भाषां, वेशं संस्कृतिञ्चापहाय विदेशीयभाषा वेशसंस्कृतीनां समाराधकाः सञ्जाताः । यद्येषाक्लिष्टा भवेन्नाम तदा भोजराजसमये कथमियं सर्वसाधारणजनभाषा संजाता, तस्मिन् काले दारुवाहकस्यापि उक्तिरियम्— "भारन्नबाधते राजन् ! यथा बाधति बाधते" कथयति यन्नेयं क्लिष्टा किन्तु स्वार्थान्धीभूतैः विदेशीयैरस्यास्तथाविधः प्रचारः कृतः । पुनश्च विदेशीयसंस्कारसंस्कृताः केचन भारतीयविद्वांसोऽपि एनां क्लिष्टामकथयन्, परन्नेतदवितथम् । भारतस्य, नहि नहि संसारस्यामूल्यो निधिरस्यां भाषायां सुरक्षितोनिहितोऽस्ति । वेदाः, पुराणानि, उपनिषदः, नीतिशास्त्रधर्मशास्त्राणि अस्यामेव रचितानि सन्ति, यैरद्यापि सर्वाभूः प्रकाशमेति । विश्वप्रसिद्धमहात्म्या श्रीमद्भगवद्गीता अस्यामेव भाषायाम् निबद्धा वर्तते । अस्माकं संस्कृतेः मूलभूते रामायणम् महाभारतञ्चास्यामेव लिखिते वर्तेते । किञ्च, विश्वजनतारोग्यसम्पादकमायुर्वेदशास्त्रम्, खगोलविद्यारहस्यजनकं ज्योतिःशास्त्रञ्चास्यामेव रचिते स्वः । किं बहुना, "वसुधैव कुटुम्बकम्" इति भावनामियमेव शिक्षयति ।

केचनाधुनिकशिक्षादीक्षिताः महानुभावाः कथयन्ति यत् संस्कृतज्ञाः मानवाः व्यवहारशून्या भवन्ति, परमेते वराका न जानन्ति किं नीतिशास्त्रविशारदो महांश्चाणक्यः अस्या भाषायाः बलेनैव शासनान् नन्दनृपं न्यपातयत् । किञ्चाचार्यविष्णुशर्मविरचितपञ्चतन्त्रस्याध्येता जनः किं व्यवहारशून्यो भवति ?

पुरा क्षत्रियाणां शासनसमये इयं समृद्धा आसीत्, यतोहि त इमाम् ररक्षुः । किञ्च, इयमेव सर्वासां भाषाणां जननिरित्याधुनिकरागद्वेषशून्यविदुषाम् मतम् ।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।।

इति हि भारतीयसंस्कृतेः मूलमस्ति । किञ्च शासनं यां भाषामधिकां मन्यते सैवोन्नतिपदमधितिष्ठति । एकविंशतिवर्षेभ्यः प्राग् यावदस्माकं देशः पराधीन आसीत्, अधुना स्वातन्त्र्यमभजत् । शनैः-शनैरियमपि स्वाभिलषितं पदमधिगमिष्यति । उत्थानपतेन प्रकृतेरपरिहार्ये । सम्प्रति अस्या अपि शोभनाः दिवसा समायाताः । देशे कांग्रेसस्य शासनं देवगिरमभिलषति । अस्या उन्नत्यै प्रयतते । अङ्ग्लशालास्वपि विबुधभारतीशिक्षा अनिवार्या कृता । आशास्महे, अवश्यमेवेयं स्वकीयं पदं प्राप्स्यति ।

रवेः विशिष्टां सफलतान्निशम्य तस्य निखिला अध्यापकाः, प्राध्यापकाः, मित्राणि, सहाध्यायिनश्च परमां मुदमापन्नः तमभ्यनन्दत । रवेः पित्रोः प्रसन्नता तु पूर्णविधुं समवलोक्य समुद्र इव हृदि न समयात् । अद्य सर्वत्र प्रमोदस्य वातावरणः ।

रविः, शशिप्रभा, श्रेष्ठी, तदनुयायिवर्गश्च भृशं प्रसन्नाः सन्तः अभिनन्दयितुं समागतान् मित्रबान्धवाध्यापकादीन् मधुरान्नप्राशनताम्बूलादिभिः सदकुर्वन् ।

वाणिज्ये स्नातकोत्तरपरीक्षायाम् (एम्.काम्) अधिगतसर्वप्रथमपदस्थ रविप्रकाशस्य कीर्तिततिः समीरणा इव सर्वत्र प्रासरत् । अनेके कन्यापितरः श्रेष्ठिनो कृपासागरस्याभ्यर्णमुपेत्य व्याहरन्—श्रेष्ठि महोदय ! भवतान्तनुजनुषा रविणा सह मम तनुजनुष्या परिणयो विधेयः । ममात्मजा गृहकार्येषु पट्वी अधीतविद्या चास्ति । श्रेष्ठी उदतरत्—भवद्भिः यत् प्रजल्पितन्तत् सर्वथोचितं खलु, परं हि साम्प्रतमेवाऽहं रवेः परिणयन्नकर्तुं वाञ्छामि । मदीयो विचारोऽस्ति यदिमम् वाणिजस्य विशिष्टा शिक्षामधिगन्तुं विदेशं प्रेषयेयम् । श्रेष्ठिनो वाचमाकर्ण्य ते सर्वेऽपि भग्नमनोरथाः सन्तः विमनस एव स्व-स्वनिलयं प्रत्यगच्छन् ।

अथैकदा श्रेष्ठी स्वजायां समभाषत—प्रियतमे, आवयोः रविः वाणिज्ये स्नातकोत्तरपदवीं प्रापत्, अनेन प्रतिशतं नवतिरङ्काः लब्धाः, विश्वविद्यालये न केनापि परीक्षार्थिना इयन्तोऽङ्काः प्राप्ताः, ये चापि प्रथमश्रेण्यां समुत्तीर्णास्तैरपि प्रतिशतम् षष्ठिः, पञ्चषष्ठिः, अष्टो षष्ठिः, अधिकाधिकं सप्ततिरङ्काः लब्धाः। अस्य वाणिज्ये महती रुचिः विद्यते, सुखाचमपि सम्यक्तया भाषितुं लेखितुञ्च शक्नोत्ययम्। आवयोः वस्त्रोद्योगसंस्थानं (कॉटन मिल) वर्तते, तत्र न सम्यक् प्रवन्धोऽस्ति, तदभावेन उचितलाभोऽपि न भवति, अतो मदीया वाञ्छा वर्तते यदिमं विदेशे वाणिज्यस्य विशिष्टां शिक्षां प्राप्तुं प्रेषयावः। अत्र भवत्याः किमभिमतम्। अथ शशिप्रभा स्वप्रियतममुखात् रवेः विदेशप्रेषणगिरमाकर्ण्य मनसि भृशमदूयत। स्वात्मनि चिन्तितवती च—अस्यां प्रौढावस्थायाम् सुताननकमलं दृष्टिगोचरमभूत्। अधुना पतिमहोदय एनमन्यत्रप्रेषयितुं सज्जोऽस्ति। अथैवं विचिन्त्य सा भर्तारमब्रवीत् "स्वामिन्! अस्मिन् विषये मां मा प्राक्षीः, यतः प्रसवित्रीहृदयमतिपेलवं भवति सन्ततीः प्रति।" भवता यन्निश्चितन्तद् रवेरभ्युदयार्थमेव। सर्वे जनकाः स्वसन्ततीनामभ्युदयमेव कामयन्ते, तदर्थं वहुप्रयतन्तेऽपि। ममेच्छातु भिन्नैवास्ति। अहं कामये, शीघ्रमेव वधूमुखकुमुदं पश्येयम्। स्वप्रेयस्या भारतीमुपश्रुत्य श्रेष्ठी अब्रूत—भद्रे! त्वया यदुक्तन्तन्मुधा न। अहन्तवापि सहमतिं जिघृक्षामि, यतः सन्ततौ द्वयोरेव समानाधिकारः, नहि नहि मया इत्थं वाच्यम, यज्जनन्या एव विशिष्टाधिकारो भवति सन्ततौ, यतो माता यादृशि कष्टानि अनुभवति न तादृशि पिता। अस्मिन् विषये नाधिकं विविक्षुः भवती जानात्येव, मानसे मा चिन्तां विधेहि। विदेशे केवलमेकं हायनं यावत् वसतिर्भविष्यति, ततः प्राप्ते प्रशिक्षणे तवान्तिके प्रत्यागमिष्यति त्वदीयो रविः। जानेऽहं मातृहृदयं नाभिलषति स्वसन्तते दूरगमनम्, परं हि गुणप्राप्तये स्वीकृतिः देयैव भवत्या, किञ्च, तत्र गत्वाऽयं तत्रत्यजनानां सम्पर्केण विशिष्टं ज्ञानमर्जयिष्यति। "देशाटनं पण्डितमित्रता" चेति नीतिवाक्येनाऽस्य बुद्धिः समेधिष्यतं। प्रत्यागते चास्य परिणयं विधास्यावः। शशिप्रभा भर्तृगिरं निशम्य पुत्रवात्सल्यतया वक्तुमसमर्थाऽपि मुखकमलसंकेतेन स्वीकृतिमदात्। श्रेष्ठी स्वजायास्वीकृतिमाप्य परां मुदमापन्नो रविमाहूय प्रावोचत्—पुत्र रवे! अहं वाञ्छामि यत्त्वं विदेशङ्गत्वा वाणिज्यस्य विशिष्टां शिक्षां प्राप्नुहि। स्वपितुःवचनं श्रुत्वा रविणाऽवोचि—"श्रीमतामाज्ञा शिरोधार्या। श्रेष्ठी रवेरभिलाषमपि ज्ञात्वा एकस्मिन् दिवसे स्वपुरोधसमाहूय समभाषत—"भूसुरशिरोमणे! भवतोऽयं रविः वाणिज्यस्य विशिष्टां शिक्षार्जयितुं विदेशमेतुं कामयतेऽतः श्रेष्ठो मुहूर्तो निरीक्षणीयोऽत्रभवता भवता। पुरोधसोक्तम्—"आश्विनशुक्लादशमी (विजयादशमी) दिवसः श्रेष्ठतमोऽतस्तस्मिन्

दिवसे रवेः यात्रा शुभावहा। पुरोधसो मुखान् मुहूर्तदिनं निशम्य श्रेष्ठिना सर्वा व्यवस्था तथा विहिता।

अद्य आश्विनशुक्ला दशमीतिथिः, इयमेव मुहूर्तवेला। अधुना वृष्टिः स्थविष्ठं प्राप्तवती, नभोनिर्मलम्, पन्थानश्च विशुष्कपङ्कजलाः, अतो गमनागमनयोः सौकर्य्यं जातम्। शीतलमन्दसुगन्धमरुद् वाति। रविः प्रातरेव विहितस्नानविधृतवसनश्च मनसि भृशं मोदते। जननिश्च यात्रासमये तस्मै पाथेयं दातुं व्यवस्थापयति।

अथ यात्रासमये रविः मातुश्चरणनीरजयोः प्रणतिं विधाय स्वीकृतिं याचते। सा च वाष्पावरुद्धगलविवरा किमपि वक्तुमसमर्था अपि स्वकरकमलाभ्यां तं स्पृष्ट्वा मनस्येवाशीः दत्त्वा संकेतेनैव गन्तुमाज्ञापयत्। स च दिव्यास्त्रलाभाय तपस्तप्तुमर्जुन इव विदेशं गन्तुं वाष्पयानविश्रामस्थानं प्रापत्। तमनु श्रेष्ठी, तदनुयायिवर्गश्चापि अगच्छन्। वाष्पयानागमने स्वल्पो विलम्वोऽस्ति, अतो जनकेन रविरवोचि—"पुत्र! यथा त्वयाऽत्र शिक्षायाम् सफल्यमधिगतम् तथा विदेशेऽपि सफलतार्थं प्रयतनीयम्। अभिलषाम्यहं यत्त्वं स्वविषये सर्वातिशायी भवेरनयैवभावनया प्रेरितोऽहं त्वां विदेशं प्रेषयामि नोचेदस्यामवस्थायाम् त्वां प्राप्य पुत्रवात्सल्यतया कथं सुदूरं प्रेपयेयम्। परमुन्नतिविरोधि यद्वात्सल्यं तन्नवास्तविकम् वात्सल्यम्। त्वं विशिष्टगुणान् प्राप्य संसारे समधिकमभ्युदयमुपेया इति कामनया तव वियोगं सहिष्ये। आशासे, जीवनस्यामूल्यं समयं मुधैव न हाययिष्यसि। एवमुपदिशतः श्रेष्ठिनः सुदूरादेव वाष्पयानागमन सूचकं धूमनिचयं दृष्टिपथमयात्। अथ क्षणेनैव वाष्पयानं स्वविश्रामस्थानं प्रापत्। अथ रविरेकस्मिन् प्रथमकक्षावासे स्वाशनं निश्चित्य तत्रोपविष्टः। यावद् वाष्पयानं गन्तुमारभत तावत् श्रेष्ठी अपि तदुपकण्ठमुपाविशत्। रविणोक्तम्—पूज्य पितृदेव! भवन्तो मा चिन्तां कुर्वन्तु। सर्वथाऽहं भवतोराज्ञां पालयिष्यामि। अहमपि प्रौढावस्थामधिगतौ पितरौ हातुन्नेच्छामि किन्तु गुणप्राप्तये हठात् हातुमुद्यतोऽस्मि। पूज्यतमाजननिः वाच्या यन्मनसि न काऽपि चिन्ता विधेया। एकवर्षस्य समयः शीघ्रमेव व्यत्येष्यति। अहं मद्विषयकं वृत्तं समये-समये संसूचयिष्यामि। एवं ब्रुवतो रवेः वाष्पयानं गमनसूचकां प्रथमांध्वनिं (सीटी) प्राणदत्। अथ रविरवोचत्—पितः, अधुना वाष्पयानस्य गमनवेलाऽतिसन्निहिता, भवन्तः प्रतियान्तु इत्युक्त्वा रविः स्वपितृचरणकमलयोः प्रणिपतति। पिता च तं हस्ताभ्यामुत्थाप्य आशीर्दत्वा वाष्पयानकक्षतो वहिरगच्छत्। अथ वाष्पयानम् द्वितीयान्ततस्तृतीयां ध्वनिं विधाय गन्तुमारभत। श्रेष्ठी पुत्रवात्सल्यतया किञ्चिद् दूरं वाष्पयानेन सहाचलत् किन्तु यथा-यथाऽग्रेऽगच्छन्तथा तथा तेन स्वगतिस्तिग्मा विहिता। ततस्तद् विमुच्य श्रेष्ठी स्व-गृहमायात्।

रविः काञ्चनपुरत इन्द्रप्रस्थम् यावत् वाष्पयानेन यात्रामकरोत्। अथाऽग्रे आङ्ग्लधरा (इङ्गलेण्ड) गामिनं वायुयानमधिरुह्य नवभिः होराभिराङ्गलवसुधां प्रापत्।

अथाङ्गलवसुधान्तर्वर्ति लन्दनपुरींप्राप्य, यत्र भारतीयानामधिका वसतिस्तत्रैकमावासार्थं गृहं भाटकेन स्थिरीकृतम्। रविः लन्दनप्राप्तेरनन्तरं स्वपितरौ पत्रं लिखति।

श्रीशः पायात्

लन्दनपुरीतः
२१-१०-६८

श्रीमन्तौ तत्रभवन्तौ पितरौ !

चरणारविन्देषु रविः प्रणमति। अहमत्र सुखेन समागतवान्। मामकी चिन्ता न विधेया। मयाऽत्रावासार्थं गृहस्य व्यवस्थाऽपि विहिता। अहम् भवतोः ज्ञानार्थं मदीयं यात्रावृत्तं लिखामि। पत्रोत्तरं प्रदेयम्, वृत्तजातमखिलमपि लेखनीयम्।

यात्रावृत्तम् — यदा वाष्पयानमिन्द्रप्रस्थीयविश्रामस्थानमासाद्य अवरुद्धम्, तदाऽहन्तस्माद्वतीर्य ततो बहिरागतवान्। अथैकं मरुत्तरयानं भाटकेन संगृह्य पालमाख्यवायुयानविश्रामस्थानमागच्छम्। तत्र करगृहणाधिकारिणो मां सम्यक् परीक्षितवन्तः। यदा तैरहं विदेशगमनार्थमाज्ञप्तस्तदाऽहं समीरयानाभ्यर्णमागत्य तदवलोकितम्। तच्च बाह्यतो भीषणाकारमिव प्रत्यैत। यदाचाहन्तदन्तः प्राविशम् तदा तस्य लावण्यं समीक्ष्यान्तश्चेतसि महतीं मुदमन्वभवम्। तदन्तः सुरम्याणि समुपवेशनस्थानानि, सर्वत्र विद्युद् व्यजनानि, सर्वतश्च वातायनानि दृष्ट्वा प्रासीदम्। अहमेकमुपवेशनमुपाविशम्। क्रमशोऽन्ये यात्रिणश्च तेषु तेषु समुपवेशनस्थानेषु समुपाविशन्। यानमिदं चतुर्भ्यो गतियन्त्रेभ्यः (इञ्जन) युक्तमासीत्। गतियन्त्राणां सम्मुखे अष्टौ चालकाः (पायलेट) तथाऽन्ये तत्सहयोगिनः उपवेशनस्थानानि समुपाविशन्। यदा सर्वे यात्रिणः सम्यक्तया समुपाविशन् तदाऽनुचरेण तद्द्वारमुपानद्धम्। अथ चालकेन गमनात् प्राक् क्रिया सम्पादयितुमारब्धा। तया तुमुलनादः समुदभूत्। किञ्चित् क्षणानन्तरं विद्युत्संकेतेन कटिबन्धनार्थमादिष्टाः। यदा विमानं व्योम्नि समुड्डयते तदा यात्रिणां शारीरिकस्थितिः समीचीना भवेत्तदर्थं कटिबन्धनमावश्यकं भवेत्। यानस्य गमनवेला यथा-यथा सन्निहिता तथा-तथा गतियन्त्रस्य तुमुलनादोऽपि समैधत। अथ क्षणेनैव तद् यानं वसुमतिं विहाय विहायसि समुदडीयत।

मदा विमानमिन्द्रप्रस्थीयपालममिधवायुयानविश्रामस्थलतः समुड्डयिन्तदा क्षणदाया अष्टवादनवेला आसीत्। यानतो नगरस्य सुषमा रमणीया प्रत्यैत। चपला प्रदीपैः प्रकाशिता इन्द्रप्रस्थनगरी दीपावलिपर्वणीव अभासत। इत्थश्चिर-कालात् मनसि आङ्ग्लभूमिगमनस्य मदीया वाञ्छा अद्य पूर्णा जाता। अहम् स्वान्ते काञ्चिदपूर्वां तुष्टिं समन्वभवम्।

अथ किञ्चित् क्षणानन्तरं विमाने नियुक्ता सचायपात्रपिष्टक (बिस्कुट) करा परिचारिका यात्रिणोऽन्वरुणत्। ततश्चायं पीतेषु अशितेषु पिष्टकेषु च यात्रिषु विमानस्य यवनिकायां यात्रिणां मनोविनोदार्थंश्चित्रपटस्य प्रदर्शनं समारब्धम्। यवनिकायां केवलं चित्राण्येवादृश्यन्त चित्रस्थयात्राणां संलापानि श्रोतुं श्रवणयन्त्रस्या-वश्यकता भवति, तच्च पृथङ् मूल्येन गृहीतुं शक्यते। यो यो यात्री पात्रसंलापानि श्रोतुकामः स स मूल्येन श्रवणयन्त्राणि समग्रहीत्। अहमपि श्रवणयन्त्रमेकं समग्राहिषम्। तत्सहायेन चित्रपटस्थपात्राणां गीतादिकं निशम्य मानसे महतीं मुदं समन्वभवम्। भिन्नभाषाः यात्रिणो भिन्नासु भाषासु तदवबोधयितुमशक्यन्त इयं व्यवस्था विमाने विहिता आसीत्।

अन्तरा-अन्तरा यानचालककक्षात् यानस्य गतिः, समुद्रतलादुच्चता, कस्या-माशायाम्, कस्य देशस्योपरि गच्छतियानमिति भूयोभूयः समुद्घोष्यते स्म। यानान्तः समुपाविशन्नहं यानञ्चलतीति नान्वभवम् परतन्त् प्रतिहारो सार्धैकशतगव्यूतिगत्या गतिशीलमवर्तत।

चित्रपटप्रदर्शनान्तरं भोजनप्रक्रिया समारब्धा। भोजने बहुविधानि भोज्या-न्यासन्। तेषु कानिचित्तु अहं परिचेतुमपि नाशक्नवम् निरामिषस्य सामिषस्य द्विविधस्य भोजनस्य व्यवस्था विहिता आसीत्। यो यात्री यादृशमकांक्षत तस्य सूचना पूर्वं विधेया, तदनुसारमेव तस्य भोजनव्यवस्था अक्रियत।

भोजनानन्तरं शयनप्रक्रिया समारब्धा। तदर्थञ्च उपवेशनस्थानं लम्बायमानं कर्तुं शक्यते इति व्यवस्था आसीत्। मया तथैव विहितम्। ततश्च निद्रासुखमन्व-भवम्। इत्थं सततं सप्तहोरा यावत् समुड्डीयमानं रोमदेशधरां प्रापत्। तत्र यानं भूम्यामवातरत्। तत्र च यानार्थं तैलमिन्धनश्च गृहीतव्येऽतस्ते ह्यग्रहिष्यान्। अस्मा-दधिष्ठानात् आङ्गलवसुधायाः प्राप्तिः होराद्वयगत्यात्मिकाऽस्ति।

यदा यानं रोमदेशवसुन्धरां प्रापत्तदा भगवानम्बरमणिः समुदायत तदा सर्वे यात्रिणो निद्रामजहुः। अत्र कोऽपि यात्री यानाद्वहिर्गन्तुन्नाज्ञप्तः। उषा वेला

आसीत्तदाऽस्माकं सर्वेषां यात्रिणां मनःसरोजानि प्रस्फुटितान्यभवन्। अथाग्रे यानं कस्माच्चिदज्ञातकारणात् किञ्चिन्नीचैः प्राचलत् तस्मान्नीचैः स्थितानि सुरम्याणि दृश्यानि समवलोक्य सर्वेषामस्माकं मनांसि परां तुष्टिमभजन्।

यदा वयं हिमालंकृतकूटस्य अल्पस्य गिरेरुपरि प्रायाम तदा दिनमणि कर-निपातेन गिरेः या सुषमा सा वर्णनातीता। इत्थं दृश्यानि पश्यत्सु अस्मासु यानं फ्रांसदेशमतिक्रम्य ईङ्गलिशचैनलाभिधलघुसमुद्रोपरि समागमत्। यतो हि यानं किञ्चिन्नीचैः प्राचलदतः उदधौ चलन्ति जलयानानि स्पष्टमदृश्यन्त। अथ क्षणेनैव विमानं आङ्ग्लधरायाः सीम्नि प्राविशत्।

व्यतीतायां शर्वर्यामहम् अनुमतिं गृहीत्वा स्वल्पवेलाकृते चालकस्य कक्षायाम-यासिषम्, तत्र चालकोपचालके व्योम वागधिकारी (रेडियो इञ्जीनियर) समुपाविशन्। ते सर्वे सरलप्रकृतय आसन्। किञ्च, मम प्रश्नानामुत्तराणि सम्यक्तयाऽददन्। मया पृष्टम्—यद् विमानं व्योम्नि अत्युच्चै किमिति चलति? तैरुत्तरितम्—यदुच्चैः चलने द्वे सुविधे वर्तेते। वायोरुच्छालनात् यानस्य गतिस्तिग्मा भवति। किञ्चेन्धनस्य व्ययोऽपि स्वल्पो भवति।

समीरे यावन्तो विकाराः—यथा—तिग्मगत्या वायोः प्रचलनम्, पयोमुचां प्रधावनम्, खगानामुड्डयनश्च सीमितोच्चैः यावद्भवति। अस्मादुपरि यानस्य चलनेन एतस्य सुरक्षा भवति। तैरेतदपि विज्ञापितम् यत् प्रत्येकस्मै देशाय वायुयानानामुड्डु-यनार्थं निश्चितोच्चता प्रदीयते। अस्याः यथार्थताया अनुभवस्तदाऽभूत् यदायानं लन्दनपुर्याः स्थितिस्थाने (हवाई अड्डा) अवतरितुं प्रायतत। इत्थं क्रमशो वायुयानं नीचैरवातरत्। आङ्ग्ल धरायां क्वचदपि भारवाहिनो नराः (कुली इतिभाषायाम्) न सन्ति। यात्रिणः स्वकीयं भारं स्वयमेव वहन्ति अतोऽहमपि स्वसम्भारं गृहीत्वा यान स्थलाद् बहिरायाम्। यतो हि मम गन्तव्य-स्थानं दूरमासीत् तस्मादधिष्ठानाद-तोऽहं गन्तव्यस्थानमेतुभाय तिषि। अत्र यात्रिणां गमनागमनकृते बहु-विधानि साधनानि सन्ति। यथा—अधि क्षोणि वाष्पयानम्, मरुत्तर यानादयश्च।

समीरयानस्थितिस्थलतो वाष्पयानादीनां स्थितिस्थलानि किञ्चिद्दूरं विद्यन्ते-अतस्तत्र यातु यात्रिणां सौविध्याय विद्युद्यन्त्राणि सयोजितानि सन्ति तानि अत्र "स्केवीलेटर" इति नाम्ना व्यवह्रियन्ते। यात्रिण इमान्यधिरूह्य वाष्पयानादि स्थितिस्थलानि प्राप्नुवन्ति आयासमन्तरा। पदातिस्तु स्वल्पतमैव। अहम् पूर्वोक्तसाध-नेन अधिवसुधा वाष्पयानमधिरूह्य स्वगन्तव्यस्थानमगमम्।

अत्र क्वचिदपि पृच्छाया आवश्यकता नास्ति, यतो हि यत् किञ्चिदपि ज्ञातव्यमस्ति तदाखिलमाङ्ग्लभाषायाम् सर्वत्र लिखितमस्ति। अतो यः कोऽपि विदेशी अङ्ग्लभाषाविद्भवति स तदधीत्य स्वाभिलाषं पूरयति, न च किञ्चिदपि कष्टजातमनुभवति।

वायुयानस्थितिस्थानम् (हवाई अड्डा)

लन्दननगर्य्यामनिलयानस्थितिस्थानस्य नाम "हैरो" इति वर्तते। अधिष्ठानमिदमतिविस्तारायामसम्पन्नमस्ति। अत्र त्रीणि स्थितिस्थानानि सन्ति। तेषु द्वे श्रेष्ठतरे, तृतीयञ्च समान्यम्। श्रेष्ठतरे उभे ह्यपि विस्तृते रमणीये च स्तः। अत्र केवलममेरिकादेशात्तथाऽन्ययूरोपदेशेभ्यः समागतानि वायुयानान्येवावतरितुं शक्नुवन्ति। आर्यावर्तान्तिथा एशियामहाद्वीपादागतानि विमानानि तृतीये स्थितिस्थान एवावतरितुं शक्नुवन्ति तृतीयञ्च नातिरमणीयम्।

अत्रत्या यात्रिपरीक्षणप्रथाऽपि भिन्नेव। आर्यावर्तपाकस्थल (पाकिस्तान) वंगप्रदेशेभ्यः समागतानां यात्रिणां परीक्षणं सावधानतया विधीयते। किञ्च, यूरोप-अमेरिकादिदेशेभ्यः समागतानां यात्रिणां परीक्षणम् स्थालीपुलाकन्यायेन क्रियते। एतद्वैशिष्ट्यमस्ति यदत्रत्यानि निखिलान्यपि कृत्यजातानि सत्वरं सम्पाद्यन्ते, येन यात्रिणामधिको विलम्बो न भवेन्नाम।

भवतामात्मजः—रविः

अथ श्रेष्ठी विदेशगमनार्थं रविं सम्प्रेश्य यदा स्व भवनमागवतवांस्तदा सदनं शून्यमिवालोक्य मनसि भृशमव्यथत। वाष्पावरुद्धगलविवरा शशिप्रभा च किञ्चिदपि वक्तुमसमर्था विवत्सा धेनुरिव भृशं म्लानतामुपगता।

श्रेष्ठी स्वल्पां धृतिमवलम्ब्य न्यगदत्—प्रिये, मुधैव भवती शिशिराहता म्लानपुष्पा लतेव म्लानानना कथमवसीदति। तव रविराङ्ग्लधरामुपेत्य तत्रोत्कृष्टान् गुणान्संगृह्य एकशरदनन्तरमंत्र समागमिष्यति। मनः सरोजं मा मलिनं विदधातु। एकशरत्समयः शीघ्रमेव व्यतिगमिष्यति विदेशात् प्रतिनिवृत्ते सति तस्य परिणयं विधास्यावः। अतः प्रसीदतु भवती, चिन्तायै अवकाशो न देयः। चिन्तया वपुसि समीरो वर्धते, तद्वृध्या च तनौ बहवो विकाराः भवितुं शक्यन्ते।

शशिप्रभा—स्वामिन्, अहं जानामि यद् रविः विदेशं गुणप्राप्त्यै गतः एकशरदर्थम्। परं भवान् जानात्येव यन्मातृहृदयमतिपेलवं भवति। पेलवतयैव मामकीना ईदृशी स्थितिः संजाता। अतःपरमहं धृतिं धारयामि।

श्रेष्ठी प्रियागिरमाकर्ण्य मनसि प्रासीदत्, अब्रवीच्च प्रिये, अस्मिन् कलौ यादृशस्तनय आवयोर्विद्यते तादृशोऽन्यत्र दुलर्भ एव। आवयोरिदं कर्तव्यमस्ति यद् आवाम् धैर्यं धारयावः।

अद्य रवौ गते सप्ताहद्वयं व्यतीतम्। प्रातरेव शशिप्रभा श्रेष्ठी च शोचादिभ्यो निवृत्तौ एकत्र समुपविष्टौ रविमस्मरताम्। तदैव पत्रपापकः (पौंष्टमैन) आगत्य पत्रमेकं श्रेष्ठिनः कराब्जे समर्पितवान्। सचारं पत्रमुद्घाट्याधीतुमारभत। शशिप्रभया पृष्टम्—कस्येदं पत्रम्? कुतः समायातम्!

श्रेष्ठिनाऽवोचि—पत्रमिदं रवेः समायातम्।

शशिप्रभा—अपि कुशली वर्तते प्रियात्मजो रविः?

श्रेष्ठी—तवात्मजो रविस्तत्र कुशलीवर्तते, भवत्या न कापि चिन्ता विधेया। तुभ्यं प्रणमति रवि पत्रेण। अथात्मजस्य कुशलवृत्तमवगम्य शशिप्रभा भृशममोदत। तस्मादागतं पत्रमपि सुततुल्यमपश्यत्।

श्रेष्ठी पत्रपठनसमये शशिप्रभां कथयति यत् रविणा स्वकीये पत्रे स्वयात्रा-वृत्तमपि लिखितम्। यस्याध्ययनेन चेतो भृशं प्रसीदति।

प्रिय रवे!

तव पत्रमद्य प्राप्तम्। पत्रं विलोक्य स्वान्ते महती तुष्टिः समजायत। अत्रा-वाम् प्रसन्नौ स्वः, तवकुशलतां सर्वदा कामयावहे। त्वया यद् यात्रावृत्तं लिखितम् तदधीत्य चेतो मोदतेतराम्। अग्रिमे पत्रेऽपि लन्दनपुरी कीदृशी, किञ्च तत्र कानि-कानि दर्शनीयानि स्थानानि सन्ति, तत्र यत् किञ्चिदपि वैशिष्ट्यमस्ति तत्सर्वमपि लेखनीयम्। पत्रोत्तरम् त्वरितं प्रदेयम्, वृत्तजातमखिलमपि सूचनीयम्।

तव पितरौ

भारतम्

कृपासागरः, शशिप्रभा च

काञ्चनपुराद् गव्यूतित्रयमात्रमितं दूरं चन्दनपुराह्वयमेकमभिनवं नगरमस्ति, पुरमिदं विंशतिवर्षायुरस्ति। इदमपि नव वास्तुविद्यापटुतमैः कर्मिभिः विरचितमति-रमणीयमस्ति। प्रत्येकं भवनं भवनान्तरेणाव्यवहितन्तथा प्रतिभवनम् अग्रपृष्ठपार्श्वेषू-

पयुक्तमनावृतं भूखण्डं वर्तते, यत्र विविधवीरुधानि, शाद्वलानि, अनेकविधानि च पुष्पाणि तस्य शोभां समेधयन्ति हर्म्याण्यपि नातुन्नतानि सन्ति। राजमार्गाश्च यत्र विस्तारायामसम्पन्नाः परं पवित्राः। विद्युद्दीपतन्त्राणि, दूरभाषतन्त्राणि च अधिक्षोणि संलग्नानि सन्ति। हर्म्याणां राजपथानाञ्च प्रक्षालनं वारि त्वरितमेव सरकाधोनिर्मिताः नालीः प्रयाति, येन प्रतिक्षणं सर्वत्र स्वच्छतायाः साम्राज्यं वर्तते। विपण्योऽपि वस्त्रधान्यफलकाष्ठलौहादीनां पृथक्-पृथक् सन्ति, तत्रापि मलिनताया अभाव एव। वस्त्रोत्पादनादिकार्याधिष्ठानि (मिलइति भाषायाम्) नगराद् सुदूरं विद्यन्ते। गोमहिष्यादयश्च नगराद् वहिर्यत्र विततं भूखण्डं सूर्यातपसमीरसमायुक्तं वर्तते, तत्र निवसन्ति। गोपास्ताः प्रदुह्य ततः पयः नगरं प्रेषयन्ति। प्रायः प्रतिभवनमेकमुपवनं वर्तते। तत्र निवसन्तो मानवाः, महिलाः, शिशवोऽपि स्वच्छताप्रियाः अतस्तेऽवकरादिकामितस्ततो न प्रक्षिपन्ति। स्वच्छतायाः इयान् प्रबन्धो वर्तते यत् सर्वदैव तत्र सुगन्धिः समीरणो वाति। सर्वकाराज्ञया तन्नगरोपकण्ठे वाष्पयानगतियन्त्राणां (इन्जिन) गति निषिद्धा। चन्दनपुरीयं वाष्पयानविश्रामस्थानं विद्युद्गतियन्त्राण्येव शोभयन्ति।

शिशूनामध्ययनार्थं बालविद्यामन्दिरम्, क्रमशोऽग्रेऽध्ययनार्थं प्राथमिकी, माध्यमिकी, उच्चमाध्यमिकी, प्रवेशिकाकक्षाः यावदध्ययनार्थं बहवो विद्यालयाः सन्ति। उच्चशिक्षाध्ययनार्थमपि प्रबन्धो वर्तते। पत्रालयः (पोस्ट आफिस) न्यायालयः (कचहरी) पुस्तकालयाश्चापि सन्ति। सुरक्षायाः अपि विपुलः प्रबन्धो विद्यते अतश्चौर जनास्तत्र दृष्टीः निक्षेप्तुमपि न प्रभवन्ति। अस्मिन् पुरे माणिक्यचन्द्रनामा श्रेष्ठी निवसति। श्रेष्ठिनोऽस्य द्वे वस्त्रनिर्मातृशाले स्तः, विपुलानि रमणीयानि भवनानि सन्ति, येषां भाटक एव प्रतिमासं लक्षमुद्राः सन्ति। व्यवस्थापकादयः (मुनीम) भृत्यवर्गोऽपि प्रचुरो वर्तते। तस्य च श्रेष्ठिनस्त्रयोदशवर्षीया, गुणाढ्या, उत्तीर्णप्रवेशिका, (मैट्रिक) गृहकार्येषु पटुवी, चारुरुपा रमानाम्नी पुत्रिका वर्तते।

श्रेष्ठी प्रत्यहञ्चिन्तामग्नो वर्तते, निशि, दिवा च स इत्थमेव चिंतयति यत्कथन्नाम मम सुतायाः शोभनः सबन्धो भवेन्नाम। एवं प्रत्यहं चिन्तयति तस्मिन् तस्य प्रधानव्यवस्थापकेनागत्य समभाषि—स्वामिन् रमायाः विवाहसम्बन्धार्थे मुधैव भवान् चिन्तामग्नो वर्तते। इतोऽनतिदूरं वर्तमानं काञ्चनपुराह्वयमेकं पुरमस्ति, तत्रैकस्य श्रेष्ठिप्रवरस्य सुतो विद्यते, स च सर्वथा योग्यो वर्तते। अस्मिन् वर्षे स वाणिज्ये स्नातकपदवी (एम्. काम्.) परीक्षायाम् सर्वोत्तमः समुत्तीर्णः स सुशीलः, तरुणः, उत्साही, बुद्धिमांश्चास्ति। यदि श्रीमानभिलषेत्तदा काञ्चनपुरमुपेत्य श्रेष्ठिना सह

सम्बन्ध विषये वार्ता विधेया। निशम्य च प्रधानव्यवस्थापकस्य (मुनीम) वार्तां श्रेष्ठी न्यगदत्—अहमपि श्रुतवानस्मि यदास्मिन् वर्षे काञ्चनपुरीयः कश्चित् रविप्रकाश-नामा श्रेष्ठिसुतो वाणिज्ये स्नातक पदवीपरीक्षायाम् सर्वप्रथमः समुत्तीर्णोऽस्ति, परं स च वाणिज्ये विशिष्टां शिक्षामधिगन्तुं विदेशमयात्। व्यवस्थापकोऽ (मुनीम) ब्रवीत्—स विदेशं यातु, अस्माभिः वार्तालापस्तु तज्जनकेन श्रेष्ठिना सह कर्तव्योऽतो यदि रोचेत तदा काञ्चनपुरमवश्यमेव यातव्यम्। अथ द्वित्रदिनं यावत् श्रेष्ठी सम्यग् विचार्य काञ्चनपुरं गन्तुं मतिमकरोत्।

अथ रमायाः यौवनश्रीरनुदिनं वर्धमानास्ते। योषितान्तारुण्ये यादृशि चिन्हानि समुद्भवन्ति तानि निखिलान्यपि रमायाम् प्रादुरभूवन्। तस्या उन्नतं ललाटम्, सरला नातिनीचा नात्युन्नता मीनकेतनस्य द्विनाली शतघ्नीव नासावंशा, सरोजलीनालि-पंक्तिरिव शोभमाने पक्ष्मावलिभासिते नयननीरजे, गौर वर्णौ कपोलौ, अरञ्जितराग समन्वितावोष्ठौ, सुधापूरं निषिञ्चतीव मधुरागीः, नातिह्रस्वा, नातिदीर्घा, नाति-स्थूला, नातिकृशा ग्रीवा, लघुविल्वाकृती उरोजौ, गम्भीरनाभियुतमुदरम्, द्विपेन्द्रकर इवोरुयुगम् शोणितशोणिमनखौ।

अथ कर्णाकर्णि तस्याऽपि श्रुतम् यन्मम परिणयस्य वार्ता काञ्चनपुरीय श्रेष्ठिनस्तनयेन सह चलति। तया च पूर्वमेव रवेः गुणा आकर्णिताः, सा च तैर्मुग्धा स्वात्मनि रविमेव भाविनं पतिमकल्पयत्। तदर्थञ्च सा स्वमातुराज्ञया सगिरिजं गिरिशमभ्यर्चितुमारभत्। सा प्रत्यहं शिवयोरर्चनार्थं मन्दिरमगच्छत् पूजनान्तरं प्रार्थितवती—भगवान्नुमापते! मातः गौरि! ममोपरि कृपां विधताम्, अहं युवयोः सुता, तुल्या, अनन्यभक्त्या युवां पूजयामि। मम मनोरथं सफलीकुरुताम्। इत्थं रमा प्रत्यहं शिवयोरर्चनां विधाय प्रार्थनामन्वतिष्ठत्।

श्रेष्ठी माणिक्यचन्द्रः स्वव्यवस्थापकेन सह काञ्चनपुरमगच्छत्, तत्र श्रेष्ठिनः कृपासागरस्य भवनमुपेत्य तेन समं परिचयं विधाय स्वाभिप्रायं न्यवेदयत्—श्रेष्ठिवर्य्य! मया श्रुतम् यद्भवतस्तनयो रविनामास्ति, योऽस्मिन्स्ब्दे वाणिज्ये स्नातकपदवीं सर्व-प्रथमं समुत्तीर्य वाणिज्ये विशिष्टां शिक्षामधिगन्तुं विदेशमव्रजीत्।

मम गुणेषु, सौन्दर्य्ये च रमेव रमाभिधा त्रयोदशवर्षीया सुता विद्यते, साचा-धीत विद्या प्रवेशिका (मैट्रिक) परीक्षोत्तीर्णा गृहकार्येषु दक्षाऽस्ति। कामयेऽहं यदावयोः पुत्रपुत्र्योः परिणयसम्बन्धो भवेन्नाम! श्रेष्ठिमाणिक्यचन्द्राननात् स्वतनयस्य

विवाहसम्बन्धिवृत्तं निशम्य श्रेष्ठी कृपासागरः प्रत्यभाषत—श्रेष्ठिवर्य ! अधुना तु विदेशमयासीद् रविः, प्रतियाते विवाहसंस्कारस्त्ववश्यमेव करणीयोऽस्ति । श्रेष्ठि कृपासागरस्याभिप्रायं विदित्वा श्रेष्ठी माणिक्यचन्द्रोऽब्रवीत्—तर्हि मामाज्ञापयन्तु श्रीमन्तः, अतोऽहं निश्चिन्तो भवामि । श्रीमन्तः स्वीकुर्वन्तु सम्बन्धमेनम् । नगरसङ्गा अपि आवयोः पुत्रपुत्र्योर्विवाहसम्बन्धो नितरामुचितः ।

श्रेष्ठिना कृपासागरेणावोचि—यथा मह्यं रोचते तदहं वदामि, भूयश्च यथाभिलषितं विदधातु श्रीमान् । अहं भवतः सुतां प्रेक्षिष्ये, श्रीमांश्च प्रतियाते मम तनये तं पश्येत् यदि रुचिकरं भवेत्तदाऽयं सम्बन्धो नूनमेव भविष्यति ।

श्रेष्ठी माणिक्यचन्द्रः—"ममात्मजां सहर्षं निरीक्षताम् भवान् । स्वागतं भवताम् । यच्च श्रीमता पुत्रमवलोकयितुमाज्ञप्तोऽहं तद् विषये ममेदं निवेदनमस्ति यन्नाहं भवतस्तनयं परीक्षिष्ये । अहन्तु गुणान् गृह्णामि, न त्वहन्त्वचो रमणीयतां पश्यामि । स चास्मिन् वर्षे वाणिज्ये स्नातकपदवीं सर्वोत्तमत्वेनागृह्णात् इयमेव तस्य गुणानां परीक्षा पर्याप्ता, अतोऽहन्तु अद्यप्रभृति रविं जामातृरूपेण स्वीकरोमि । आशासे, मत्तनयाऽपि भवतः श्लाघ्या भविष्यति । अस्तु, मामाज्ञापयन्तु श्रीमन्तः कस्मिन्नहनि ममोटजमलङ्करिष्यन्ति ।

कृपासागरः—यद्दिनं भवान् श्रेष्ठं मन्येत तद्दिने एवाऽहमागमिष्यामि ।

माणिक्यचन्द्रः—अद्य गुरुवासरः, सूर्यवासर आगन्तव्यम् । तस्मिन् दिवसे विपणेरवकाशोऽपि ।

कृपासागरः—आम्, भवान् रवौ ममागमनं प्रतीक्षताम् ।

इत्थन्तौ परस्परं सम्मन्त्र्य श्रेष्ठी माणिक्यचन्द्रश्चन्दनपुरमभ्ययात् ।

अद्य रविः, श्रेष्ठी कृपासागरः प्रातरेवावश्यककृत्येभ्यो निवृत्य मरुत्तरचालकमादिशत्—भो चालक ! मरुत्तरं सज्जीकुरु, अद्य मया चन्दनपुरं यातव्यम् । अहो ! विस्मृतोऽस्मि, क्षणं तिष्ठ, यावदहं प्रियामपि पृच्छेयम्—अथ श्रेष्ठी शशिप्रभाया अभ्यर्णमुपेत्याब्रवीत्—प्रिये ! गुरौ चन्दनपुरवास्तव्यो माणिक्यचन्द्र श्रेष्ठी समायातस्तेनोक्तम् यन्मम सुतायाः विवाहसम्बन्धो भवदीयसूनुना सह विधेयः । मयोत्तरितम् साम्प्रतमत्र नास्ति रविः । ततस्तेनोक्तम्, भवान् मम सुतान्निरीक्षताम्, यद्युचितं मन्येत तदा स्वीकृतिर्दातव्या । अतस्तत्तनयानिरीक्षणार्थं रविवासरो निश्चितोऽद्याऽहं

चन्दनपुरं यियासुः, मया सह भवत्याऽपि यातव्यम् । स्वामिनो वाचमाकर्ण्य सा प्रत्युदतरत्—स्वामिन्, तत्र भवद्भिरेव गन्तव्यम् । श्रीमन्तो यत् किमपि विधास्यन्ति तदनुमंस्येऽहम् ।

अथ श्रेष्ठी मरूत्तरमारूह्य चन्दनपुरमभिप्रस्थितः ।

काञ्चनपुराच्चन्दनपुरन्नातिदूरमतः काञ्चिद्वेलामतिक्रम्य चन्दनपुरं दृष्टिपथमयात् । दूरत एव चन्दनपुरं समवलोक्य श्रेष्ठी कृपासागरश्चेतसि भृशममोदत न्यगदच्च—अहो ! रमणीयमिदन्नगरम्, अस्मिन् हर्म्याण्यपि अभिनवपरिपाट्या निर्मितानि धवलिम्ना हंसानप्यतिशेरते । राजमार्गाश्च विस्तृताः सन्ति, एषु मलिनतायाः स्वल्पोऽप्यंशो नास्ति, अत्रत्याः योषितः पुरुषाः शिशवश्चापि सुशिक्षिताः सन्ति ये इतस्ततो गमनवेलायाम् राजमार्गान्न मलिनयन्ति । प्रायोऽस्माकं देशनिवासिनो योषितो जनाः शावकाश्च राजपथेषु गच्छन्तः यत्र कुत्रापि निष्ठीवन्ति, क्व च नासामलं मुञ्चन्ति, कुत्रचिच्च ताम्बूलपीकमुत्सृजन्ति, परमत्रत्या न तथा विदधति । चारुता त्वन्यत्राऽपि समीक्षितुं शक्यते परं स्वच्छता यादृशी अत्र विद्यते तादृशी दुर्लभाऽन्यत्र । इत्थं पुरस्य सुषमां समवलोकयन् कृपासागरो माणिक्यचन्द्रस्य श्रेष्ठिनो हर्म्यं प्रापत् । श्रेष्ठी माणिक्यचन्द्रस्तु श्रेष्ठिन कृपासागरस्य स्वागतार्थं पूर्वमेव सज्ज आसीत् । काञ्चनपुरतः समागतं श्रेष्ठिनं कृपासागरं वीक्ष्य माणिक्यचन्द्रः स्वान्ते भृशममोदत प्रलुप्तवस्तुनो वस्तुप्राप्तिरिव ।

अथ विहितस्नानाशनः क्षणं विश्रम्य काञ्चनपुरीयः श्रेष्ठी माणिक्यचन्द्रम भाषत—श्रीमन् ! आकारय भवत्सुताम् । अथ प्राप्तनिदेशो माणिकचन्द्र आत्मजां रमामाह्वयत् । सामान्यवेशभूषाभूषिता रमा कयाचित् प्रौढयोषिता सह ह्रियानताननना श्रेष्ठिनः कृपासागरस्य सम्मुखं समुपस्थिता । ततो लब्धाज्ञा सा एकस्मिन् वरासने समुपविष्टा । अथ काञ्चनपुरीयः श्रेष्ठिमहोदयस्तामब्रवीत्—पुत्रिके ! तव नाम किमस्ति ?

रमा—पूज्य-तातचरणाः !!! मदीयन्नाम रमा वर्तते ।

श्रेष्ठी—अपि गृहीतविद्यासि त्वम् ?

रमा—आम्, अहमस्मिन्नेव शरदि प्रवेशिका (मैट्रिक) परीक्षां समुदतरम् ।

श्रेष्ठी—परीक्षायां के के विषयाः गृहीताः ?

रमा—हिन्दी, संस्कृतम्, गणितम्, इतिहासम्, आङ्ग्ललिपिश्च च तथा विशिष्ट विषयश्च गृहशास्त्रं गृहीतम् । गृहशास्त्रे भोजननिर्माणविधिः, वसनसीवनविधिः, गृहसम्बन्धिव्यवस्था कथं विधेया तथा शिशूनां पालनपोषणादिकञ्चेति । श्रीमद्भि-र्यदशनमाशित तन्मयैव विनिर्मितम् ।

श्रेष्ठी—किन्तद् अशनं त्वया विनिर्मितम् ।

रमा—आम् ।

श्रेष्ठी—लघीयसि वयसि तव भोजननिर्माणशैली चारुतरा । अद्याशितेऽशने या स्वादुता मयाऽधिगता सा न प्राप्ता अद्यावधि । किमेषा शैली विद्यामन्दिरेऽधिगता ?

रमा—तत्र तु सामान्येन भोजननिर्माणं शिक्षयन्ति अध्यापिकाः । मया तु मम मातुः गृहीता भोजननिर्माणस्य विशिष्टा शैली ।

श्रेष्ठी—परीक्ष्यविषयादतिरिक्तमन्यदपि किमपि अधीतम् ?

रमा—राष्टभाषायामनूदिते रामायण-महाभारतेऽधीते । रामायणमहाभारते अस्माकं संस्कृतेः निधी वर्तेते, तयोरध्ययनेन जीवने सफलतां लब्धुं शक्यते । तत्र धर्मस्य, नीतेः, लोकाचारस्य, अर्थोपार्जनस्य, मोक्षस्य च सरणिः सारल्येन वर्णिता ।

श्रेष्ठी—किमग्रेऽपि अध्येष्यसे ?

रमा—श्रीमन्तः !!! मदीयेच्छा अग्रेऽध्ययनस्य नास्ति, गृहस्थजीवनं निर्वोढुं यावदध्ययनमुचितं वर्तते तावन्मया अधिगतम् । मम स्वल्पमतौ योषितां कृते इयदेवाध्ययनमुचितं वर्तते, वनितानां कृते उच्चशिक्षाप्राप्तौ न किमपि लाभं मन्ये । यथा पुरुषा उच्चशिक्षाशिक्षिताः सन्तोऽग्रे स्वोदरपूर्त्यर्थं भृतिं विदधति तथोच्चशिक्षामाप्य महिला अपि भृतिमेव विदधीरन्, परं वनितानां कृते भृतिकृत्यन्नोचितम् ।

मान्यास्तातचरणाः !!! योषितां पुरुषाणाञ्च शरीररचनायामिश्वरेण प्रकृत्या वा महान् भेदो विहितो, भेदानुसारमेव कार्यपरिपाट्यामपि भेदः स्वाभाविकः । तत्र पुरुषाः धैर्य्यवन्तो बलवन्तः कठोरस्वभावाः, कठिनतरादपि कठिनं कार्यं कर्तुम् प्रभवन्ति । तद्विपरीताः स्त्रियश्च मृदुलप्रकृतयः, अधीराः, अबलाश्च सन्ति । पुरुषा यत् कार्यं कर्तुम् प्रभवन्ति । स्त्रियस्तत्कर्तुन्न प्रभवन्ति । स्त्रियश्च यत्कार्यं कर्तुं शक्नुवन्ति तत्पुरुषाः कर्तुन्न प्रभवन्ति । योषितो गर्भं दधति, प्रसवानन्तरञ्च शिशोः पालनपोषणे

विदधति। गृहस्य सर्वां अपि व्यवस्थां यादृशीं योषितः कर्तुं समर्थाः भवन्ति तादृशीं पुरुषाः कर्तुं न प्रभवन्ति। अतएव गृहलक्ष्मी, गृहदेवी, गृहिणी, इत्यभिधया व्यवह्रियन्ते ताः।

केचनाधुनिकशिक्षाशिक्षिताः मानवा इत्थं निगदन्ति यत् "सा वेला समतिक्रांता यस्यां स्त्रियो गृहदास्यो भूत्वा कालं यापयन्ति स्म, अधुना देशः स्वतन्त्रो जातोऽतः योषितोऽपि पुरुषैः सह साम्यं कामयितुमधिकृताः" परन्ते सज्जना इत्थन्नो विचारयन्ति यद् भारतीयसंस्कृतौ तु स्त्रियः मानवानामपेक्षया आदरणीयाः मन्यन्ते, यतोहि "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" इति।

योषितोऽपि उच्चशिक्षाशिक्षिताः स्युरत्र न कस्यचिद् विप्रतिपत्तिः। परमुच्चशिक्षां प्रदाय ताभिः सह कार्यालयान्युपेत्य भृतिकरणं नोचितम्। पुरापि वह्वो योषितः उच्चशिक्षामध्यगीषत, परन्ताभिराजीवनं परिणयो न कृतः।

वस्तुतः योषितां प्रधानं कर्तव्यमस्ति राष्ट्राय योग्यसन्ततिप्रदानं, तच्च स्वस्थमनोबुद्धिभ्यां सम्भवति, याः स्त्रियः विद्यालयेषु, महाविद्यालयेषु अध्यापनमन्यत्र यत्र क्वचिच्चान्यभृतिं कुर्वन्ति तासां मनोबुद्धयः स्वस्थाः भवितुमशक्यन्ते। किञ्च पूर्वं गृहकृत्यन्ततश्च भृतिकर्मकरणं भूयश्च यदा ता अन्तर्वत्नो भवन्ति तदा तासां शारीरिकी स्थितिर्विचित्रैव भवति। इत्थं त्रीण्यपि महान्ति कृत्यानि सन्ति, एषां त्रयाणामपि विधाने शारीरिकी स्थितिः विकृतिमापद्यते, तथा स्वास्थ्यं शनैः शनैः परिह्रीयते, कृशशरीराश्च ता देशाय बलिष्ठां सन्ततिं कथं दातुं प्रभविष्यन्ति इति।

अस्माकं देशनिवासिनो जनाः नेतारश्च सर्वस्मिन्यपि विषये पाश्चात्यदेशाननुकुर्वन्ति, नैतद् विचारयन्ति यत्तेषामस्माकञ्च संस्कृतौ महदन्तरम्। विदेशेषु स्वल्पा जनसंख्या, तत्र जनसंख्यास्वल्पत्वेन तैः सर्वविधाः व्यवस्थाः स्वानुकूल्येनैव व्यवस्थापिता। अस्माकं देशे वह्वीजनसंख्या, अत्र पुरुषाणां कृत एव कार्यन्न लभ्येत, उच्च शिक्षया शिक्षितानां योषितां कार्यक्षेत्रं किं भविष्यति। यदि स्त्रियोऽपि पुरुषा इव कार्यालयान्, कालेजान्, पाठशालाश्च गत्वा तत्र कार्यं सम्पादयिष्यन्ति तदा गृहकृत्यानि भोजनादीनि, सन्ततिपरिपालनञ्च को विधास्यति। भृत्यैरेते कार्ये सम्पादयितुमशक्ये। ममैकाऽध्यापिका वर्तते। सोच्च शिक्षां प्राप्य महाविद्यालयेऽध्यापयति। सा प्रत्यहं कथयति यत् स्त्रीणां कृते भृतिकरणं नितरामनुचितम्।

श्रेष्ठी—पुत्रि ! तव विचारान् निशम्याऽहमाश्चर्यचकितोऽभूवम् । वत्से ! अत्र तव मम च विचाराः समाना एव । योषितोऽवश्यमेव शिक्षणीयाः, किन्तु यादृशी शिक्षा तासां कृतेऽपेक्षिता भवेत्तथैव शिक्षणीयास्ताः ।

श्रेष्ठी—पुत्रि ! याहि । अथ प्राप्ताज्ञा रमा स्वमातुरभ्यर्णमगच्छत् । ततः माणिक्यचन्द्र श्रेष्ठी काञ्चनपुरीयं श्रेष्ठिनमाह—श्रीमन्, परीक्षिता सुता ?

कृपासागरः—श्रीमान् ! भवत्तनया सर्वथा योग्या । अस्मिन्नेव वयसि अस्याः परिष्कृतान् विचारान् श्रुत्वाऽहं परान्तुष्टिमन्वभवम । अहमद्यप्रभृति भवत्सुतां स्नुषां मन्ये । यदा रविः विदेशादत्रागमिष्यति तदा शुभे मुहूर्ते विवाहमनया सहैव करिष्ये इति मे दृढो निश्चयः । श्रेष्ठी माणिक्यचन्द्रश्च श्रेष्ठिनः कृपासागरस्य सुधापूर-निःष्यन्दनमिव वाक्यं निशम्य स्वात्मनि भृशमतुष्यत् । अथ गते कृपासागरे माणिक्य चन्द्रः स्वजायामुपेत्य प्रहृष्टः सन्नब्रूत प्रिये ! धन्यमद्यतनं दिनम्, आवयोः मनोरथः सफलीभूतः । श्रीमता कृपासागरेण श्रेष्ठिना आवयोस्तनया स्नुषारूपेण स्वीकृता । सा च स्वभर्तुर्वाक्यं निशम्य भृशममोदत । अहो ! अद्यावयोः शिरसोऽर्धभारस्तु दूरीभूतः । यदा विवाहो निष्पन्नो भविष्यति तदा तु भारापगमः साकल्येनैव भविष्यति । सा सुतामवोचत्—पुत्रि ! शिवयोरर्चना सफलतामभजत् । साऽधुनैव नैव त्याज्या, सर्वदैव त्वया पूजेयं समाचरणीया, येन तव गृहस्य जीवनं सुखी भवेत् ।

अथ श्रेष्ठी कृपासागरः स्वभवनमुपेत्य शशिप्रभामगदत् । प्रिये ! परीक्षिताऽद्य चन्दनपुरीयश्रेष्ठिनो माणिक्यचन्द्रस्यात्मजा, सा श्लाघनीयगुणा, अस्माकं कृते सर्वथा योग्या. सा साक्षरापि गृहकर्मणि पट्वी अस्ति । अद्य मया यद्भोजनं विहितम् तत्तयैव निष्पादितम्, तत्र यन्माधुर्यमासीत्, तन्न मयाऽद्यावधि कुत्रापि आस्वादितम् ।

शशिप्रभा—तर्हि श्रेष्ठम् ।

अद्य सोमवासरः । पत्रप्रापकः (पोष्ट मैन) पत्रालयात् समागत्य समाच्छन्नमेकं पत्रं प्रादात् । पत्रमिदं रवेः सकाशात् समागतमासीत् । श्रेष्ठी तदुद्घाट्य पठितुमारब्धः ।

परमादरणीयेषु पूज्यतातचरणारविन्देषु रवेः समादरं प्रणतिततयः । अहमत्र-कुशल्यस्मि, आशासे तत्रभवन्तोऽपि मितामयाः स्युः । पूज्यतम मातुश्चरणकमलेषु

मे प्रणतिर्वाच्या। पूज्यप्रसूर्वाच्या यद्रुविः प्रत्यहं भवतीं स्मरति, नाऽहं क्षणमपि जननीं हातुं समर्थोऽस्मि परं किं क्रियते, गुणलब्धयेऽत्रागमनं जातम्, अत्रत्यं कार्यं समाप्य शीघ्रमेवाऽहं स्वपुरमेत्य भवताञ्चरणकमलानि द्रक्ष्यामि। अत्रागतस्य मे मासद्वयं व्यतीतम्, अत्रत्यमध्ययनमेकसमापर्यन्तं भविष्यति। पुनः परीक्षा, परीक्षां दत्त्वा चागमिष्यामि स्वपुरम् तावद् धैर्य्यं विधयेम् युवाभ्याम्। अहमत्र सर्वथा निरामयः, मम प्रसन्नं मनः, नास्ति किमपि कष्टम्। भोजनन्त्वहं स्वकराभ्यामेव निर्मामि। यतो ह्यत्र मांसाशिनोऽहञ्च निरामिषः। अत्र फलानामपि बहुलता न। सम्प्रति हेमन्तर्तुः वर्तते, शीताधिक्यं वर्तते, प्रत्यहं हिमपातोऽपि भवति।

श्रीमद्भिः पत्रे लिखितं यल्लन्दनपुरी कीदृशी, तत्र कानि कानि दर्शनीयानि सन्ति अतः श्रीमताम् निदेशानुसारं लन्दनपुर्याः वर्णनादिकं लिखामि—

लन्दन नगर्याः वर्णनम्

लन्दनपुरी विश्वस्मिन् विश्वे निखिलपुरीणाम् शिरोरत्नायते। अत्र प्रत्येक देशस्य, प्रत्येक धर्मस्य च मानवाः स्थायिनः सन्तो निवसन्ति। आर्यावर्तस्यापि जना अत्र स्थायिरूपेण बहुभिः हायनैः निवसन्ति। Southal नाम्नि वसतौ एतावन्तो भारतीयाः निवसन्ति यदत्र समागते सति कश्चिदपि नानुभवति यदहं भारताद् बहिः।

इयं, पुरी विशाला, रुचिरा च। टेम्सनाम्नी सरिदस्याः पुर्याः मध्ये प्रवहति। अस्याः नद्या उपरि बहूनि पुलिनानि सन्ति। अस्या अधस्तात् द्वि एतादृशे अधिष्ठाने स्तो यत्र अधिभूमि वाष्पयानञ्चलति। अस्याः नगर्य्या आकर्षण केन्द्रं बकिंघम हर्म्यं वर्तते। अत्रात्रत्या सम्राज्ञी निवसति। एतदवलोकयितु प्रत्यहं सहस्रशो जनाः समायान्ति। अत्रत्यरक्षापुरुषाणाम् (गार्ड्स्) वेशभूषाऽतीव रमणीया विद्यते, किञ्चैते पूर्णशिक्षिताः सन्ति, दृष्टुमागतान् जनान् समाद्रियन्ते च।

अस्योपकण्ठमेव 'वेस्ट मिन्स्टर' नामकं पुलमस्ति, टेम्स सरित उपरि निर्मिताय अस्मै पुलिनाय आङ्ग्लकविना स्वकवितायाम् अमरत्वं प्रदत्तम्। अस्यान्तिकमेव लोकसभा (हाउस आफ कामन्स्) वर्तते। विश्वविश्रुता लिगवेनाभिधा घटिकाऽपि विद्यते।

लन्दनविश्वविद्यालयस्याभ्यर्णमेव अतुलनीयो विविधवस्तुसंग्रहालयो (म्युजियम) वर्तते। अत्र संसारस्य प्रत्येक स्थानेभ्योऽमूल्यानि वस्तूनि संगृह्य समानीय

च सुरक्षितानि सन्ति। बह्वीषु भाषासु लिखितानि अतीव प्रत्नानि हस्तलिखितानि-पुस्तकानि विद्यमानानि सन्ति। अत्र भारतीयभाषासु हिन्दीसंस्कृतपालीषु लिखितानि पर्याप्तानि पुस्तकानि सन्ति। अत्रत्यपुस्तकालये त्रिकोटिमितानि पुस्तकानि सन्ति, यानि अकल्पनीयानि सन्ति। अत्रत्य गुम्बजाकृतिषु अध्ययनाधिष्ठानेषु सहस्रशो जना अधीतुं प्रभवन्ति।

लन्दनविश्वविद्यालये बहवो विभागाः सन्ति। अयमतिविस्तृतः। अत्र विश्वस्य विविधासु भाषासु अध्ययनं भवति। विदेशेभ्यः समागताश्छात्राः स्व. स्व भाषामत्रो-पेत्य समधीयन्ते। यथा केम्ब्रिजाभिधस्य आक्सफोर्डाख्यस्य च विश्वविद्यालयस्य विश्वे यादृशी ख्यातिरस्ति तादृशी ख्यातिरस्य विश्वविद्यालयस्य नास्ति। तथ्यमिदमस्ति यल्लन्दनपुर्यां पञ्चाशदधिकाः विश्वविद्यालयाः सन्ति, परं केम्ब्रिज– आक्सफोर्डयोः साम्यन्न दधति। आक्सब्रिजाख्यो विश्वविद्यालयः सम्पूर्णदेशस्थानध्यापयति। अखिल-विश्वस्य विपश्चित अत्र विशिष्टां शिक्षां गृहीतुमाव्रजन्ति। अस्मिन् विश्वविद्यालये गृहीतविशिष्टविद्या अनल्पाः महान्तो जाताः। इदमनुमन्यते यद् वर्तमान मन्त्रि-मण्डलस्य प्रतिशतं षष्टिः सदस्याः अस्याः संस्थायाः भूतपूर्वा अन्तेवासिनः सन्ति।

अत्र मनस्तुष्ट्यै बहूनि साधनानि सन्ति। लार्ड (Lord) आवलाख्यानि विश्व-वितातानि प्रस्तरकन्दुकायाः (क्रीकेट) क्रीडाक्षेत्राणि, विम्बलडनाभिधं प्रसिद्धं टैनिस-क्रीडास्थलम्, बहूनि गोल्फाख्य–क्रीडास्थलानि, पादताडित (फुटबाल) कन्दुकक्रीडा क्षेत्राणि च सन्ति।

Hyde नाम उपवनं, यस्य विशालं भूखण्डमस्ति। जेम्स पार्काख्यः सुविशालो भूभागो निखिलां पुरीं हरितिम्ना भूषयति।

अत्र शताधिकाः नाट्यशालाः सन्ति। प्रदर्शनीगृहाण्यपि भूरीणि सन्ति, येषु समस्तजगतः कलाकर्तॄणाम् कलानां प्रदर्शनं बोभूयते। अत्रानल्पानि चित्रपटसद्मान्यपि सन्ति, यानि प्रायेण रिक्तान्येव भवन्ति। एकामेव शुल्कदां (टिकिट) गृहीत्वा यथेच्छं बहूनि चित्रपटदृश्यानि द्रष्टुं शक्यन्ते। प्रायेण चित्रपटदृश्यानि कामहिंसा प्रधानानि भवन्ति। कामप्रधानचित्रपटदृश्यानि स्वतन्त्राण्यपि प्रदर्श्यन्ते। दर्शकास्तान्यपि स्वल्प-संख्यायामेव समीक्षन्ते।

तरुणास्तरुण्यश्च स्वतन्त्रताप्रियाः। अविवाहिततरुण्यः क्षणदायामपि यदि गेहाद् बहिर्यत्र कुत्रापि तिष्ठेयुस्तत्र न कोऽपि विरुणद्धि।

नाट्यशालासु बाहुल्येन नर्तनं मद्यपानञ्च। नर्तनवेलायान्ते स्वात्मानमपि विस्मरन्ति।

अत्रत्यानि यातायातसाधनान्यपि पर्याप्तानि विकसितानि सन्ति। अधिकाश्यपी गन्त्री वाष्पशकटी गत्यां सर्वेभ्यस्तीव्रतमगतिकाऽस्ति। अस्या यात्रामूल्यं (भाड़ा) मरुत्तरयान यात्रामूल्यात् स्वल्पतरम्। प्रायो यात्रिण इमामेवोपभुञ्जन्ति।

अत्रत्यनिवासिनां स्वभावः

अत्रागमनात् प्राग् आङ्ग्लजनानां विषये द्वे वार्तेऽश्रौषमहम्—प्रथमा—आङ्ग्लभू-निवासिनो मानवाः दोषहीनाः। द्वितीया—ते म्लेच्छाः सन्ति। परमागमनानन्तरमहमन्वभूवम् यत्तेष्वपि शोभनाशोभनाः प्रवृत्तयो विद्यन्ते।

वस्तुत आङ्ग्लाः अनुशासनप्रियाः समयमूल्यविदः श्रमशालिनश्च भवन्ति। किमपि कृत्यजातं हेयन्न मन्यन्ते। कर्मकर्तॄणां प्रथा तत्रोच्चकुलेष्वपि नास्ति, यतोहि भृत्यानां वेतनमत्यधिकमस्ति। निखिला अपि आत्मकृत्यं स्वयमेव सम्पादयन्ति। स्पष्टवादिनश्च सन्ति। यदा ते कार्यसंलग्ना भवन्ति तदाऽन्यत्र मनांसि नो चालयन्ति। सप्ताहे शनिरव्योः कार्यं विस्मरन्ति विश्राम्यन्ति च। अयमाचारस्तेभ्योऽस्माभिः शिक्षणीयः।

एतेषां प्रकृतौ दोषा अपि विपुलाः सन्ति, यथा—पारिवारिकं जीवनमेषां पूर्णतया विच्छिन्नं भवति। सम्बन्धा अपि हीनतमा भवति। वयसः षोडसे वर्षे पूर्णे सति पितरौ कामयेते यत्तनयस्तनया वा, तौ उपार्जनं कुरुताम्, आत्मनश्च व्ययभारं स्वयमेव वहताम्। अस्याऽयं परिणामो यत्पुत्राः, पुत्र्यश्चपि न किमपि पितरौ पृच्छन्ति। यत् करणीयन्तत् स्वतन्त्रतया कुर्वन्ति। वृद्धत्वञ्चात्राभिशाप एव। अत्र दाम्पत्यजीवनमपि हीनतमम्, द्वयोः मनसोः काचिद् विकृतिर्भवेत्तदा त्याग (तलाक इति भाषायाम्) प्रथा विद्यते। तया प्रत्यहन्तस्य विच्छिन्नभीतिरस्ति। एतादृश जीवनयापनेन ते प्रकृत्या उद्धताः अभवन्। अत्रत्याः वयोवृद्धाः चिन्तनशीलाः मानवाः भारतीयमध्यात्मं स्वीकर्तुं कामयन्ते। एत इत्थं मन्यन्ते यद् देशोऽवश्यमेव समृद्धिशाली, परं मनसोऽशान्त्या व्याधिग्रस्ता एव।

अत्र सर्वकारो जनहितसमाजरचनार्थं सर्वदैव चेष्टते। अत्र वृत्तिरहितेभ्यो (बेरोजगार) मनुष्येभ्यः सर्वकारः आर्थिकीं सहायतां ददाति। यदि वृत्तिरहितो विवाहितः सन्ततिमांश्च भवेत्तदाऽधिकामार्थिकीं सहायतां ददाति। एवं मन्यते, यत्

प्रत्येकं नागरिकं सद्वृत्तिं विधातुं शासनस्य कर्तव्यमस्ति। यदि शासनं तस्मै वृत्तिं दापयितुमक्षमस्तदा तस्य व्ययं वहेत्। ईदृशेभ्यो मानवेभ्यः शासनं स्वल्पनिवासमूल्येन निवासगेहमुपलब्धौ चेष्टते।

अत्र चिकित्साकार्यं पूर्णतया निःशुल्कं वर्तते। अस्य व्ययार्थम् ये कर्म कुर्वन्ति तेषां वेतनेभ्यः प्रतिशतं षडवच्छिद्यते। अस्य लघुदेशस्य रक्षार्थं षष्टिसहस्रतोऽप्यधिकाश्चिकित्सकाः (डाक्टरस्) सर्वकार संरक्षणे कार्यरताः विद्यन्ते, एतेषु विपुलसंख्यान्विताः भारतीयाश्चिकित्सकाः सन्ति।

अत्र भारतदेशनिवासिनां विपुला संख्या विद्यते। येऽत्र प्रोन्नतेषु पदेषु कार्यरताः सन्ति। संख्याधिकानामपि तेषां सम्मानं साधारणाङ्ग्लजनापेक्षया स्वल्पमेव। प्रायेण सामान्याङ्ग्ल जनाः कृष्णश्यामरागान्वितान् एशिया-अफ्रीका-देश निवासिनो हीनान् मन्यन्ते तैः सह विग्रहमपि विदधति। इमे भारतीयान् भारभूतान् मन्यन्ते स्वोपरि। परमुच्चस्तरीया आङ्ग्लजना भारतीयानां गुणानवन्ति तानाद्रियन्तेच। भारतीय चिकित्सकान् विदुषश्चापि अत्र समानं समाद्रियन्ते।

अत्रत्यानां पुरग्रामाणां नाधिकमन्तरम्। नगरेषु याः सुविधाः समुपलभ्यन्ते ताः ग्रामेष्वपि समुपलम्भयन्ति। प्रायेणात्रत्यानां जनानाम् समीपे स्वकीयानि मरुत्तरयानानि सन्ति, अतो जनेभ्यो नगरनिवासापेक्षया ग्रामनिवास एव रोचते। यानानां पुरेषु ग्रामेषु च स्थापनार्थं शोभना व्यवस्था विद्यते।

साधारणाङ्ग्ल तरुणो मेधावी नास्ति। सामान्यज्ञानमपि निम्नस्तरं भवति। लघ्व्योऽपि गणनास्ते यन्त्रेणैव चिकीर्षन्ति। किञ्च, तेषां स्वभावोऽपि एतादृश एव।

अत्रोच्चशिक्षा महर्घ्यतमा, अतोऽधिगतोच्चशिक्षा आङ्ग्ला अत्यल्पा एव। आधिक्येन दशमीकक्षाऽध्ययनानन्तरम् कस्मिंश्चिदेकस्मिन् विषये प्रशिक्षणमधिगच्छन्ति।

भवतान्निदेशानुसारमुपरि मयाऽत्रत्यं वर्णनं संक्षेपेण लिखितम्।

पत्रोत्तरं देयम्। वृत्तजातन्निखिलपि संसूचनीयम्।

भवतामात्मजः

रविः

पत्रमिदं श्रेष्ठिना शशिप्रभायाः सम्मुखेऽश्रीतम् । सा च स्वात्मजस्य कुशलवृत्तं परिज्ञाय मनःसरोजे भृशमतुष्यत् ।

अधोलिखितमुपर्युक्तपत्रोत्तरं श्रेष्ठी प्रेषयति रवेरुपकण्ठम् ।

प्रिय रवे ! शुभाशीः । अद्याधिगतन्तव करकमलाङ्कितम् पत्रम् । तदधीत्य चावां चक्रवाकयुगं सूर्योदय इव परान्तुष्टिमध्यगच्छाव । तव जननिस्त्वां मुहुर्मुहुः स्मरति । अस्याः शरीरमात्रमेवात्र वर्तते, चेतस्तु तवाभ्यर्णम् भूयोभूयो याति । जानासि त्वं यन्मातृहृदयं कोमलं भवति अतो मृदुतया धेनुः स्वकीयं वत्समिवेयं सततं त्वां स्मरति । तवाऽध्ययनं कदा परिसमाप्स्यति, पुनः परीक्षा च कदा भविष्यति इति सर्वमुल्लेखनीयम् । त्वयाऽत्रत्या चिन्ता न विधेया । पितरौ विहाय सुदूरं गतवानसि अतः कदाचिदपि स्वपन्थाः न हातव्यः । पित्रोर्हृदयं स्नेहविह्वलं भवत्येव, परन्तरुणेन त्वया स्वस्वान्तनीरजं दृढं विधाय स्व प्राप्तव्यसृते न विचलितेन भाव्यम् । त्वं स्वयं योग्योऽसि, अतस्त्वदर्थं ममोपदेशोऽयमकिञ्चितकर एव तथापि तातस्य यत् कर्तव्यं वर्तते तदहन्त्वां स्मारयामि ।

आशासे, त्वं स्वपथाद् विचलितो न भविष्यसि । यदर्थं मातापितरौ विहाय विदेशमगमस्तत्कार्ये सफलतामाप्तुं सर्वदैव यत्नपरो भूत्वा सततं जागरूको भव । शेषं कुशलम् ।

पत्रोत्तरं शीघ्रमेव प्रेषणीयम् ।

त्वत्तातः—

कृपासागरः

काञ्चनपुरम्
(भारतम्)

श्रावण मासः, कृष्ण पक्षः । अस्मिन् मासे शुक्लपक्षेः तृतीयायान्तिथौ सौभाग्यशालिभि र्योषिद्भिः युवतीभिर्नववधूभिश्च विशिष्टो महोत्सवो मन्यते । शशिप्रभा श्रेष्ठिनमाहूय न्यगदत्—स्वामिन्, श्रीमता चन्दनपुरीयश्रेष्ठि-माणिक्य चन्द्रात्मजा स्नुषारूपेण स्वीकृता । श्रावण शुक्ला तृतीयायाः पञ्चदशाहानि अवशिष्टानि सन्ति अतः स्नुषायै प्रसाधनसामग्री—रुचिरा शाटिका, उरोवसनानि, काञ्चना-भूषणानि, सौभाग्यचिन्हा निस्वानुचरेण साकं प्रेषणीयानि । शशिप्रभायाः गिरमाकर्ण्यं श्रेष्ठिना तथाविधा व्यवस्था विहिता ।

अथ शुभे दिवसे श्रेष्ठिभृत्यश्चन्दनपुरमुपेत्य रमायै प्रेषितानि वसनाभूषण सौभाग्यचिन्हानि श्रेष्ठिने माणिक्यचन्द्राय समर्पितानि ।

अथ समेधितयौवना रमा तारुण्योष्मणा ज्वराक्रान्तेवाभवत् । प्रत्यहं क्षीयमाणतनुस्तनुतां भजन्ती सा नान्नमत्ति, न च सम्यङ् निद्रां लभते, न स्वान्ते शान्तिः, नचानने हास्यरसः, समवयःसखीसु न मनोविनोदः । अद्य श्वसुरपुरादागतानि वसनाभूषण सौभाग्यचिन्हानि अवबुध्य सा भृशमतपत् । अथ पितरौ तान्तदवस्थां वीक्ष्य पृच्छताम्—तनये, कीदृशीयन्तव वपुषः स्थितिः ? एनामवस्थां समीक्ष्यावयोश्चेतो भृशं दूयते । किन्तव ज्वरपीड़ा वर्तते ? आहोस्वित् रोगान्तरम् ? किं कञ्चित् चिकित्सकं समाहूय तंन्त्वां दर्शयावः ।

रमा—पितरौ, नाऽहं केनचिदातङ्केन पीडितास्मि, परन्न जाने मदीयतनौ किं जातम् । विगतक्षुतृष्णाऽहं शरीरे शिशिर जन्यं कम्पमिवानुभवामि । मम वपुषि एतादृशो नास्ति कश्चिद् व्याधिर्यदर्थं चिकित्सकमाहूय स प्रष्टव्यो भवेत् । प्रत्यहमहं भगवतोः शिवयोरर्चनां विदधामि, तयोः सम्मुख एव प्रार्थनां विधास्यामि, तावेव मदीयमातङ्कं नाशयिष्यतः ।

अद्य श्रावणशुक्ला तृतीया वर्तते । योषितां विशिष्टे महोत्सवे सम्मिलितुं रमा अपि प्रतिवेशितरुणिभिः सह काञ्चनपुरीय–वसनाभूषण–सौभाग्यचिन्हानि परिधाय विमनस्का इव गता । मार्गे सदनविद्यमानधवाभिस्तरुणिभिः सार्धं सा विविध हास्यभावैः योजिताऽपि न मनसो ग्लानिं दूरीकर्तुं समर्थाऽभूत् । अहो! भगवन्! मन्मथ! वस्तुतस्त्वं सर्वदैव मनो मथ्नासि, विशेषतोऽभिनवयौवनस्पृशतीनां तरूणीनान्तु अन्यामेव दशां विदधासि । त्रिलोचनविलोचनविदऽधोऽपि भवानतनुर्भूत्वा ऽनपराधयुवतीनां मानससारसं दवयसि । न कस्मादपि भवान् बिभेति ! निर्भीक इव तरूणतरूणी-मानसानि परितापयति । किन्निर्दयो भवान् ? प्रोषितभर्तृणाम् युवतीनान्तु भवान् रिपुकार्यं विदधाति । भगवन् ? कृपाङ्कुरू । न सर्वे त्रिलोचनाः त्वत् प्रेरणा प्रेरिताः प्राणिनो न ज्ञायते किम् किमनिष्टं समाचरन्ति । कल्पयाम्यहं यदत्र कलौ तव पूर्णसाम्राज्यं वर्तते, विशेषेण भारते । अस्तु, अनुकम्पां विधत्स्व, नोचेत् "अतिसर्वत्र वर्जयेदिति" नयोक्तया महदनर्थ सम्भावना ।

अद्य प्रातरेव रविः प्रसन्नस्तस्य दक्षिणं नेत्रं मुहुर्मुहुः स्पन्दते । स साश्चर्यं चकितो भूयोभूयो विचारयति यदद्य दक्षिणाक्षि कथं स्पन्दते । अस्य फलन्तु शोभनमेव

भविता। इत्थं चिन्तयति तस्मिन् पत्रवाट् तत्कराब्जे पत्रमेकं समर्पितवान्। अथ स तत्पत्रमुद्घाट्याधीते, अधीयानश्च परामुदमन्वभवत्। अस्य पत्रस्योत्तरं स इत्थं प्रैषयत्—

लन्दनपुरी (आङ्ग्लधरा)

पूज्यतमेषु श्रीमत्सु तातांघ्रिसरोजेषु रवेः प्रणतयो विलसन्तु। अहमत्र कुशलोऽस्मि, आशासे युवामपि तत्र कुशलिनौ स्थः। अत्र ममाध्ययनमेकहायने प्रचरिष्यति, ततश्च परीक्षा भविष्यति, परीक्षानन्तरं मासाभ्यन्तर एव फलमपि प्रादुर्भविष्यति। परीक्षाफलं विज्ञायाऽहं सत्त्वरमेव स्वदेशमागमिष्यामि। भवद्भ्यां न्न कापि चिन्ता विधेया। पत्रं प्रेषणीयम् निखिलमपि वृत्तजातं सूचनीयम्।

पूज्यतमजननिचरणकमलयोः मे सादरं प्रणतिर्वाच्या। सूचनीया च रविस्त्वां मुहुर्मुहुः स्मरति। स्नेहपाशसंयतोऽप्यहं न स्वमार्गाद् विचलितो भवामि। मम कृतेऽयं स्वर्णावसरः अतोहमस्योपयोगं सम्यक् करिष्यामि। जानेऽहं स्वदेशं मातापितरौ च विहाय विदेशमागतोऽस्मि विशिष्टशिक्षामाप्तुमतो नैव मुधां कालं यापयिष्यामि। अहं सर्वदैव पित्रोराज्ञां शिरसा वहामि। भवन्तौ निश्चिन्तौ भवताम् अहं स्वकार्यमवश्यमेव साधयिष्यामि। भवतोरनुकम्पया नूनं साफल्यमपि अधिगमिष्यामि।

भवतोरात्मजः

रविः

इत्थं क्रमेण हेमन्तशिशिरे वसन्तग्रीष्मर्तवः स्व स्वरोचिभिः मानवसमुदयन्मोदयन् स्वास्तित्वं व्यजहुः।

आषाढ़ मासः, शुक्लपक्षः। शशिप्रभा श्रेष्ठिनमभाषत स्वामिन्, रवौ विदेशङ्गते नव मासाः व्यतियाताः। स कदाऽऽगमिष्यति। मामकीनं मनो वाञ्छति यदधुनैव रविं पश्येयम् परन्त्वहन्तस्मात् सुदुरे स्थितास्मि। ततः पुत्रस्नेहविह्वलान्तां श्रेष्ठी व्याहरत् प्रिये! भवत्या नाधीरता विधेया स्वस्वान्ते। स्वल्पैरेवाहोभिरागमिष्यति त्वदीयो रविः।तस्मादागतेन पत्रेण विज्ञायते यत्त्रिमासानन्तरे सोऽत्रागमिष्यति। आगामिनि मासे च तस्य परीक्षा भविष्यति, परीक्षाफलमपि मासाभ्यन्तर एव प्रकटिष्यति। परीक्षाफलं ज्ञात्वाऽत्रायास्यति। चिन्ता नो विधेया।

इत्थं स्वामिनो वचो निशम्य शशिप्रभायास्त्रयो मासा वर्षत्रयमिव व्यतीत्ः।

आश्विनमासः, शुक्लपक्षो द्वितीया तिथिः। अद्य प्रातरेव शशिप्रभा शयनं विहाय शोचादिभ्यो निवृत्ता तदा प्रभृत्येव तस्याः वामनयनं भूयोभूयः प्रस्पन्दते।

शशिप्रभायाः विदितं यदस्य फलं शोभनमेव भवेन्नाम। इत्थं चिन्तयत्यान्तस्यां श्रेष्ठी वहिस्त आगत्य प्रियामवोचत्—भद्रे, अद्य भवतीं शुभं वृत्तं श्रावयामि। परममुदिता शशिप्रभा व्याहरत्— स्वामिन्, सत्वरं श्रावयन्तु तत् शुभं वृत्तम्।

श्रेष्ठी—सम्प्रत्येव तडित्पत्रं समायातम्। तव रविः विजयदशम्यामत्राग-मिष्यति। सा चेदं शुभं वृत्तन्निशम्य मनसि भृशमप्रीणात्। विजयदशम्यां रवेरा गमनस्य सूचना सर्वत्र प्रसृता।

आश्विन शुक्ला दशमी तिथिः। अद्य श्रेष्ठिनो हर्म्ये उल्लासतायाः साम्राज्यं वर्तते। रवेः सहाध्यायिनो, मित्राणि, भूतपूर्वाध्यापकाः प्राध्यापकाः, श्रेष्ठिनो वान्धवाः अनुयायिवर्गः, श्रेष्ठी च रविं प्रत्युद्गन्तुं वाष्पयानविश्रामस्थानं वाष्पयानप्राप्तेरेकहोरा पूर्वमेवायुः। अथ निखिलास्ते वाष्पयानागमनप्रतीक्षायाम् अनिमेषदृष्ट्या वाष्पयाना-गमनसूचकं स्तम्भोपरिसंलग्नशोणिमपत्रम् (सिगनल) प्रसमीक्ष्यमाणा अतिष्ठन् इत्थंस्थितेषु तेषु प्रथमघण्टानादोऽभूत्, पञ्चदेशक्षणानन्तरम् द्वितीयघण्टानादेन सहै वायःस्तम्भोपरिसंलग्नशोणिमपत्रं तिरश्चीनाधोनिम्नं दृष्ट्वा ते मिथोऽब्रुवन्—अहो! क्षणेनैव वाष्पयानं समेष्यति। इत्थं वार्तासक्तेषु तेषु वाष्पयानस्य वातनादः (सी. टी,) दूरादेवाश्रुयत। क्षणेनैव वाष्पयानं समागमत्। रविश्च पूर्वस्मादेव विश्रामस्थानात् वाष्पयानस्य द्वारे स्थित आसीत्। यदा वाष्पयानमरुणत्तदा तस्मादुत्तीर्य पूर्वं गुरुवृन्दस्य चरणाब्जेषु न्यपतत्। पुनः स्वतातचरणकमलेषु प्रणिपत्य समवयोभिः मित्रैः सहाध्यायिभिश्च परस्परं गलेन गलं संयोज्यामिलत्। श्रेष्ठी, तदनुचराः, वान्धवाः, रविसुहृदश्च भृशमहृष्यन्। अथ मरुत्तरमारुह्य रविः स्वहर्म्यमायात् स्वतातेन तथाऽन्यैश्च सार्धम्। हर्म्यान्तिमुपेत्यासनोपरि समुपविष्टायाः मातुश्चरण कमलयोः भूयोभूयः प्रण्यपतत्। अद्य शशिप्रभा लङ्कातो निवृत्ताल्लक्ष्मणात् सुमित्रेव, शङ्कराद्दिव्यास्त्रप्राप्तेरनन्तरम् प्रतिनिवृत्तादर्जुनात् कुन्ती इव स्वतनयं सम्मुखमव-लोक्य प्राज्यां सन्तुष्टिं प्रापत्।

अथ रवेरागमनवृत्तं चन्दनपुरेऽपि प्रेषितम्, तद्वृत्तन्निशम्य श्रेष्ठी माणिक्य चन्दो भृशमतुष्यत्, एकस्मिन् शुभेऽह्नि भाविनं जामातरं समीक्षितुं श्रेष्टी माणिक्य चन्द्रः काञ्चनपुरमायात्। स च स्वभाविनं जामातरं समीक्ष्य चेतसि विपुलां मुदं प्राप्नोत्। ततो द्वावपि श्रेष्ठिनौ परस्परं संम्मिलत्य परिणयमुहूर्तविषये वार्तालापं कर्तुमारभताम्।

माणिक्यचन्द्रः—महतः प्रमोदस्यायमवसरो यद् रविः स्वकार्यं समाप्य सकुशलं विदेशादागतः। अधुना श्रीमता विवाहसंस्कारं कर्तुं सत्वरता विधेया।

कृपासागरः—एकस्मिन् शुभे दिवसे पुरोधसमाहूय विवाहमुहुर्तं प्रक्ष्यामि, तं भवन्तमपि सूचयिष्यामि। भवान् स्वपुरं गत्वा विवाहस्य व्यवस्थां विदधातु।

माणिक्यचन्द्रः—श्रीमान् यदाज्ञापयति। अहं गच्छामि स्वपुरम्, श्रीमन्तः सत्त्वरमेव श्रेष्ठं मुहूर्तं दर्शयित्वा मामपि संसूचयेयुः येनाऽहमपि विवाहस्य सर्वा अपि व्यवस्थाः कुर्याम्।

इतो विदेशादागतं भाविनं पतिं विज्ञाय रमा ह्यपि सूर्योदयात् प्राक् पति सम्मिलनाशया चक्रवाकीव मनस्यहृष्यत्। सा च शनैः शनैः वपुःलावण्यमपि समध्यगच्छत्। तस्याः क्षुदपि प्रादुर्भूता, पूर्वं वपुषि यो विकार आसीत् स च पति सम्मिलनाशया दूरमयात्। अधिगतयौवना स्मितशारदचन्द्रानना मनोभवावनिरनुदिनं समेधितवपुषी रतिमपि अत्यशेत।

अथ श्रेष्ठी कृपासागरः एकास्मिन् शुभे दिवसे स्वपुरोधसमाहूय तमजल्पत् भगवन्! श्रीमतामनुकम्पा रवि सकुशलं विदेशादागतः, श्रीमन्तो विदन्त्येव यदस्य विवाहसन्बन्धश्चन्दनपुरीयस्य श्रेष्ठिप्रवरमाणिक्यचन्द्रस्यात्मजया रमया सह निश्चितोऽभवदतो विवाहस्य शुभावेला द्रष्टव्या श्रीमद्भिः। अथ पुरोधसा पञ्चाङ्गं प्रसमीक्ष्य वरवध्वोः ग्रहादिकं सम्यग् विदित्वा श्रेष्ठिनमाह—श्रेष्ठिवर! परिणयस्य शुभावेला मार्गशीर्षकृष्णा द्वितीयातिथिरस्ति। अस्याः सूचना चन्दनपुरेऽपि प्रेषणीया। भवांश्च परिणयसम्बन्धिकार्यक्रममारभताम्।

अद्य कार्तिक शुक्ला एकादशी वर्तते, भगवान् विष्णु रद्यैव स्वचिरनिद्रां विजहाति। देवशयनसमये न किमपि शुभकर्म विवाहादिकं क्रियते आर्यैः। अस्मादह्नो विवाहस्य सप्ताहे, वर्तते। सप्ताहात् प्रागेव विवाहकृत्यानि प्रारब्धानि संजातानि। स्त्रियो मङ्गलगीतानि गायन्ति, श्रेष्ठिनोऽनुचराः विविधकृत्येषु संलग्ना सन्ति। केचन भवनं परिमार्जयन्ति, अपरे विपुलतूलचयरचितानि समाच्छादनानि समाच्छादयन्ति, तदुपरि सुधाधवल प्रच्छादनानि प्रस्तारयन्ति। केचन शिल्पिनः अपि, कपाटांश्च विविधैः प्रसाधनै रलङ्कुर्वन्ति, केचिच्च पीतहरितरक्तचपला—प्रदीपान् यत्र-तत्र संयोजयन्ति। अपरे परिष्कृतकुड्येषु विविधानि चित्राणि चित्रयन्ति। वरवधूभ्यां कृते विविधानि वसनानि सीव्यन्ति सौचिकाः (दात्री) क्वच हीरकमाणिक्य गरुडोद्गारगोमेदमौक्तिकजटितानि विविधानि काञ्चनमयानि आभूषणानि निर्मान्ति स्वर्णकाराः। अन्यत्र कान्दविका अनेकविधानि मधुरान्नानि पचन्ति—तेषु केचन मोदकान्, अपरे कुण्डलिकाः, केचिच्च चूषितसितातन्तुलिकान्युदुम्बरफलसंकाशानि किलाटभोज्यानि

(रसगुल्याइति लोके) केचित् पुनः परिष्कृत–कुष्माण्डशकलानि गुलाबार्कमिश्रित सिताद्रवैः संस्कुर्वन्ति, केचिञ्च चणकचूर्ण–किलाटसर्पिशर्करा-युतानि मिष्टान्नानि, (दिलकुशाल इति लोके) केचन कचोरिकाः पूरिकाः काञ्जीवटकान् दधिवटकांश्च, केचनावलेहिकांश्च मूलिका कुष्माण्डारूक गोजिह्वा शमीफलानां विविधानि शाकानि निर्मान्ति । इत्थं श्रेष्ठिनः कृपासागरस्य हर्म्यं सम्राजो भवनमिव शोभते । सर्वे मानवा स्व. स्व कार्येषु संसक्ताः आत्मकर्तव्यतत्परतां सूचयन्ति ।

क्षपायामष्टौ वादनसमयः । अद्य पाणिग्रहणनिमित्तंस्नेह भोजनार्थं श्रेष्ठिनो हर्म्ये मित्रसुहृद् बान्धवसम्बन्धिनां सम्मेलनं वर्तते । हर्म्यमभितो रक्तपीतहरितचपलाप्रदीपैः प्रचकास्ति, हर्म्यस्थाः सकला अपि शाला चारुतरासन्दीभिः, बृहत्तमतूल प्रच्छादनैश्च रमणीयाः संलक्ष्यन्ते । क्वचिदासन्दीनामवलिः सुदूरम् वितता विद्यते, क्वचिच्च तूलपट्टिकारचिताःचारुतराः मञ्चाः राजन्ते । हर्म्यस्याग्रभूभागे रक्तसितांशुकरचितं विततं वितानं संयतमस्ति, वितानस्याधस्तात् तत्परितश्च समीरचञ्चलाः लघुपताकाः शोभन्ते । श्रेष्ठी सर्वेषामागन्तुकानां स्वागतमाचरति ।

अथ जातायां भोजनवेलायां श्रेष्ठी कृपासागरोऽपारहर्षप्रहर्षितः समागतान् प्रार्थयते । भोः भोः सम्माननीयाः सुहृदो, बान्धवाः, मित्राणि, सम्बन्धिनश्च एता आसन्द्यः भवतामारामार्थे विद्यन्तेऽतोभवन्तः एता अलङ्कुर्वन्तु नाम । ततस्तासूपविष्टेषु पुरुषेपु श्रेष्ठिभृत्या. सत्वर-सत्वरं केचन पत्तलानि निदधति, अपरे जलपात्राणि, केचन पुनः विविधानि मिष्टान्नानि, केचन काञ्जीवटकान् दधिवटकांश्च, केचनावलेहिकाः, केचन पूरिकाः, केचनान्य प्राश्यानि परिवेषयन्ति । इत्थं सर्वत्र महतः समुल्लासस्य तरङ्गाः तरंगायन्ते । ततः श्रेष्ठी समागत्य पुनः प्रार्थयते, अहो ! अद्य पुनर्मम महत् सौभाग्यमस्ति यद्भवन्तो मदीयं हर्म्यं पवित्रयन्ति । अत्रभवतां भवतामनुकम्पया चिरायू रविः विदेशमेत्य तत्र स्वकार्यं समाप्य ततः सकुशलमागत । एतत्सर्वं भवतामनुकम्पायाश्चारुतरं फलम् । साम्प्रतमहमभिलषामि यद् भवन्तः स्वकरान् सक्रियान् विदधतु । अथ श्रेष्ठिनः प्रार्थनानन्तरन्ते निखिला अपि मुखहस्तव्यापाररता अभूवन्, मध्ये-मध्ये च हास्यरसमपि आस्वादयन्ति स्म । इत्थमद्यतना निशा श्रेष्ठिनो हर्म्ये दिनायते स्म । सम्यगशितेपु तेपु मुखप्रक्षालनानन्तरं ताम्बूलादिभिः विपुलं सत्कृतास्ते चाखिला अपि वरवध्वोः दीर्घायुषं कामयमानाः स्व स्वगृहमयान् । इत्थमद्यतन क्षणदायामश्रेष्ठिहर्म्यं इन्द्रभवनमपि न्यक्कृतवान् ।

इतः श्रेष्ठी माणिक्यचन्द्रोऽपि स्वभवनस्य विवधैरनुचरैः परिष्कारङ् कारयति। तत्र केचनायःस्तम्भेषु रक्तांशुकानि समाच्छादयन्ति केचन "वरवध्वौ चिरञ्जीवेताम्" इमान्यक्षराणि वस्त्रपट्टेषु समालिख्य इतस्ततः संयोजयन्ति, केचन "स्वागतं श्रीमताम्" इमान्यक्षराणि लिखित्वा वस्त्रेषु प्रधानद्वारि संयोजयन्ति। अपरे विवहार्थं मण्डपं रचयन्ति। इत्थमखिला अपि कर्मकराः स्व-स्वकर्तव्यकार्येषु संलग्नाः दृश्यन्ते। रमायाः स्वान्तसरोजकलिका रवेरुदयेन सरोजकलिका इव मृशमतुष्यत्। इमायाः वपुषि पूर्वं यो मारविकारः समुदभूत् सोऽपि प्रणष्टः। अद्य तस्याः गात्रस्थितिरतीव रुचिरा वर्तते। सा मनसि मुदिता सती भगवन्तं शङ्करं प्रार्थयते— भगवन्नुमापते ! देहि मे विपुलं सौभाग्यम्। मया भवतो यार्ऽर्चा विहिता तस्याः फलं लब्धम्। अग्रेऽपि ममायुः सुखेन समृद्धया च व्यतीयात्तथा विधेयम्। भगवतामनुकम्पयैव सर्वं श्रेयो भविष्यतीति मदीयोऽयं दृढीयान् विश्वासः। आशासे, मदीयां प्रार्थनां स्वीकरिष्यन्ति भवन्तः। मातः पार्वति ! त्वामपि प्रार्थयामि। तव दयया सर्वमपि शोभनं जातम्। अग्रेऽपि दया विधेया सुताया उपरि इति मुहुर्मुहुः याचे।

अद्य श्रेष्ठिनः कृपासागरस्य चिरप्रतीक्षिता मार्गशीर्षकृष्णा द्वितीयातिथि, उषःकालत एव श्रेष्ठिनोऽनुयायिनो विविध कर्येषु व्यग्राः समीक्ष्यन्ते। केचन वर यात्रायां गन्तुं सुहृदो बान्धवान् सम्बन्धिनश्चाह्वयन्ते अपरे वसनाभूषणादीनां मञ्जूषाः पूरयितुं संलग्नाः सन्ति, केचित् पुना रविं स्नापयित्वा तं वस्त्राभूषणाभ्याम लङ्कुर्वन्ति। विंशतिवर्षवयाः रविस्तारुण्यतरुमारुरुक्षुर्वपुषो लावण्येन मदनमप्यति शेते, तस्य मधुपावलिवदसिताः नातिह्रस्वाः नातिदीर्घाः शिरोरुहाः, ये कार्तस्वर भास्वर–कौशेयांशुकनिर्मितोष्णीषाछन्नाः सन्ति, सामिशीतांशुसमाकृतिरुन्नतं ललाटं घुसृणमृगमदचन्दनविन्दुभास्वरं, उन्नतौ मांसलौ कर्णभूषणभूषितौ श्रवणौ, नीलोत्पलनिभे नयने, गौरवर्णौ पृथुलौ कपोलौ, कम्बुग्रीवः, युगव्यायतौ बाहू, मांसलमुन्नतायतमुरः गम्भीरनाभिः, नातिकृशं नातिस्थूलमुदरम्, दृढास्थिमांसला वुरुजंघे च, नातिह्रस्वनातिदीर्घप्रपदौ, शोणितशौणिमनखालङ्कृता अङ्गुलयोऽङ्गुष्ठौ च। नीलाश्मरत्नरचितग्रैवेयकेण धवलमौक्तिकहारेण च भूषिता ग्रीवोरःप्रदेशश्च, काञ्चनद्युतिकौशेयांशुक निर्मित प्रपदीनेनालङ्कृतोरः उदर जानुः, विघृतपयःफेननिभ धौतवस्त्रः, कङ्कणभूषित दक्षिणचरणः, रुचिरोपानद्भूषितपादयुगलः स रुद्रकोपविद-ग्धोऽपि रतिप्रार्थनया लब्धतनुर्मीनकेतन इवाशोभत। तत आगतेषु स्वजनेषु हिमविशदे अनावृते एकस्मिन्नुमरुत्तरे रविः पुरोधाः, नापितश्च समारुहन्। अन्येषु चान्ये समारूहन्। अथ प्रचलितेषु तेषु यदा चन्दनपुरसमीपमागच्छन् तदा काश्चिद्

गृहतलतः, अपराः गवाक्षेभ्यः, अन्याः काश्चिद् विरामदेभ्यो विवधकार्याणि विहाय नवयुवतयः, प्रौढाः योषितः, गलितवयसो वामलोचनाश्च तं रविं समीक्ष्य परस्परं व्याहरन्–सखि! वरोऽयं सुषुमया सुरपतितनयमप्यतिशेते। काश्चिदजल्पन् रोचिषाऽयं चन्द्रमप्यतिशेते, अपरा पाण्डवात्मजाभिमन्युमिव चारूम्, काचन घृतवपुर्रतिपतिमिवान्यत। इत्थं परस्परवार्तामग्नास्तास्तदुपरि कुसुमवृष्टिमकुर्वन्।

इतश्चन्दनपुरे श्रेष्ठिनो माणिक्यचन्द्रस्यानुयायिवर्गः पूर्वत एव वरयात्रा स्वागतार्थं सन्नद्धा आसन्। प्राक् सज्जीकृतहर्म्ये प्राप्तायाम् वरयात्रायाम् अनुचराः सत्वरं केचन चायचषकान् समानयन्ति, केचनाननप्रक्षालनार्थं मुष्णोदकम्, अपरे द्राक्षावातादनिकोचादीनां पूर्णानि सम्पुटकानि पुरतः ससत्कृति निधापयन्ति। एवं श्रेष्ठिनोऽनुचराः वरयात्रायां समागतानां नृणाम् सेवासु संलग्नाः स्वात्मानं व्यस्मरन्। अथ सम्यग् व्यवस्थितेषु वारयात्रिकेषु पीतोष्णपेयेषु अशितवाताद द्राक्षानिकोचेषु वारयात्रिकेषु श्रेष्ठी माणिक्यचन्द्र स्तत्रागत्य विनम्रः सन्नब्रूत– अहो! माननीयनां श्रीमतां दर्शनसौभाग्यमाप्य धन्योऽहमद्य। यदि काचित् त्रुटिर्भवेन्नाम तदा क्षन्तव्या सूचनीया च येन तत् परिमार्जनं कर्तुं शक्नुयाम्। माणिक्यचन्द्रस्य विनम्रवाक्यन्निशम्य श्रेष्ठी कृपासागरोऽजल्पत्– श्रीमन्, भवत्सदृशानां प्रबन्धे किं काचित् त्रुटिर्भवितुं शक्यते? असम्भवं खल्विदम्। भगवतो वासुदेवस्यानुकम्पया भवतां सपीपे प्राज्यं वसु, अनल्पा अनुचराः, बहूनि भवनानि साधनानिच, सुहृद् बान्धवानां विपुलं बलम्, पुनः का नाम त्रुटिर्भवेत्। अद्य भवतां दर्शनाद्वयं धन्यधन्यमात्मानं मन्यामहे। माणिक्यचन्द्रः– श्रीमद्भिर्यद्व्याहृतम् तदृतमस्ति, तथापि कन्यापितु रिदं कर्तव्यमस्ति यत् स समागतानामतिथीनां सेवायाम् न काममपि न्यूनतां वर्तयेत्।

अद्य श्रेष्ठिनो माणिक्यचन्द्रस्य हर्म्ये विपुलहर्षस्य साम्राज्यमस्ति। सर्वे कर्मकराः स्वकार्येषु लग्नाः सन्ति– केचन मण्डपं सज्जयन्ति, अन्ये विवधानि मिष्टान्नानि रचयन्ति, केचनेतस्ततो विद्युत्प्रदीपान् सयोजयन्ति, अन्ये पुनः शालाः परिशोधयन्ति भूषयन्ति च, क्षणमपि वार्ताया अवकाशो नास्ति। श्रेष्ठीमाणिक्यचन्द्रोऽपि कार्यव्यग्रो वर्तते।

रमणीयवसनाभूषणालङ्कृता रमा अद्य प्रमुदिता मीनकेतनप्राप्त्याशया रतिरिव प्रतीयते। सुचिरप्रतीक्षिता वेलाऽद्य समागता एव। सा स्वसमवयोभिः सखीभिः सार्धं संक्रीडति, कदाचित् स्ववपुः भूषयति, कदाचिच्च सखीभिः सह गायति, अद्य तस्याः मनोमयूरोनृत्यतीव। विधृतविविधांशुकालङ्कारा

चिन्हितशोणिमविन्दुललाटा, निर्मितचूडामणिललन्तिका, संयतकेशपाशा, परमरूचिरा, सुषुमया इन्दुमतीव, दमयन्तीव प्रतीयते ।

सायंकालस्य समयः , वरयात्रायाः स्वागतस्य समयो जातः कन्यापितुः हर्म्ये सर्वा व्यवस्था सम्यक् सम्पादिता अनुचरैः । ततोऽनुचरेण वरयात्रायाम् सूचना दत्ता यत् श्रीमन्तो भवनमलङ्कुर्वन्तु नाम ।

इतः कश्चिद् वरयात्री स्वपयःफेननिभं चोलकं सज्जीकुरुते । कश्चिन्मृदुलौर्ण निर्मितं कोटवस्त्रं दधाति । अपरःकश्चित् स्वकेशप्रसाधन्या केशान् प्रसाधयति, कश्चिन् स्नाति, कश्चिद् धौतवस्त्रं विभर्ति, कश्चित् जङ्घोरूलग्नं चिपिट मधोंशुकं दधाति । अथ सज्जेषु सर्वेषु रविमपि वसनाभूषणैः समलंकृतम् एकस्मिन् रजतविशदे रुचिरतमे विपुलपरिमलकुसुमसृगलंकृते मरुत्तरे समारोह्य पृष्ठे च सर्वे वरयात्रिणोऽग्रे वृन्दवाद्य (वैण्ड इति भाषायाम्) वादकामध्ये साधारणवाद्यकाः, नर्तकाः नर्तक्यश्च विविधगीतिनिनदैर्नृत्यैश्च कन्यापितृ हर्म्यं समभियन्तः परमां शोभामविभरुः । प्रतिमार्गम् ललनाः वरकन्ययोः दीर्घायुषं कामयमानाः, वरं कुसुमवृष्टिभिः सदकुर्वन् । वाद्यध्वनिभिर्नृत्यैश्चायमुत्सवोऽद्य चन्दनपुरं माधवनीं पुरीं पर्यणमयत् । मरुत्तरे समासीनो रविः धृतच्छत्रचामरः कार्तिकेयद्युतिमविभृत् । इत्थञ्चन्दनपुरस्य वणिक्पथं विपण्यश्च समुल्लासयन्नयं शोभामहोत्सवः शनैः शनैरभियन् श्रेष्ठिमाणिक्यचन्द्रस्योरुहर्म्यं प्रापत् ।

अथ प्राप्तायाम् वरयात्रायाम् उपहर्म्यं स्त्रियो वध्वश्च स्वागतगीतानि गातुमारभन्त । श्रेष्ठिनो माणिक्यचन्द्रस्यानुयायिनश्च विवधकृत्यसम्पादनाय इतस्ततः परिधावन्ति व्यग्रतांगता इव । अथ रविः मरुत्तरादवतीर्यं हर्म्यस्य प्रधानद्वारमयात् । तत्र यथालोकरीत्यनुसारेण विहितार्चो रविः योषिदन्तःस्थिताया रमायाः मृदुग्रीवायाम मृदुलसुरभिसुमसृक् मदनो रतिग्रीवायामिव पर्यधारयत्, सा चापि मीनकेतनग्रीवायाम् रतिरिव रवेः ग्रीवा ह्रियाऽधोविहितनयननीरजा स्वप्रेमपाशे जीवनपर्यन्तं संयन्तु पेलवपुष्पनिर्मितया मालया भूषिता । ततः परस्पर संजाते मालाधारकर्मणि निष्पन्नासु लोकरीतिषु आसन्द्य अलङ्कृतेषु वारयात्रिकेषु रविमपि काञ्चनभास्वरसूत्रस्यूत कौशेयांशुकाद्वृतासन्द्यां समुपवेशयन् ।

अथ श्रेष्ठिनो माणिक्यचन्द्रस्यानुचराः बान्धवाः, सुहृदश्च चोष्यपेयं (चाय इति प्रसिद्धो पेयः) पाययन्तः इतस्ततो गच्छन्ति वारयात्रिकान् । केचन संलग्नचूर्णपूगीफल

सुगन्धिताम्बूलानि समर्पयन्तोऽपरे द्राक्षावातादनिकोटानि करकमलेषु धारययन्त इतस्ततः प्रयन्ति ।

अथ निष्पन्ने स्वागतकर्मणि समुपस्थितायाम् परिणयवेलायाम् पूर्वं मण्डपे रवेरागमनमभूत् । अथ मङ्गलगीतानि गायन्तीषु योषित्सु वेदमन्त्रोच्चारणतत्परेषु भसुरेषु प्राग् गणेशनवग्रहषोडशमातृकाणामर्चनं रविहस्तेन कारितम् पुनश्च रमापि विवाहोचित वेषभूषालङ्कृता मण्डपेऽन्यपुरुषाङ्के समारोप्य अनाययत् । ततो वैश्वानर साक्ष्या विहिते पाणिग्रहणे द्वावपि कुड्यचित्रित-विवध-प्रतिकृति-समक्षमुपातिष्ठताम् । ततस्चोचितकर्तव्यानन्तरम् तत्रत्याः काश्चिद् योषितः भोः जामातः, अपरे ननान्दृभर्तः, अन्याः पुनः विविध सम्बोधनेन रविं प्रजल्पन्त्यः पद्यं किञ्चिद् ब्रुवन्तु श्रीमन्तो यतोहि भवन्तो देवभाषामाङ्गलभाषाञ्चापि विदन्त्येव । किञ्च, देवानामग्रे श्लोककथनस्य लोकाचारोपि वर्ततएव । वस्तुतो वरोऽधीतोऽनधीतो वेति परीक्षा क्रियते महिलाभिस्तदर्थमेव पद्योच्चारणं कार्यते ।

अथ रविस्तासां वाचमाकर्ण्य नीचैस्तनम् पद्यद्वयमध्यगिष्ट—

सकमलः कमलोद्भवकारणः
कमलजः प्रमथाधिपतिः शिवा ।
जगति नीतिसृतिप्रयियासूनां
वितनुयुः भविकं भवताम् सदा ॥१॥

सुरसमर्चितपादसरोरुहो
द्विपमुखः प्रियमोदकभोजनः ।
गणपति गृहमेधिपदं वरं
प्रविशतोऽस्ननुताच्छिवमावयो ॥

अथ सम्पन्ने पाणिग्रहणकर्मणि आशीर्वितरत्सु द्विजवर्येषु वारयात्रिकाणां निष्पन्ने भोजनविधौ क्षपाया एकादशवादसमयो जातः । ततश्च स्व स्वकृत्यं निष्पाद्य सर्वे स्व स्वस्थानमध्यशयिषत ।

अधुना रमाया पतिगृहे प्रस्थानवेला वर्तते । श्रेष्ठिना माणिक्यचन्द्रेण स्वतनयायैअनेकविधानि कार्तस्वरभूषणानि माणिक्यमौक्तिकादीनाञ्च विवधानि आभूषणानि विपुलानि महर्घ्यंवसनानि, आयामायोमञ्जूषा (आलमारी, कपाट इति

केलो) लोहमञ्जूषाः, (बक्सा इति लोके) रुचिरा आसन्दयः, चारूमरुत्तरम्, नभोवाक श्रवणयन्त्रम् (रेडियो इति लोके) प्राज्यानि दीनाराणि चोपायने दत्तानि। सम्प्रति पतिगृहं यास्यतीति तस्या पित्रोश्चिन्तया मुखमण्डलं मालिन्यमभजत् । अहो ! महता कष्टेन पालिता पोषिता च सुताऽधुनैव गमिष्यति ततो हर्म्यमिदं शून्यं प्रत्येष्यति, आवयोर्मनो म्लानिमनुभविष्यति । कथङ्कारं मनः सन्तोषयावः । इत्थं विचारमग्नयोस्तयोः प्रस्थानवेला समायाता ।

अथ श्रेष्ठी स्वतनयामुपदिशति—सुते, त्वं बहुकष्टेन पालिता पोषिता चेदानीं पतिगृहं यासि, तव सौभाग्यं चिरं विलसतु । तत्र गत्वा त्वं श्वश्रू श्वसुरयोः सेवाव्रत-परायणा भव । पत्युः विपरीतं किञ्चिदपि मा कुरु। तव सौभाग्येन पतिगृहमपि सर्वसाधनसम्पन्नमस्ति, परं तत्र वसती सती पितरौ मा विस्मर । आशास्त्रहे, पतिगृहे निवसती त्वं पित्रोः यशांसि न कदापि न्यूनतां विधास्यसि ।

ततो वाष्पावरूद्धगलविवरा रमा किञ्चिदपि वक्तुमसमर्था सर्वामपि ताताज्ञाम् ग्रीवाकम्पनसंकेतेन स्व्यकरोत् । ततः श्रेष्ठी माणिक्यचन्द्रो वाद्यध्वनिना तनयाञ्जा-मातरन्तथाऽन्यांश्च वारयात्रिकान् सस्नेहं स्वनगरं प्रति प्रास्थापयत् ।

पूर्वत एव वह्वीभिर्वनिताभिः सार्धं शशिप्रभा स्वनववध्वाः रमायाः स्वागतार्थं सज्जा आसीत् । यदा शशिप्रभयाऽवबुद्धम् यद् वरयात्रा नगरोपकण्ठमागता तदा तस्याः हर्षः सीमानमतिक्रामत् । स्वल्पायाम् वेलायाम् व्यतीतायाम् वरयात्रा समीपं समागता । ततः प्रमुदिता शशिप्रभा रमाया अभ्यर्णं गन्तुकामा अपि न तथा कर्तुम-शक्नोत् यथा चान्याः वधूमिमां समेत्य तामभितः समावृण्वन् ।

अथ माङ्गलिकगीतिपुरःसरं वरवध्वौ मरुत्तरात् समुत्तार्य सहवाद्यध्वनिना भवनं प्रापितवन्तौ । अद्य शशिप्रभा वधूमुखविधुं समवलोक्य रविजन्मजन्यं कष्टं व्यस्मार्षीत् यथा साऽचीकमत तादृशी तस्याः वधूरस्तीति विशेषतोऽमोदत । ततो निष्पन्नासु लोकरीतिषु विहितभोजनेषु च सर्वेषु रमया समानीतानि निखिलानि वस्तुजातानि निरीक्ष्य—निरीक्ष्य योषितो मित्राणि सुहृदो वान्धवाश्च भृशमहृष्यन्, परस्परं प्राजल्पंश्च—अहो ! चन्दनपुरनिवासिना श्रीमता श्रेष्ठिना स्वतनयायै दैनिकोपयोगीनि निखिलान्यपि वस्तुजातानि उपायनीकृतानि । तस्य तनया रमा चापि वस्तुतो रमेव रूपगुणशालिनी, नात्रसन्देहः । समायाताः सर्वेऽपि न्यगदन्

यदस्यामवस्थायाम् समुत्पन्नः सुतोऽद्य सर्वथा योग्योऽभूत् । परस्परवार्तालापे लोकाचारे चातीव निष्णातोऽयं रविः । पुत्रसदृशी योग्यैव वधूरपि—

"वरमेको गुणी पुत्रो न च मूर्खाः शतान्यपि ।
एकश्चन्द्रस्तमो हन्ति न च तारागणा अपि ।।"

इत्युक्त्या रविरयं वंशं समधिकोन्नतिपथं प्रापयिष्यति । धन्यः खलु श्रेष्ठी कृपासागरः, धन्या च शशिप्रभा, ययोर्रविसदृशो गुणवान्, श्रवणवत् पितृसेवकः, युधिष्ठिरवत् धार्मिकः, सत्यवक्ता च, सदाचारविचारशीलः, जवाहरवत् उत्साहसम्पन्नः, लोकविश्रुतकीर्तिततिः, प्राप्तयौवनस्तनयोऽस्ति । वयं भगवन्तं प्रार्थयामहे यदयममितायुः समुपलभताम् । रमया सह चिरं लोकसुखमुपभुनक्ताम् । सम्प्रति यादृशी भावनाऽस्य वर्तते सा सर्वदैव तिष्ठेत् । न च कदाचिदपि नयपथाद् विचलितो भवेत् । यथा श्रेष्ठिना कृपासागरेण स्वपूर्वजसञ्चितां कीर्तिवल्लरीं स्वोदारैः गुणोदकैः संसिच्य वृद्धिं समुपनीता तथाऽयमपि भूयात् । इत्थं परस्पर प्रजल्पत्सु मानवेषु मित्रेषु सुहृत्सु च बहुः समयो व्यत्यगात् ।

अद्य श्रेष्ठी कृपासागरः शशिप्रभा च अधिगतनाकाधिपत्यमिव विपुलं प्राहृष्यताम् ।

रमाया आगमनात्प्रागेव वितताायामचतुर्द्वारमेकं शयनगृहं विरचितमासीत्, तदन्तश्चतस्रो रमणीया आसन्दयः, प्राज्यतूलसम्भृतमेकं सुविस्तारायामसम्पन्नम् प्रावरणं पयःफेननिभविशदप्रच्छदास्तृतम् सोपबर्हं तन्निकट एव वृहदेकं शोभनप्रच्छादनसम्पन्नम् राजतपादपं मञ्चमपि विराजते । भित्तिषु विविधविबुधानां महापुरुषाणां चित्राण्यपि रुचिरदारुकृतद्वारकाभिः मण्डितानि संलग्नानि आसन् । विद्युत्प्रदीपैरालोकितं शयनागारमिदं ऋतुसुखमासीत् । ग्रीष्मे स्वेदबाधाभीतेरभावो हिमे शीताद् भीतेरभाव इत्थन्निखिलसाधनसम्पन्नमिदं शयनागारं शशिप्रभायाः परिचारिकया दर्शितम् रमायै । सा च तच्छयनागारं समीक्ष्य स्वान्तेऽमितमुदमन्वभूत् सा च तत् प्रविश्य विविधचित्रालोकनासक्तलोचना आसीत्, प्रत्यैक्षत च रवेरागमनम् । अद्य निशायाम् तस्याः हृत्कलिका एकं विचित्रमानन्दमन्वभवत् । ततः क्षणानन्तरमेव रविरपि तत्रागच्छत् । सा चायान्तं रविं वीक्ष्य सावगुण्ठना सञ्जाता । रवेरागमनानन्तरं सा चैकस्मिन् प्रावरणभागे शीतसंकुचितशरीरेव वपुर्वस्त्रेण समास्तीर्य समुपविष्टा । शयनागारमिदं भवनस्यैकान्तस्थाने आसीत् । अतस्तत्रान्यस्य कस्यचिदागमनस्य सम्भावनैव नासीत् । प्रियायाः समीपमेत्य रविस्तामजल्पत्—प्रिये !

त्वं गृहीतविद्या पट्वा चासि, पुनः किमर्थमिदमाननचन्द्रमवगुण्ठनराहुरणा सम्माच्छादितम् साधारणग्रामनतरुणीवत् । रविणा मुहुर्मुहुः प्रार्थ्यमाना ह्यपि सावगुण्ठने विहितहासा न कथञ्चिदपि तत् दूरीकुरुते, यद्यपि प्रियतमसान्निध्येन तस्या मनोवारिजं प्रफुल्लं समद ञ्चास्ति तथापि प्रथमसम्मेलनाऽवसरे सा ह्रिया नावगुण्ठनमपसारयति । रविर्नीतिज्ञोऽस्ति अतः स तदनीच्छयाऽवगुण्ठनं नापसारयति स्वयं स्वकरकमलाभ्याम् । अथ मन्मथनिभं रमणीयं युवानं प्रियतमं समीपमाप्य सा जातमदनवेगा शनैः-शनैः स्वकीयमवगुण्ठनं दूरीकर्तुमारभत । यथा-यथा साऽवगुण्ठनमपसारयति तथा-तथा रविरपि तस्या आननकमलं प्रसमीक्ष्य भृशममुह्यत । अथ क्षणेनैव तौ विस्मृतात्मानाविवाजायताम् । व्यतीते स्वल्पे समये लब्धसंज्ञौ तौ परस्परमजल्पताम् । तत्र पूर्वं रविः व्याहरत्—प्रिये ! त्वां प्राप्य मे हृत् सरोजे काऽपि अभूतपूर्वा प्रमोदलहरी समुल्लसते । तवोपकण्ठेनाद्य क्षणदायाम् यदानन्दमन्वभवम् तदितः प्राक् कदाऽपि नान्वभवम् । अहं कामयेऽस्माकं समयः सर्वदा सुखेनैव व्यतीयात् ।

रमा—प्रियतम, अहमपीच्छामि एतदेव । मयाऽपि अद्य या तुष्टिर्लब्धा सा जीवने प्रथमवारमेव । एवन्तौ प्रतिक्षपम् मदनानन्दमनुभवन्तौ कञ्चित् कालं व्यत्ययापयताम् ।

शशिप्रभा च रमामिव रमां स्नुषामाप्य निर्धना धनमिव मनोनीरजे भृशमतार्प्सीत् । विद्यमानासु दासीष्वपि रमा प्रत्यहं स्वश्वश्र्वाः विपुलां सेवामकरोत् । तस्याः शयनत्यागात्प्रागेव मुक्तशयना सा प्रत्यहन्तां प्राणौत् । स्नपनवस्त्रप्रक्षालने च सा स्वयमेव व्यधात् । शयनात् प्राक् प्रतिक्षपम् चरणौ समवाहयत् । शशिप्रभा रमायाः शुश्रूषया भृशं परितुष्टा आत्मानं धन्यधन्यममन्यत । अहो ! विधिरनुकूलोऽस्माकं यत् प्राज्य घनिक कुलीनाऽपि रमा मम सेवाम् समनुतिष्ठति । भृत्येषु सत्स्वपि निखिलमपि गृहकृत्यं स्वकरकमलाभ्यामेव सम्पादयति । धन्याऽहम्, धन्यश्च रविः, यस्येतादृशी धर्मपत्नी ।

एकदा रमा स्वश्वश्रूमवोचत्—मातः, भवतीभिरधुना न किमपि कृत्यजातम् विधेयम् । अस्माकमदभ्रवित्ततया भृत्यानां विपुलता, किञ्चाहं भवतीनां दास्यस्मि, भवतीनामिदमेव कर्तव्यमस्ति यत् अनुक्षणं मामादिशतु । साम्प्रतं भवतीनां वयः परिणामो जातोऽस्यामवस्थामामिदमेवोचितं वर्तते यद् भगवन्नामस्मरणम् कुर्युः येन परलोकपन्थाः शोभनो भवेत् । प्रतिक्षणमहं भवतीनां शासनं प्रतीक्षे, अहं यावतीं सेवां

विधास्यामि तावदेव विपुलं फलम् लप्स्ये, किञ्च स्नुषायाः कर्तव्यमिदं वर्तते यत् सा स्वश्वश्र्वाः सेवानिरता भवेत्। इह या स्नुषा स्वपूज्यानां यादृशीं सेवां कुर्यात् तादृश्येव विपुलानि फलानि लभेत। नास्त्यत्र संदेहः।

अथैकस्मिन्ननेहसि शशिप्रभा, श्रेष्ठी कृपासागरश्च परस्परं प्रोक्तुमारभताम्, तत्र श्रेष्ठी– प्रिये ! सम्प्रति आवयो वयो जीर्णमामेतु समीहते, अतो गृहस्य निखिलमपि भारं रवेः स्कन्धोपरि निधाय आवां भगवन्तं स्मरावः। रविरयं शिक्षितो व्यवहार पटुश्चातो मम मानसं मां प्रेरयति यदधुना गृहभारं रवये समर्पणीयमत्र तव का सम्मतिः। शशिप्रभा– प्रियतम, भवता यदुच्यते तदहमपि अनुमोदयामि। यादृशो रवि स्तादृशी रमा अपि गृहकर्मणि दक्षा, सुशीला, प्रत्यहं मां सेवते, सत्वस्वपि अनुचरेषु सा स्वयमेव मां स्वकरकमलाभ्यां स्नपयति, वस्त्राणि च प्रक्षालयति। धन्या वावाम्, ययोरेतादृशी पुत्रस्नुषे, ममपूर्णा सम्मतिरस्ति यत् निखिलान्यपि गृहकर्माणि रवये देयानि। अयञ्चतुरोऽस्ति अतस्तेषां सञ्चालनं योग्यतया विधास्यति। एवन्तौ विचार्य रविमाहूय न्यगदताम्– प्रियसूनो ! रवे ! गृहस्थस्य यद्रुचिरं फलन्तदावाभ्यामधिगतम्, ययोस्त्वत्सदृश आत्मजः रमासदृशी च स्नुषा, तयोः गृहस्थाश्रमः कथन्न सफलताम् लभताम्। गृहस्थाश्रमस्येदमेव शोभनं फलमस्ति यद् योग्यं संन्तानं समुत्पाद्य तं गृहस्थसञ्चालनसमर्थं कुर्यात्, तच्च त्वयि वर्तत एव। अधुनाऽवयोर्वयोऽपि प्राप्तषष्टिवर्षप्रायमभूत् अतः परलोकमार्गः शोभनो भवेत्तदर्थं यतनीयमावाभ्याम्। आशासे, मदीयमिमं प्रस्तावं त्वं मंस्यसे। आवयोर्मनोऽपि वितृष्णं सञ्जातम्, अग्रे नास्ति किमपि प्रयोजनं गृहस्थाश्रमनिवासस्य, अतोऽद्यैव त्वं गृहस्थभारं वहस्व। पित्रोर्वाचमाकर्ण्य रविरब्रूत– जननिचरणैस्तातचरणैश्च यदुक्तन्तदवितथम् परमधुनाऽपि भवतोः गृहस्थाश्रमे वसनमेव श्रेयोस्ति, यतो हि ममलघुवयः किञ्चान्यत् गृहस्थं निर्वोढुं यादृगनुभवोऽपेक्ष्यते स मयि नास्ति सम्प्रति, तस्माच्च द्वित्रिवर्षपर्यंयावत् गृहे स्थत्वैव मां गृहस्थाश्रमस्य शिक्षां शिक्षयन्तु। आम्, वाणिज्यसम्बन्धि, गृहसम्बन्धि वा यत्किमपि कृत्यजातं भवेत्तदहं स्वयमेव सम्पादयिष्यामि, भवतान्तु तत्र सहमतिरावश्यकी। अतोऽहं प्रार्थये यदधुना मां विहाय गृहस्थाश्रम त्यागो नोचितः। एतावदुक्ते रवौ रमाऽपि अब्रवीत्– मातः ! तात ! गृहस्थाश्रमानुभवरहितावावाम् परिहाय भवतो. संन्यासाश्रमाश्रयणन्नोचितमतो गृहे निवसतोः भवतोः निदेशानुसारमावाम् कार्यं सम्पादयिष्यावः। अथ पुत्रस्नुषयोर्वचो निशम्य श्रेष्ठी शशिप्रभा चाहतुः, भवतु नाम किन्तु आवामद्यप्रभृति न किञ्चिदपि गृहकृत्यं विधास्यावः निखिलमपि कार्यजातं युवाभ्यामेव सम्पादनीयम्। रमा रविश्च– सुष्ठुवतत्, भवन्तौ भगवद्भजन परायणौ सन्तौ न किमपि कार्यं कुरुताम्, यत्किमपि कार्यजातं भवेत्तदावाभ्यां

सम्पादनीयम् । अत्र विषये न कापि चिन्ता विधेया श्रीमद्भ्याम् । किन्तु भवतोः करकमल च्छत्रच्छायायाम यदावाम् गृहस्थकर्मनिवाहणे प्राप्तसामर्थ्यौ भवेत्तान्तदा यथेच्छं विधेयम् इत्थं रमा रविश्च स्वपित्रोः प्रसादनं व्यतनुताम् । इत्थं सुखेन निवसत्सु तेषु त्रिचतुरोमासाः व्यत्यगुः ।

अथैकदा श्रेष्ठी कृपासागरः स्वपुरोधसमाहूय व्याहार्षीत्– भूसुर वर्य ! आवयोः वयः परिपाको जातोऽधुना रविः सर्वथा योग्यो युवा सञ्जातः सकलमपि गृहस्थभारं अस्य स्कन्धोपरि निधाय आवां कामयावहे यदधुना मानवजीवनं सफलयितुं किमपि कुर्यावस्तदुपदिशतु श्रीमान् मानवजीवनं कथं सफलं भवेदिति । श्रेष्ठिनः कृपासागरस्य वाचमाकर्ण्य पुरोधसाऽवोचि– श्रेष्ठिवर्य ! भवतो मतिः शोभना, वस्तुतो यदा मनुष्यस्य तनयो युवा समर्थश्च भवेत्तदैव निखिलमपि गृहस्थाश्रमस्य भारन्तदुपरि निक्षिप्य स्वयं परमात्मतत्व चिन्तनपरो भवेत् ।

निखिलेष्वपि प्राणिषु मानव एव एक प्राणी अस्ति यो धीविद्यासम्पन्नः, बलाधिक्यन्त्वन्यत्रापि द्रष्टुं शक्यते, परं मतिवैभवं मानवेष्वेव दृश्यते, तया धिया चेत् स्वमानवजीवनं नोन्नतिपथं प्राप्नुयात्तदा तत्प्राप्तिः मुधैव । मानवः स्वधिषणावैभवेन सर्वानपि प्राणिनो वशीकर्तुं शक्नोति, यस्य बुद्धिर्बलन्तस्येति नयभारती सर्वत्रानुभवितुं शक्यते । अस्तु, कलौ मनुष्याणामायुः वर्षशतमिति आयुर्वेदविदः । तत्राऽस्यायुषश्चत्वारो भागाः विहिताः महर्षिभिः, ब्रह्मचर्यम्, गृहस्थाश्रमः, वानप्रस्थाश्रमः, सन्यासाश्रमश्चेति । तत्रैतेषां शास्त्रोक्तविधिना परिपालनेनेह सुखायुर्भुक्त्वा परलोकोऽपि शोभनो भवति ।

ब्रह्मचर्याश्रमः— अयं भागो निखिलायुषो मूलं वर्तते । यथा दृढतम भवन निर्माणाय तस्य मूलमपि दृढ़मेव निर्मीयते तथैवावशिष्टमायुः सर्वकरणक्षमं दृढं स्यात्तदर्थं प्रथमाश्रमस्य दृढ़तानिवार्यता । तत्र ब्रह्म वेदस्तदध्ययने व्रतं चरतीति ब्रह्मचारी तस्य भावम् ब्रह्मचर्यम् । वेदाध्ययने तिग्मधीरपेक्ष्यते, सा च वीर्यरक्षया प्राप्तुं शक्यतेऽतोब्रह्मचर्यशब्दस्यार्थपरम्परया "वीर्यरक्षा" इत्यर्थोऽपि फलति । वीर्यरक्षया बुद्धिस्तेजोयशोबलञ्च समेधन्ते । एषां वृद्धया शरीरस्य शारीरिकी, बौद्धिकी, मानसिकी समुन्नतिर्भवति । वीर्यरक्षया ओजसो वृद्धिर्भवति, ओजसो वृद्धया मानवः स्वस्थः सन् पूर्णायुः प्राप्तुं शक्यते । अतएव "मरणं बिन्दुपातेन जीवनं बिन्दु धारणात्" इत्युक्तम् । आयुर्वेदविदश्च "आहारस्य परं धाम शुक्रन्तद्रक्ष्यमात्मनः । क्षयो ह्यस्य बहून् रोगान् विविधान् समुदीरयेत् ।" अस्यायमाशयः—अद्याशित आहारो मासे पूर्णे सति शुक्ररूपे परिणमति । तच्च शुक्रं स्वल्पीयस्यामेव मात्रायाम समुत्पद्यते

अतस्तस्य रक्षणे सदैव यतनीयम् । शुक्रस्य रक्षया शरीरमानसबलवृद्ध्या युवा स्वभावि-जीवने बहुपरिश्राम्यन्नपि न स कुत्रापि हीनतां लभते, वीर्यरक्षाप्रभावेणैव स शास्त्राध्ययने, विशिष्टज्ञानविज्ञानार्जने, विविधकलासु च पाटवमधिगम्य जीवनम् समुन्नतिपथन्नयति । ये च तरुणा नानुतिष्ठन्ति शुक्ररक्षणन्ते मानवजीवनं सफल-यितुन्न योग्यतां लभन्ते, विविधव्याधिभिः ग्रस्तास्सन्तश्चाकाल एव कालग्रासभाजो भवन्ति । संक्षेपतो वीर्यरक्षाया द्वि महन्ती फले—प्रथमम्—शारीरिकी बौद्धिकी समुन्नतिः ।

सबल-सन्तति-दानं राष्ट्रस्य वास्तविकी सेवा । सबल-सन्तत्युत्पादनञ्च शुक्र-रक्षयैव भवितुं शक्यते । आसहस्राब्दं यावद् देशस्य पराधीनत्वेन भारतस्य पुरातनी आश्रमपद्धतिर्विलुप्ता, तस्याः यः कुपरिणामोजायत, स चाद्यापि राष्ट्रेणानुभूयते । एतत् सुनिश्चितं वर्तते यद् यस्मिन् देशे राष्ट्रे वा जनानां संख्या स्वल्पीयस्यपि भवेन्नाम किन्तु ते शारीरिक बौद्धिकबलेन सम्पूर्णाः स्युस्तदा तद्राष्ट्रमवश्यमेव समुन्नतेः पथं यायात्, बहुषु मानवेषु सत्स्वपि यदि तेषु शारीरिकबौद्धिकबलाभावो वर्तते तदा तद्राष्टं समुन्नतिं कर्तुन्न प्रभवति ।

वीर्यरक्षया सार्धं विद्यार्जनम् द्वितीयं फलम्—यतो हि केवलेन शरीरबलेनैव भावि जीवनं सम्यग् यापयितुन्न समर्थो भवति जनोऽतस्तदर्थं विद्यार्जनम् नितान्त-मुचितं वर्तते । विद्या नाम—वेत्ति अनया सदसत् वस्तु सा विद्येति निरुक्त्या व्याप-कोऽर्थो ज्ञानं फलति, तच्च द्विविधम् आध्यात्मिकम्, आधिभौतिकञ्चेति । द्विविध-स्यापि ज्ञानस्यावाप्तिः न साधारणी अपितु कठिनतया । मानवजीवनं सफलयितुं द्विविधस्य ज्ञानस्यार्जनं श्रेयोऽस्ति, यदि केवलमध्यात्मज्ञानार्जनं विधीयते तदा प्रजापतेः सृष्टि सञ्चालनं दुष्करं भवेत्, यदि च केवलं भौतिकं ज्ञानमर्जयेत्तदा मानव जीवनस्यान्तिमं लक्ष्यं प्राप्तुन्न प्रभवेत् अतः द्वयोः ज्ञानयोरर्जनमावश्यकम् । किञ्च, केवलेन भौतिकज्ञानार्जनेन लोकभयमेव समुत्पद्येत अतः यावदावश्यकं भौतिकज्ञानार्जनं विधेयम् । अध्यात्मज्ञानञ्च न लोकभीति-प्रदम् अधिकोपार्जितमपि ।

अस्य प्रथमाश्रमस्य पद्धतिः भारतातिरिक्तम् कुत्रापि नासीत् पुराऽपि । अस्या अभावेन राष्ट्रे मानवेषु नितान्तं शारीरिकह्रासो जातस्तेनाल्पायुष्ट्वत्वम्, निर्बलसन्त-त्युत्पादनञ्च । किञ्च, जनसंख्यावृद्धिरपि अस्याः पद्धतेरभावहेतुः । स्वल्पीयसि वयस्येव विवाहविधिना निर्बलबहुसन्ततिसमुत्पादोऽभूत् । एतद् ध्रुवमस्ति यत् बह्व्य सन्ततयो निर्बला एव भवन्ति । अतो देशे पुनरपि सा पद्धतिः प्रचालनीया । देशे

स्वतन्त्रे सञ्जाते नेतारो यदा-कदा ब्रुवन्त्यपि यदध्ययनस्य सा प्रणालिः श्रेष्ठतमा आसीत् अतः सैव पुनः प्रचालनीया। आश्रमपद्धत्यभावेनाधुनाऽपि महत्यव्यवस्थाऽवलोक्यते देशे। नगरेषु, पुरेषु, ग्रामेषु च विद्याकेन्द्राणां सत्तया बालकाः बालिकाः, छात्राः, विद्यार्थिनश्च न ब्रह्मचर्यं पालयन्ति तस्य कुपरिणामो यत्र-तत्र द्रष्टुं शक्यते। पुरा विद्याकेन्द्राणि नगरेभ्यः सुदूरमासन् तेन विद्यासमाप्ति यावत् पूर्णं ब्रह्मचर्यमपालयन् तेन ते शौर्य्यविद्याबुद्धिसम्पन्नाः बभूवुः।

गृहस्थाश्रम :

अयं द्वितीयाश्रमः। अयमेवाश्रमः सर्वेषाम् रक्षकः, ब्रह्मचारिभ्यो वानप्रस्थिभ्यः संन्यासिभ्यश्च भिक्षाः प्रदाय तान् रक्षति अतोऽयं सर्वेषां रक्षकः प्रधानश्चेति। गृहस्थाश्रमस्यार्थः—गृह्णाति धान्यादिकमिति गृहम् तत्र तिष्ठतीति गृहस्थः स चासौ आश्रमश्चेति गृहस्थाश्रमः। अस्यार्थं परिशीलनेनेदं विज्ञायते यद् गृहन्निर्माय निवसनम्, गृहे चैकाकी पुरुषो निवस्तुन्न शक्नोति, अर्थात् गृहस्थशकटस्य द्वि चक्रे भवतः। एकम् पुरुषः द्वितीयञ्च नारी। अतएव महर्षिभिः मानवजीवनसञ्चालनाय, सृष्टिसञ्चालनाय च ब्रह्मचर्याश्रमस्य व्यतीतेषु पञ्चविंशतिवर्षेषु पाणिग्रहणविधिः प्रत्यपादि। "गृहिणी गृहमित्याहुः" इति वाक्येन गृहिण्यैव गृहसंज्ञा भवति न तु केवलेन नरेण। यथा ह्येकेन चक्रेण शकटी गन्तुन्न शक्नोति, तथा केवलेन नरेण गृहस्थाश्रमो न चलति अतोऽसमानगोत्राम्, सुरूपाम्, गुणसम्पन्नाम्, सुकुलोद्भवां कन्यां विवाहयेदिति हि स्मृतिकृद्‌भिरूपदिष्टम्। वस्तुतो गृहकृत्यानि सम्यक् सम्पादयितुं स्त्री एव समर्था नतु पुरुषः, प्रकृतिनियतमेतद् कृत्यमस्ति। यस्मिन् गृहस्थे वनिता सुशीला, गुणसम्पन्ना च स गृहस्थी स्वर्गसुखमनुभवति नात्र कश्चित् संदेहः। अस्मिन्नाश्रमे निवसता नरेण पुरुषार्थचतुष्टयम् समुपार्जनीयम्, सम्यक् स्थिते पुरुषार्थचतुष्टये मनुष्यजीवनं सफलं भवेद्। तच्च पुरुषार्थचतुष्टयम्—धर्मः, अर्थः, कामः, मोक्षश्चेति। मानवजीवनस्य चरमं लक्ष्यम् मोक्षोऽस्ति, परं हि मोक्षप्राप्तिर्न साधारणं कार्यम् तदर्थं पूर्वं पुरुषार्थत्रयम्—धर्मार्थकामाः—सम्यक् परिपालनीयं भवेत्। एषु पूर्वं धर्मस्योल्लेखः, अस्यायमभिप्रायो यत् धर्मप्रधानास्त्रयः पुरुषार्थाः सम्यक् सिद्ध्यन्ति। तत्र धर्मस्य किं स्वरुपम् इत्यस्मिन् विषयेऽत्र विचारयामः—"यतोऽभ्युदयो निःश्रेयससिद्धिः स धर्मः" अस्यायमर्थः—यैः कर्मभिः मानवः समुन्नतिं लभेत स्वजीवनेऽन्ते च परमात्मतत्वे सम्मिलनम् स धर्मशब्देन व्यवह्रियते। केचनाधुनिकशिक्षाशिक्षिताः पण्डितम्मन्याः धर्मस्य विपरीतमर्थं विदधति, ते च धर्मे "मजहब" इति प्रचलिते भाषान्तर शब्दे च न भेदं मन्यन्ते, किन्त्वनयोः शब्दयोरन्तरः उक्तधर्म परिभाषया सम्यगवबोद्धुं शक्यते

धर्मशब्दस्य व्यापकोऽर्थः, मजहब शब्दस्य तु संकुचितोऽर्थः। तत्र सर्वसाधारण जन ज्ञानार्थं कानि तानि कृत्यानि सन्ति येषां करणेन धर्मस्य व्याख्या भवितुं शक्नुयात्। तत्र महर्षिणा मनुना उक्तानि तानि लक्षणानि—धृतिः क्षमा दमोऽस्तेयं शोचमिन्द्रिय निग्रहः। धीर्विधा सत्यमक्रोधः दशकं धर्मलक्षणम्। विचारयन्तु धिषणावन्तो यदेपूक्तलक्षणेषु मजहव शब्दस्य गन्धोऽपि नास्ति। वस्तुतो देशस्य परतन्त्रता कालेपि नहि, अधुनाऽपि विचारशीलानां मानवानामपि बुद्धिः परतन्त्रैव। तदैव ते धर्मशब्दस्य विपरीतां व्याख्यामनुतिष्ठन्ति।

दश लक्षणस्य धर्मस्य सम्यगववोधार्थमत्र किञ्चिद् विस्तरेण विचार्यते—तत्र धृतिशब्द "धृञ्" धारणे इत्यस्माद्, धातोस्क्तिनि प्रत्यये जाते धृतिशब्दो निष्पद्यते, यस्याः धारणं धैर्यं वाऽर्थो भवति। मानवजीवने धृते र्महत्यावश्यकता वर्तते, यतोहि सुख-दुःख हानि-लाभादि द्वन्द्वेषु समये-समये समुपस्थितेषु धृतिरेवानिष्टान्निवारयति। धृत्यभावेन विविधविषय संसक्तं मनोऽपि अनर्थविषयेभ्यो न निवारयितुं शक्यते, चरकाचार्येण लिखितम्—विषयप्रवणं सत्वं धृतिभ्रंशान्न शक्यते। नियन्तुमहितादर्थात् धृतिर्हि नियमात्मिका" धृत्यैव विपदस्तरति मानवः, आपदश्च मानवजीवने समये-समये आयान्त्येव।" अतएव "विपदिधैर्धमथाभ्युदये क्षमा" इति हि नीतिशास्त्रविद उपदिशन्ति। कुल्लकभट्टस्तु धृतिशब्देन सन्तोषमाह।

क्षमा—"क्षमूष् सहने" इत्यस्माद्धातोः क्षमा शब्दो निष्पद्यते, क्षमा शब्द-स्यार्थश्च परेणापकारे कृते तम् प्रति अपकारानाचरणम्, सहनशीलता इति यावत्। मनुष्येऽयं महान् गुणो यतोहि समाजे नैकविधाः पुरुषाः सन्ति, तेषु निवसतः पुरुषस्य सम्पर्कोऽपि विभिन्नस्वभाववद्भिः मनुजैः प्रायेण भवत्येव, अतो व्यवहारविषयेऽन्य-त्र वा सहनशीलताऽवश्यमेव विधेयाऽनया पुरुषस्य महत्त्वं वर्धते। दुर्वलः, सवलो वा यदि कश्चिदपकारं कुर्यात्तदा महतः पुरुषस्येदं कर्तव्यमस्ति यत् स तस्मै क्षमापयेदेव, एतत्तस्य महत्त्वमेव। किञ्च, क्षमा दैवीसम्पदो गुणः, दैवीसम्पच्च श्रेष्ठा मन्यते।

दमः—विकारहेतुविषयसन्निधानेऽपि मनसोऽविक्रियत्वं दमः। मनोनिगुह इति, यदि मनुष्येण स्वमनो निगृहीतन्तदा स आत्यन्तिकसुखभाग् भवति, यतो हि केनचिदुक्तम् "मन एव मनुष्याणां कारणं बन्ध मोक्षयोः" अस्यायमभिप्रायो यत् वशि मनो मोक्षे कारणमस्ति, चञ्चलञ्च वन्धे हेतुः। मनसश्चाञ्चल्यन्तु प्रसिद्धमेव।

क्षणे-क्षणे विविधान् विषयान् चिन्तति, विचारयति, उह्य,ते ध्यायति, संकल्पययति च अतो मनसो निग्रहणे जावात्मनो लाभः ।

अस्तेयम्—अन्यायेन पर धनादिग्रहणं स्तेयन्तद्भिन्नमस्तेयम् । अन्यायोपार्जित-धनादिना स्वल्पा मनसस्तुष्टिरवश्यमेव किन्तु तस्य परिणामस्तु दुःखद एव, यतो हि "अन्यायोपार्जितं द्रव्यं दशवर्षाणि तिष्ठति । प्राप्तेत्वेकादशे वर्षे समूलं नश्यति ध्रुवम्" इत्युक्त्य जीवनमसुखकरमसफलञ्च भवति । परं लोभभिभूतो मानवो नेदं विचारयति । द्रव्यादिलोभाभिभूतो मनुष्यो वहूनर्थानाचरति । यदा च स तस्यानिष्टं फलंलभते तदा भृशं तपति, परं पश्चातापेन न कोऽपि लाभोऽतो बुद्धिमता मानवेन स्तेयन्दूरत एव हातव्यम् ।

शोचम्—यथाशास्त्रं मृज्जलाभ्यां देहशोधनं शोचम्—पवित्रता इति यावत् । स्वास्थ्यरक्षार्थं रोगानुत्पादनार्थञ्च शरीरस्य शुद्धिः परमावश्यकी । मृत्तिकायां जले च विपुलारोगजनकजीवाणुनाशकशक्तिर्विद्यते अतः प्रत्यहमेताभ्यां शरीरस्य पवित्री-करणम् नितान्तमावश्यकमस्ति । अधुनातनाः स्त्रियो मनुष्याः शिशवश्च स्नानार्थञ्ज-लन्तूपयुञ्जन्ति परं मृत्तिकान्न । अस्या स्थाने अम्लक्षारादिद्रव्यविशेषनिर्मितस्य पदार्थस्य (साबुन इति लोके) उपयोगं विदधति परं महाभूतेषु प्रथमनामधेया पार्थिवा मृत् यादृगुपकरोति न तादृगुक्तपदार्थः ।

इन्द्रियनिग्रहः—विषयेभ्यश्चक्षुरादिवारणमिन्द्रियनिग्रहः । इन्द्रियनिग्रहं विना सततमिन्द्रियविषयाणाञ्चिन्तया तेष्वधिकासक्तिर्भवति, तस्य च कुपरिणामोऽव-श्यम्भावी । गीतायाम भगवता श्रीकृष्णेनोक्तम्—ध्यायतो विषयान् पुसः सङ्गस्तेषूप जायते । सङ्गात् संजायते कामः कामात् क्रोधोऽभि जायते ।। क्रोधाद्भवति संम्मोहः । सम्मोहात् स्मृतिविभ्रमः । स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ।। अत इन्द्रियनिग्रहणस्य महती आवश्यकता वर्तते ।

धीः—शास्त्रादितत्त्वज्ञानं धीः । गीतादिसच्छास्त्राणां तत्त्वज्ञानेन मनसः शुद्धि-र्भवति । अस्य शुद्ध्या च चक्षुरादीन्द्रियाणामसद्विषयेषु प्रवृत्तिर्न, ततश्च जीवात्मनो भद्रं भविष्यति ।

विद्या—आत्मज्ञानम् । आत्मज्ञाने सति परमात्मतत्त्वप्राप्तिर्भवति ततश्च जीवात्मा जन्ममरण दुःखाद् विमुच्यते । सत्यम्—यथार्थमभिधानम् । सर्वदा सत्य-भाषणेन मनसि शान्तिः समुत्पद्यते, न च कुतश्चिदपि भयाशङ्का, यतोहि केनचिदुक्तम्

—"सत्ये नास्ति भयं क्वचित्" सत्यवादिनो न कदाचिद् दुःखभाजो भवन्ति। विपुला कीर्तिः—यथा सत्यभाषणशीलानां हरिश्चन्द्र युधिष्ठरादीनामद्यापि ससम्मानं स्मरणं विधीयते जनैः। यः सत्यं वदति लोकास्तं विश्वसन्ति, सत्यभाषिणो मानवस्य लोकद्वयं शोभनम्। केचन भाषन्ते यदसत्यं विना वाणिज्यादिलोकव्यवहारो न चलति, किन्त्वेषा धारणा मिथ्यैव, वाणिज्यादिलोकव्यवहारे सत्यस्य महान् प्रभावो, यदि कश्चित् सत्यपरो भवेन्नाम। लोकेऽपीदं प्रसिद्धं यत् "सांच को आंच नहीं" लेखस्यायमभिप्रायो यत् सत्यभाषणेन यादृशी समुन्नतिर्भवति न तादृशी मिथ्याभाषणेन। लोके सर्वमपि विश्वासाज्जायते, यदा लोके कञ्चित्प्रति "अयं सत्यभाषी" इति विश्वासो भवेत्तदा तस्य न किमपि कार्यमसिद्धं स्यात्।

अक्रोधः—क्रोधहेतौ सत्यपि क्रोधानुत्पत्तिः अक्रोधः। कोपोऽपि क्रोधस्य पर्याय एव। मानवशरीरे क्रोधस्य सत्ता महत्यनिष्टकारिणी, क्रोधात् पित्तस्य वृद्धिर्भवति, यथोक्तम् आयुर्वेदे "क्रोधात् पित्तम्" पित्तञ्चोष्णं वर्तते। पितोष्णतया शरीरे उष्णता वर्धते ततश्च मुखाकृतिः रक्ता, अक्षिणी रक्ते, शरीरे कम्पः। किञ्च क्रोधावस्थायां पुरुषो न किमपि विचारयितुं प्रभवति, अतः क्रोधोऽन्धो भवति इति लोके प्रसिद्धम्। क्रोधेन रक्तस्य गतिः सत्वर सत्वरा भवति ततश्चोच्चरक्तचापारव्धो (हाईब्लडप्रेशर) व्याधिरुपजायते अतो मनुष्येण कदापि क्रोधो न विधेयः। किञ्च गीतायाम् भगवान् श्रीकृष्णः—त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।

कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयन्त्यजेत्॥ अतएव महद्व्यापद्करत्वेन क्रोधस्त्याज्य एव।

महर्षि याज्ञवल्क्यमते धर्मस्य लक्षणम्—

अहिंसा सत्यमस्तेयं शोचमिन्द्रियनिग्रहः।
दानं दया दमः शान्तिः सर्वेषाम् धर्मसाधनम्॥

उक्तपद्ये समागतानां सत्यास्तेयशोचेन्द्रियनिग्रहदमानां विषये प्राङ्निरुपितम्। अहिंसादानशान्तिविषयेऽग्रे किञ्चिद् विचार्यते। तत्र अहिंसा प्राणिनामभिद्रोहः, शरीरमनोवाग्भिः परेषां पीडा न विधेया, एषा शारीरादिभेदात् त्रिविधा शरीराङ्गेन कस्यचिदन्यस्य शरीरे प्रहरणम् शारीरिकीहिंसा, भवति। मनसि कञ्चित्प्रति द्रोहभावना मानसिकी हिंसा, वाचा कञ्चिदपमानयेत् वाचिकी हिंसा, आभ्यो विपरीता अहिंसा। एषा दैवीसम्पदो लक्षणमस्ति। आयुर्वेदविदोऽपि—तत्रा हिंसा सर्वप्राणिनामभिवृद्धिकरा इति प्रोचुः। "अहिंसा परमोधर्मः" इति हि प्रसिद्धमेव।

दानम्—"डुदाञ् दाने" इत्यस्माद् धातोर्ल्युट् "दानम्" इति सिद्धयति । यथा शक्ति प्राणिनामन्नोदकादिदानेनार्तिपरिहारो दानम् । असहायानाम् सहायकरणमिति यावत् । अथवा स्वस्य समीपे किञ्चिदपि वस्तु यद्यधिकं भवेत्तदा तस्यान्येभ्यो वितरणम् येषां समीपे तस्य वस्तुनोऽभावो भवेन्नाम । एतदपि त्रिविधम्—सात्विकराजसतामसभेदात् । तत्र सात्विकं दानम् यदनुपकारिणे दीयते उचिते देशे, उचिते पात्रे उचिते काले च । राजसन्तद् यत्प्रत्युपकारार्थं दीयते, अथ फलमुद्दिश्य दीयते । तामसन्तत् यद् देशकालयोः ज्ञानमकृत्वा अपात्रेभ्यो दीयते विना सत्कृतिम् तिरस्कृति सहितम् वा , वर्तमाने सात्विकदानाभावः, राजसत्तामस दानयोर्बाहुल्यं वर्तते किन्त्वेतयोः फलन्न लभते दाता इति निश्चितमेव । स यथेच्छं मनः सन्तोषयेत् । "दानं भोगो नाशः तिस्रो गतयो भवन्ति वित्तस्य" इत्यनेनापि दानस्य विपुलं महत्त्वमस्ति । किञ्च—

"अन्नदो जलदश्चैव आतुरस्य चिकित्सकः ।
त्रयस्ते स्वर्गमायान्ति विना यज्ञेन भारत । इतिहि भगवान् श्रीकृष्णः ।

किञ्च दानस्यार्थः परेषां सहायताकरणमेव न तु दानग्राहिणो दयापात्राणि सन्तीति विज्ञेयम् ।

दया—आपन्नरक्षणं दया । कृपा दयाऽनुकम्पा स्यादित्यमरः । प्राणिमात्रेषु दया अर्थात् मनसि स्नेहोत्पत्तिरुत्कृष्टोधर्मोऽस्ति । येषां मनुष्याणां मनःसु दया न वर्तते ते न मानवा अपितु विचित्रा प्राणिनः । अस्या अपि दैवी सम्पदि उल्लेखो वर्तते ।

शान्तिः—"शम् उपशमे" इत्यस्माद्धातोः "शान्तिरि"ति शब्दो निष्पद्यते । क्रोधाभाव एव शान्तिरिति फलितार्थः । मानवः शान्त्या निखिलमपि साधयितुं शक्नोति नत्वशान्त्या । अनया मनसि सात्विकगुणः प्रादुर्भवति, सात्विकगुणाच्च ज्ञानं समुत्पद्यते, तच्चोभयलोकसुखकरमिति निश्चितम् । अहो त्रिकालज्ञैरस्माकं महर्षिभिः मनुष्योन्नत्यै सरलसरला उपाया अन्वेषिताः, येषामाचरणेन पुरुषो लोक सुखं लभते । धर्मस्योक्तलक्षणातिरिक्तान्यान्यपि लक्षणानि सन्ति "धारणाद् धर्मं" इत्याहुरिति लक्षणेन धर्मो व्यापकोऽस्ति नतु संकुचितार्थं प्रकटयति ।

मान्याः विचारकाः विचारयन्तु यदुक्तधर्मसाधनलक्षणेषु का नाम संकुचितता । यद्येषामाधारेण मनुष्यो जीवनं वर्तयेत्तदा स सर्वत्र सफलता लभते इह परत्र च किन्तु भाषाविषयेऽधुनापि भारतीयो मानवः परतन्त्र एव तेन शब्दानां यथार्थार्थाभावेन स तत्वं ग्रहितुन्न शक्नोति । एतत् सर्वे जानन्ति यत् महात्मना गान्धिना सत्य— अहिंसा बलेन लोके परा ख्यातिः समुपार्जिता, पर सहस्रवर्षैः पराधीनता

शृंखलानिगडितं देशं स्वातन्त्र्यफलेन संयोजितम् । यदि कोऽपि मनुष्यो यानि धर्मसाधनानि शास्त्रेषु प्रतिपादितानि तानि सर्वाण्येव स्वीकृत्य स्वजीवनं यापयेत्ता स ध्रुवं देवतुल्यो भवत्तथेह परत्रच परमं सुखमवाप्नुयात् । परमाधुनिको मानवोऽर्थस्यानर्थं विदधाति, तस्मात् कारणात् स नेह शान्ति लभते, यस्यात्र शान्ति दुर्लभा स परत्रतु कथं शान्तिं लभेत । अतोऽभ्युदय कामनयैव मनुष्येणेह परत्र च धर्मस्योक्तानि साधनानि आधारीकृत्य जीवनं यापयितव्यम् । किञ्च, लोभाभिभूतेन मानवेन मानवजीवनस्य किमुद्देश्यमिति न कदाचिदपि शान्त्या विचार्यते, किन्त्वहर्निशमर्थप्राप्तिसाधनेषु निबद्धो न किमपि चिन्तयति । परमयं मानवो नेदं विचारयति यदयं मानवदेहः क्षणिको न ज्ञायते कदाऽयं प्रणश्येत् किन्तु" अहन्यहनि गच्छन्ति भूतानि यममन्दिरम् ! शेषाः स्थातुमिच्छन्ति किमाश्चर्यमतः परम्" इति महाराजयुधिष्ठिरस्योक्तिञ्चरितार्थयन्ति-प्रत्यहं स्वाग्रे म्रियमाणान् दृष्ट्वाऽपि । अहो ! कस्याऽयं दोषः, शिक्षाया आहोस्वित् कलेः प्रभावः । कुत्रापि कलेः प्रभावस्तु विद्यत एव परं शिक्षाया आहोस्वित् कलेः अपि दोष एव । कुत्रापि कश्चित् छात्रान् न शिक्षयेद् यत् गृहस्थाश्रममासाद्य युष्माभिः कथं वर्तितव्यम् । सम्प्रति विद्यार्थिषु योऽसन्तोषो जरीजागर्ति सा शिक्षा दोषेणैव, नान्यो हेतुरिति ।

केचन वरिष्ठनेतारोऽनुभवन्त्यपि यदन्तेवासिषु विद्यमानमिदं क्षोभं राष्ट्रहितकरम्, कोऽस्य दूरीकरणोपायः । देशं, समाजम्, नगरम् आत्ममातृपितरौ, बान्धवान् प्रति किंकर्तव्यमस्माकमिति शिक्षा छात्रेभ्यो दीयत एव न तदा कथन्ते स्वकर्तव्यं जानीयुः । हिन्दवो यवना इशायिनस्तथाऽन्यमतावलम्बिनश्च ये सन्ति तेषां सर्वेषां कृते उक्तानि धर्मसाधनलक्षणानि हितसम्पादकान्येव सन्ति पुनः कथं विरोधो विधीयते एभिः लक्षणैः सह इति न जानीमो वयम् ! धर्मस्य वास्तिवकमुद्देश्यमस्ति यन्मानवो मानवं परिचिनुयादिति । ननु मानवो मानवं प्रति द्रोह मुत्पादयेत् । कैश्चिद् विरोधिभिरिदं प्रचारितम् स्वार्थसाधनाय यद् धर्मेण देशस्य दुर्गतिर्बभूव । किं कोऽपि विज्ञो निगदितुं शक्नोति यदुक्तलक्षणैः क्वचिदपि कस्यापि दुर्गतिर्भवति अथवा सद् गतिः । वस्तुतोः भारतीयमानवस्य विचारशक्तिरधुनाऽपि पराधीनतामेवावलम्बते तस्मादेव कारणात् स धर्मं देशप्रगति कारणं प्रति-उदासीनः । ईश्वर इदृग्विचारशालिभ्यो मानवेभ्यः सद्बुद्धिं दद्यात् येन ते स्वीय देशस्य च समृद्धौ हेतवो भवेयुः ।

अर्थः—अर्थ्यते सर्वैरिति अर्थः इति परिभाषया लोकाः यं सततं कामयन्ते स अर्थः, सुवर्णादिरिति चक्रः । मानवो यथा-यथा सभ्यतां शिक्षितवांस्तथातथा तस्या

वश्यकता अपि समोधिता, तासां पूर्त्यर्थं धनस्यावश्यकता भवत्येव । केचन जना इत्थं प्रवदन्ति यदिदमर्थस्य युगम् किन्तु अर्थस्य-धनस्यावश्यकता सर्व देव मनुष्याणा मासीत् भवष्यति, भवति च । आयुर्वेदविदोऽपि तिसृषु एषणासु मध्ये धनैषणां वर्णयामासुः । वस्तुतो धनस्यावश्यकता मनुष्याणां सर्वावस्थासु सर्वदैव भवति । धनमन्तरा मनुष्यो न किमपि कर्तुं प्रभवति । अन्नवस्त्रयात्रादिषु दैनिकोपयोगिवस्तूनां क्रीणनार्थञ्च द्रव्यस्यावश्यकता भवत्येव । तद् धनं द्रव्यं वा कथङ्कारमुत्पादयेदिति व्यवस्थाऽपि प्रतिपादिता पूर्वैः । आयुर्वेदेऽपि धनार्जनाय "कृषि पाशुपाल्य राजोपसेवादीनि यानि च सतामविगर्हितानि तानि आरभेत कर्तुमिति" चरकाचार्यैः प्रत्यपादि तत्रैतेषूपायेयु सर्वतः प्रधाना स्वतन्त्रा च कृषिरस्ति, यद्यपि "कृषिः क्लिष्टा" इत्युक्त्यनुसारेण कृषेः काठिन्यन्तथापि द्रव्योपार्जनस्याऽयं स्वतन्त्रो मार्गः । कृषौ सर्वप्राणिनां जीवनं निर्भरमस्ति । "अन्नं वै प्राणाः" इति श्रुत्या कृषिकर्तारो जनाः प्राणदातारः सन्ति । अस्माकं देशोऽपि कृषिप्रधानो वर्तते। अन्यानिसर्वाणि साधनानि कृषेः न्यूनतमानि सन्ति परन्तु सर्वेजनाः कृषिं कर्तुंन्न प्रभवन्ति अतः पशुपाल्य वाणिज्य-राजोपसेवादिषु यद् यस्मै रोचते स तत्कार्यं कुर्यात् । वाणिज्यमपि स्वतन्त्रम् परमस्मिन् यदा-कदा लाभापेक्षया हानिरधिका भवेत्तदा जीवनयात्रासञ्चालने बाधा समुपजायते । यद्यपि अास्मिन् हानेरवसरो प्रायो नायाति तथापि यद-कदा भवेदेव । राजोप सेवारूपं वित्तार्जनसाधनं परमं परतन्त्रमस्ति, यतोहि नयकृद्भिः "सेवाश्ववृत्तिरा ख्याता" उक्तं । किन्तु स्वामिभृत्ययो यदि परस्परं सौमनस्यं भवेत्तदा नाधिकं पारतन्त्र्यं भवति किन्तु एतत् प्रायो दुर्लभमेव, विशेषत आधुनिकेषु स्वामिसु नास्त्येतादृशं सौमनस्यम् । आधुनिकाः स्वामिनस्तु स्वात्मानं बहु मन्यन्ते किन्तु ते नानुचिन्तयन्ति यदीश्वरीयसृष्टौ धनिनिर्धनयोः नास्ति कश्चिद्भेदः परं किं क्रियते । भृतिकर्तृभिस्तु भृतिविधेयैव, नास्त्यन्यो ह्युपायः । कुसीदमपि धनार्जनस्य शोभनं साधनमस्ति परमुचितरुपे कुसीदग्रहणमेवास्ति, न त्वनुचितरुपे । अयमुपायोऽपि स्वतन्त्रः, परं यदा-कदा मुद्राग्राही म्रियेत अथवा कपटतामाचरेत् धनाभावो वा भवेत् केनापि हेतुना तदा मूलधनस्यापि हानिरेव किन्त्वयमवसरो न सर्वदाऽऽयाति ।

सम्प्रति राजकीयास्तत्सम्बद्धा वा मुद्राविनिमय कर्तारो (बैंक) निलयाः सन्ति ते कुसीदे नैव जीवन्ति । वस्तुतः समुचितकुसीदग्रहणन्नानुचितम् । एतदतिरिक्तं बहूनि शिल्पान्यपि सन्ति यैः विपुलं द्रव्यं समुपार्जितुं शक्यते । धनार्जनस्य बहूनि साधनानि सन्ति तानि यथेच्छं मानवः स्वबुद्ध्या परीक्ष्य कर्तुं प्रभवति किन्तु तानि निखिलानि धर्मपूर्वकाणि भवेयुः, यतोहि अन्यायोपार्जितधनन्न चिरस्थायि न च सुखदम्, यतोहि

कदाचिच्चौरभयम् कदाचिच्च राजभयम्, कदाचिदन्यादिभीतिः । अतएव केनाचिदाचार्येण लिखितम् "अन्यायोपार्जितं द्रव्यं दशवर्षाणि तिष्ठति । प्राप्ते त्वेकादशे वर्षे समूलं नश्यति ध्रुवम्" एतद् बहुशोऽनुभूतचरम् यदन्यायोपार्जितं वित्तं न स्थायित्वं लभते अतो महर्षिभिः पुरुषार्थचतुष्टयेषु पूर्वं धर्मस्योल्लेखः कृतः । धर्मपूर्वकोपार्जित अर्थ एव श्रेयानस्ति । अधर्म पूर्वकोपार्जितद्रव्येण पुरुषः सर्वदा सशङ्कितस्तिष्ठति, सर्वदा शङ्काशीलस्थितया रात्रिनिद्रा विनष्टा भवति, न चाहारो रोचते, न मनस्सि शान्तिः, प्रतिक्षणं मनो भयविह्वलस्तिष्ठति । विचारयन्तु, यद् धनं पुरुषेण सुखार्थमर्ज्यते यदि तस्माद् दुखमुत्पद्यते चेत्तदा तस्योपार्जनं न किमपि सुफलमधिगतम् । तादृशधनोपार्जनापेक्षया तु निर्धनतैव शोभना, अत एव धर्मेणैव वित्तोपार्जनं विधेयम् अधर्मोपार्जितधनेन संकृत् पुरुषः मनः सन्तोषमनुभवति किन्तु तस्य परिणामस्तु दुःखद एव धर्मोपार्जित वसुना न मनसो ग्लानिः, नतश्चिदपिभीतिः तथा तस्य सदुपयोगो भवति । अन्यायोपार्जितद्रव्यस्य सदुपयोगो न भवति, एतत् ध्रुवसत्यमस्ति ।

मानवो विपुलं वित्तं सञ्चिनुयादत्र न कस्यापि विप्रतिपत्तिः किन्तु वित्तं सञ्चित्य तस्यैकत्र निगडनं महदनुचितम् । किञ्च सञ्चितवित्तेनैक एव मानवोऽथवा केचनाङ्गुलीगणनीयाः स्वल्पा एव भौतिकसुखानि लभेरन् अन्ये चान्नवस्त्रादिभिः क्लिश्यमानाः स्वभाग्यं दूषयेयुरित्यपि महदनुचितम् । यतो धनं नैकस्य कस्यचिदपि भवितु शक्यते, तत्र सर्वेषां समानाधिकारो वर्तते, यथा वायुसेवन, जलसेवन, सूर्यातपचन्द्रज्योत्स्नासेवनादिषु सर्वेषां समानाधिकारो वर्तते तथैव धनसेव नेऽपि सर्वेषां समानाधिकारो वर्तते । अत एव पूर्वैः धनस्योपयोगविषये—"दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य । यस्य न दानं न भोगस्तस्य तृतीया गतिर्भवति ।" अत्र पूर्वं दानस्योल्लेखः कृतः । प्राचीनाः जना इत्थञ्चक्रुरपि । सकला अपि जानन्तीति हासविदो यत् पुरा भारतसम्राजा राजर्षिणा रघुणा दिग्विजये समानीतं सकलमपि वसुजातम् स्वप्रजाभ्यो वितरितम्, तेनात्मसमीपे न किञ्चिदपि रक्षितम् । भारतस्य चक्रवर्ती सम्राडपि स्वयं पानभोजनादिषु मृत्पात्राणि नियुयुजे । नीतिशास्त्रकारैरपि "उपार्जितानां वित्तानां त्याग एव हि रक्षणम्" इत्युक्तम् । किमियं पद्धतिरवलम्ब्यतेऽधुनातनैः जनैः ।

अद्य सर्वत्र स्वामिभृत्ययोः यः संघर्षश्चलति तस्यायं हेतुरस्ति यत् केचन पुरुषा वित्तस्योपरि स्वात्मन एकाधिपत्यं मन्यन्ते, त इत्थन्निगदन्ति यदीश्वरेणास्मभ्यो दत्तमिदं वसुजातम् किन्तु ते न स्मरन्ति शास्त्रीयं वचः "यावद्भ्रियेत जठरं तावद् सत्त्वं

हि देहिनाम् । अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ।" वस्तुतो लोभाभिभूतैरेव मानवैरिदन्निगद्यते यद् वयं धनस्वामिनः स्मः किन्त्वेतत्कथनन्तेषामनुचितमेव । न कोऽपि जनः धनस्य स्वामी, यदि कश्चित्तान् पृच्छेत् किं युष्माभिः जन्मना सार्धं समानीतमिदं वित्तम्, किञ्च मरणे सति सार्थमेव नेष्यथ यूयं ? तर्हि ते प्रश्नस्यास्य किमप्युत्तरं दातुन्न प्रभविष्यन्ति । तेषामयमाग्रहः अज्ञानमूलकः, अद्यावधि धनं न कोऽपि स्वजनिना सार्धं मानीतवान् न च मृत्युना सह नेष्यति तर्हि किमर्थं लोभाभिभूतेन तेन मुधैव प्रभाष्यते । साम्प्रतमेष दुराग्रहो न चलिष्यति तेषामतः समये सति तैरवश्यमेव विचारणीयम् आयुर्वेदविदोऽपि "नैक सुखी" अर्थात् पुरुष एकाकी एव सुखी न स्यात् किन्तु समर्थः पुरुषः स्वसामर्थ्येनान्यानपि सुखिनो विदध्यात् । यो मनुष्य आयुर्वेदोक्तं वाक्यं चरितार्थयति स्वजीवने स एव मनुष्यो मनुष्योऽन्ये तु आत्मानं मनुष्यसंज्ञया निगदितुन्नाधिकारिणः । साम्प्रतम् "उदारचरितानान्तु वसुधैव कुटुम्बकम्" सिद्धान्तोऽयं लोभाभिभूतैर्न मन्यते किन्तु ते मामन्यन्ताम्, कालस्य प्रवाह एकदा तान् विवशान् विधायाऽवश्यमेत्र मानयिष्यते । अस्तु, अलमति विस्तरेण , वित्तस्योपार्जनं धर्मपूर्वकमेव विधेयम्, धर्मपूर्वकमेव तस्य दानादिना त्यागोऽपि करणीयो न त्वेकत्र तस्य केन्द्रितकरणम् । अस्मिन्नेव मानवस्य श्रेयांसि निहितानि । अन्यथा पुरुषो महत्कष्टमनुभविष्यति । जीवने च न शान्तिं प्राप्स्यति ।

कामः—क्षितिमण्डले यथा-यथा मानवानां संख्यावृद्धिर्बभूव तथा-तथा तेषां श्रेयोनिमित्तं महात्मभिर्बहुविधो विचारो विहितः । तेषु मानवानां क्षेमाय तैस्त्रयः पुरुषार्था अन्वेषितास्तत्र धर्मार्थौ पुरुषार्थौ इतः प्राक् वर्णितचरौ । अधुना कामविषये किञ्चिद् विचार्यते । तत्र "कमु कान्तौ" इत्यस्माद्धातोः काम्यते इति कामः, समनस्क चक्षुरादीन्द्रियजन्याः शब्दस्पर्शरुपरसगन्धाः । कामः वनितापरिष्वङ्गादिरिति चक्रः, काम शब्देन मनोज्ञाः शब्दादयो विषयास्तथा कामदेवश्चापि गृह्यते । संसारे यथाऽर्थो मानवानांकृते उपयोगी तथैव मनुष्यजीवने सुखसंज्ञकं सुखं लब्धुं कामस्यापि आवश्यकता वर्तते, किन्तु स धर्मपूर्वक एव लाभकरो न त्वधर्मपूर्वकः । यथा ह्यर्थो धर्मपूर्वक मुपार्जितो मानवकल्याणाय सम्पद्यते तथा कामोऽपि धर्मपूर्वक एव मानवशर्मणे समर्थो भवति, किञ्च धर्मपूर्वकः कामो भगवत्स्वरुप एव, तथाहि गीतायाम् "धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभः" । अधर्मपूर्वकः कामो मानसरोगाय, यथाऽऽचार्य- सुश्रुतेनोक्तम् "मानसास्तु व्याधयः कामशोकलोभभयादयः" इति । किञ्चाधर्मपूर्वकः सेवितः कामः प्रतिक्षणं चिन्त्यमानो मनसि निगूढत्वेनादृश्यो भवति । स च समयं प्राप्य उदीर्णो भूत्वा मानसमपि कदर्थयति ततः क्रमेण तास्ता अवस्थाः प्राप्य नाशाय जायते, भगवता वासुदेवन चोक्तम्—

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते ।।
क्रोधाद् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ।।

अस्मादेव कारणाद्भगवान् श्रीकृष्णोऽधर्मपूर्वकं सेवितं कामं नरकस्यायतनम् निजगाद, तथाहि "त्रिविधं नरकस्येयं द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभ स्तस्मादेतत् त्रयन्त्यजेत् ।।" पूर्वं लिखितं यत् समनस्कचक्षुरादीन्द्रियजन्याः शब्दादयः कामाः इत्युक्त्या कामः शब्दादिविषयान्तर्गतः विषयाश्च "विषिन्वन्ति विषयिणमनु वध्नन्ति" इति विषयाः, अनया व्युत्पत्त्या कामोऽपि विषयः स चाधर्मपूर्वको निषेवितः पुरुषं वध्नाति, वन्धश्च दुःखकारणमिति निश्चितमेव । किञ्चातिनिषेवितः कामो न विनश्यति किन्तु विपुलसेवनेनाधिकाधिको वर्धत एव, यथा श्रीमद्भागवदे "न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ।।" मात्रयाऽधिक सेवितः काम इह शारीरिकमानसिकव्याधिप्रदः सन् नायुषो वास्तविकं लक्ष्यं पूरणे क्षमः । किञ्च वनितापरिष्वङ्गादिकामोऽपि मात्राधिकसेवनेन शुक्रक्षयजन्यरोगानाप्याकाले कालग्रासे निपातयति । मात्रयाऽधिकनिषेवितः कामः स्वकरात् प्रभ्रष्टो मणिरिव वहुदःखप्रदः । किञ्च, मानवजीवनस्योद्देश्यं केवलं कामसेवनमेव न अपितु चतुर्षु पुरुषार्थेषु यथासमयम् सर्व एव सेवनीयाः ।

कलौ मानवानामायुरपि स्वल्पम्, केवलं शतवार्षिकमेव, एतावति स्वल्पीयसि समयेऽर्धंतु निद्रया व्यत्येति अवाशिष्टासु पञ्चाशत् समासु चतुःपुरुषार्थेषु प्रत्येकस्य विभागे सति सार्धद्विदशाब्दाः समायान्ति इत्थं स्वल्प एव समयो वर्तते यस्मिन् वहु प्राप्तव्यमस्ति, अतएव पुरुषेण वनितापरिष्वङ्गादिकामः शब्दादिविषयात्मकश्च न सङ्गमास्थाय सेवनीयः अपितु कामे सङ्गं विहाय धर्मपूर्वक एव सेवनीयस्तस्मादिह परत्र च महद् सम्पद्येत । केचन पुरातना आधुनिकाश्च कामं तच्छाधनार्थञ्चैवाधिकं मन्यमानाः अहर्निशं तौ प्राप्तुं प्रयत्नपराः दृश्यन्ते, अर्थकामयोः पृष्ठे धावमानास्तेऽन्धा इव नान्यत्किमपि समीक्षन्ते, तेषां पद्धतिरियमेवास्ति यत् "यावज्जीवेद् सुखंजीवेत् ऋणं कृत्वा घृतं पिबेत् । भस्मीभूतस्य देहस्य पुनरागमनं कुतः ।। इति । परमेतादृशः कियन्तः सन्ति ये पद्योक्तमार्गमनुसरन्त कमपि समुदयमलभन्त, किञ्च यथा शरीरमनित्य न्तथाऽर्थकामावपि न चिरस्थायिनौ, अतएव भगवता— "ये हि संस्पर्शजाः भोगाः दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय ! न तेषु रमते बुधः ।। उपदेशेनानेन स्पर्शं जन्येषु शब्दादिषु वनितापरिष्वङ्गाभिधे कामे च विरतिः प्रतिपादिता । यदा मनुष्येषु

रजो वर्धते तदैव तेषु कामोऽवकाशं लभते किन्तु तस्य कः परिणाम इत्यपि पुरुषेण द्रष्टव्यम् । तथाहि— "काम एव क्रोध एव रजोगुणसमुद्भवः । महाशनो महापाप्मा विद्धयेनमिह वैरिणम् ।।" अत्र कामं महाशनम् महापाप्मानं वैरिणंञ्च प्रोवाच भगवान् । अस्यायमाशयः महदशनं यस्य स महाशनः अर्थात् समधिकः सेवितः कामः शरीरनाशाय सम्पद्यते तथाऽस्य पापात्मना इह परत्र च नितान्तं सुखाभावः किञ्च वैरिणो यथा समूलन्नाशयन्ति तथाऽयमपि मानवान् प्रणाशयत्येव । परिणामतया पुरुषः स्वलक्ष्याद् भ्रष्टः सन् न ज्ञायते कां गतिमाप्नुयात् । कामात्मनो जना बहुदुःख-भाजो भवन्ति एतत् प्रत्यक्षं प्रत्यहं द्रष्टुं शक्यते । यद्यपि विषयेन्द्रियजन्यम् कामसुखम् तत्क्षणमानन्दं जनयति परं परिणामे तु तत् भयङ्करमेवात एव तत् राजसुखनाम्ना व्यवह्रियते । तत्तु हेयमेव सुखैषभिरिति । यच्च सात्विकं सुखन्तम् निषेवणीयम् । यद्यपि तन्न सद्यः सुखकरन्तथापि परिणामे तु सखदत्वेन लाभदमेव ।

श्रेष्ठिवर्य ! मानवदेहं सफलयितु ब्रह्मचर्याश्रमकृत्यानि गृहस्थाश्रमकर्तव्यानि तथा ऽत्रात्युपयोगिनस्त्रयः पुरुषार्थाः धमार्थकामाः व्याख्याताः । सम्प्रति भवतो वयः पञ्चाधिकपञ्चाशतवर्षपरिमितंजातमतः शास्त्रानुसारमिदं वयो न गृहस्थाश्रमयोगि अपितु गृहस्थस्य सर्वोऽपि भारो यूने सूनवे समर्प्य स्वयमेकाकी सभार्यो वा विगततृष्णः सन् भगवन्तं परमेश्वरं प्रसादयितु तदाराधनतत्परो भवेन्नाम । अस्माकं पूर्वजाना मियमेव पद्धतिरासीत् । सहस्रवर्षाणि यावद् देशस्य पराधीनत्वेनाश्रमपद्धतिर्विलुप्ता केवलं गृहस्थाश्रम एव यथाकथञ्चिच्चलति । सम्प्रति वानप्रस्थाश्रमं सन्यासाश्रमञ्चापि न कोऽपि निषेवते, अधुना परिस्थितिरपि परिवर्तिता, चेत् पुरुषः कामयेत तदाऽधुनापि वानप्रस्थसन्यासाश्रमौ सेवितुं शक्यौ स्तः ।

मानवदेहे पञ्चाशत् समावधिरेवोत्साहशक्तिः कर्मकरणे ततः परं क्रमेण शरीराङ्गेषु शिथिलेषु जायतेऽसामर्थ्यमिति । किञ्च, यदा पुत्राः समर्थाः गृहस्थभारं वोढुं योग्याश्च भवेयुस्तदाऽवश्यमेव तेभ्यो गृहस्थभारं समर्प्य स्वयं विरक्तवज्जीवनं यापयेत् । यद्यपि गृहस्थकर्माणि परिहाय गृहेषु निवसन्नपि पुरुषः पारलौकिकं श्रेयः प्राप्तुं शक्यते तथापि परमपुरुषार्थप्राप्त्यै एकान्तवास एव श्रेयान् । एतदर्थमेव पुरा वानप्रस्थसंन्यासाश्रमयोः परिपाटी परिचालिता महर्षिवर्यैः ।

मानव-जननमिदन्न सुलमं विभिन्नयोनिषु परिभ्रमन्नयं जीवो यदाऽमूल्यं मानव शरीरं प्राप्नोति तदा स्वक्षेमायाऽवश्यमेव यतेत । मोक्षमन्तरा नात्यन्तिक-सुखावाप्तिः ।

श्रेष्ठी—महीसुर वर्य! केचन पुनर्जन्म नेच्छन्ति, मरणानन्तरं यदा पुनर्जन्म एव न स्यात्तदा कस्य मोक्षः। शरीरस्य मोक्षस्तु प्रत्यक्षमवलोक्यते एव। चार्वाकादयश्च "भस्मीभूतस्य देहस्य पुनरागमनं कुतः" इति मन्यन्ते, अतएव केचन जन्मकारणं मातृपितरौ मन्यन्ते, केचन स्वभावम्, अन्ये पुनः परनिर्माणम्, यदृच्छां वा जन्मकारणं मन्यन्ते, अतो मम पुनर्भवविषये सन्देहोऽस्ति । श्रीमन्तो गृहीतविद्याः सन्तः सन्ति, अतोऽहं प्रार्थयामि भवन्तं यदेषः संशयश्छिद्यताम् भवता ।

पुरोधाः—श्रेष्ठिवर्य ! नास्तिकवृत्तिमाश्रिताः जना एव पुनर्भवन्नेच्छन्ति, किन्त्वास्तिकास्तु पुनर्भवं मन्यन्त एव । वेद्म्यहं एतावतैव भवतो मनसस्तुष्टिर्न भविष्यति अतोऽहं प्रमाणैः पुनर्भवं साधयिष्यामि । यत् प्रमाणैः सिद्ध्येत्तत्तु मन्तव्यमेव । पूर्वं नास्तिकानां मतनिरसनपूर्वकं पुनः प्रमाणपुरःसरं पुनर्भवं स्थापयिष्यामि । तत्र पूर्वं मातृ-पितृ जन्मकारणं निरस्यते—

यदि मातरंपितरं वा जन्मनि हेतुं मन्येत तदा गर्भे य आत्मा सपदि मातुरागच्छेत्तदा तस्याः मरणं स्यात्, यदि च पितुरात्मा गर्भं गच्छेत्तदा पितुर्मरणं स्यात् । ननु यदि आत्मनोंऽश एव गच्छेत्तदा तु मृत्युर्न स्यादिति चेन्न, यतो हि परमसूक्ष्मस्यात्मनोऽवयवो नास्ति अतः मातृपित्रोरेकस्य मरणमवश्यमेव भवेत् किन्तु नैतद् दृष्टं कदाचिदपि अतो युक्तिविरोधात् न मातृपितरौ जन्मकारणं स्वीकर्तुं शक्यते । एवमेव बुद्धिरपि गर्भे पितुः मातुर्वा यदि गच्छेत्तदा द्वयोरेकस्य बुद्धिराहित्यं स्यात् । इत्थमेव मनोऽपि कस्यापि गर्भे गच्छेत्स एव चित्तरहितो भवेत् किन्तु नैतद् दृष्टमतो न वरम् । किञ्च, मातृपित्रोः जन्मकारणे स्वीकृते सति भूतानां चतुर्विधा योनिर्न स्यात्, यतोहि संस्वेदनानामुद्भिज्जानाञ्च मातृपितरौ न जन्मकारणे हेतू स्तः ।

स्वभावोऽपि गर्भजन्मनि न हेतुः यतोहि महाभूतानि (पृथ्वी, जलम् तेजोवायुराकाशञ्च) अचेतनानि सन्ति स्वभावेनैव, प्रत्येकं यदचेतनं तन् मिलितानामपि अचेतनमेव, चैतन्यञ्च तेषु जीवात्मना युज्यते, यद्यात्मा न स्वक्रियेत तदाऽचेतनैः महाभूतैः गर्भे कुतश्चैतन्यम् । ननु पृथिव्यादीनां परस्परं संयोगः स्वभावेन भूत्वा शरीरेषु चैतन्यं भविष्यतीति, सत्यम्, किन्तु इत्थं स्वीकारेऽनवस्थादोषः स्यात्, यदि स्वभाव एव सर्वत्र कारणं मन्येत तदा कुत्रचित् तस्माद् वैपरीत्यमपि सम्भाव्येत किन्तु नैतद् दृष्टमतः स्वभावेनैषां संयोगे न भवति, विनाऽत्मसंयोगेन केवलं मिलितानाम् भूतानां संयोगमात्रेण न चैतन्यं सम्भवति अत आत्मा स्वीकरणीय एव, तस्य च संयोग वियोग हेतुः प्राक्तनं कर्म, प्राक्तनकर्मस्वीकारे पुनर्जन्म सिद्ध्यत्येव ।

जीवात्मा अनादिमध्यनिधनोऽतस्तस्य परं निर्मितिरसम्भवैव, पर शब्देन यदि आत्मा ह्यभिप्रेतस्तदा तु पूर्वजन्म सिद्धमेव। जन्मनि यदृच्छाकारणवादिनां मते न काऽपि परीक्षा, न किञ्चदपि परीक्ष्यम्, तत्र न कर्ता, न कारणम्, ते देवताः, ऋषीन्, सिद्धान्, कर्माणि, कर्मफलानि च न मन्यन्ते अतस्तेषां वादे प्रमाणाभावत्वेन तदस्वीकार्यमेव। अतो बुद्धिमान् नास्तिक्यबुद्धिं विहाय सन्देहञ्च निःसार्य, प्रमाणैः सिद्धं पुनर्भवं स्वीकुर्यादेव।

तत्र प्रत्यक्षानुमानाप्तोपदेशयुक्तय इति चत्वारि प्रमाणानि सन्ति, सदसतां परीक्षा एभिः प्रमाणैर्विधीयते। तत्र प्रत्यक्षेण पुनर्जन्म साध्यते––जननिजनकयोः समयोरपि अपत्यानि विसदृशानि भवन्ति––यथा कश्चित् कुरूपः, कश्चित्सुरूपः। तुल्येषूत्पादकहेतुषु सत्स्वपि कश्चिद् गौरः, कश्चित् कृष्णः कस्यचित् स्वरोरमणीयः, कंचिद्कांस्यप्रतिमः, कश्चिल्लघुः, कश्चिद् दीर्घः, कुत्रचित् सत्वोत्कर्षता, कुत्रचिदल्पता, केचिद् धीमन्तः, केचन मूढाः, केचिद्वसुमन्तः, केचिन्निर्धनाः। केषाञ्चिदुच्चकुलेजन्म, अपरेषां हीनकुलेजन्म, कुत्रचिद्दासता, कुहचिदैश्वर्यम्, कस्यचित्सुखायुः, कस्यचनासुखायुः, आयुषोऽपि वैषम्यं दृष्टम्, अर्थात्केचनाल्पायुषि म्रियन्ते, अपरे पुनः पूर्णायुः लभन्ते इत्थं विषमता दृष्टा। इह कृतस्यावाप्तिः, रोदनस्तनपानादीनामशिक्षितानां प्रवृत्तिर्दृश्यते, अर्थात् नवशिशवो विना शिक्षयैव जन्मनोऽनन्तरमेव रुदन्ति, स्तन्यं पिबन्ति चात्र को हेतुः? अत्र पूर्वजन्मैव कारणम्, यतो हि बिना स्मरणमेतानि न भवितुं शक्यन्ते स्मरणञ्च पूर्वज्ञानं बिना न भवतीति पूर्वजन्मज्ञानानुमानात् परलोकानुमापका भवन्ति। इत्यनुमानेनापि पुनर्भवः सिद्ध्यति।

सामुद्रिकशास्त्रोक्तलक्षणानां क्वचिदुत्पत्तिर्न सर्वत्र कर्मसादृश्येऽपि फलविशेषः, क्वचित् कर्मणि मेघा, क्वचित्कर्मण्यमेघा। वहवः पूर्वजन्म स्मरन्ति, स्वपूर्वजन्मवृत्तं कथयन्ति तच्च तथैव मिलति, एतच्च वृत्तपत्रेष्वपि यदा-कदा पठन्त्येव मतिमन्तः। मृते सति पुनर्जन्म नूनं भवति, समदर्शने प्रियाप्रियत्व मित्थं प्रत्यक्षं दृश्यते पुनर्जन्मचिन्हम्। बिना पूर्वजन्मकृतकर्मविशेषेण कथं वैषम्यं दृश्यते। अतोऽनुमीयते वैषम्यमिदं पूर्वजन्मकृत कर्मनिमित्तमेव।

युक्त्या पुनर्भवः साध्यते––पृथ्व्यप्तेजोवाय्वाकाशानि पंचभूतानि सन्ति, एतान्यचेतनानि, चेतनता चात्मसम्बन्धे न भवति अतः षड्धातुसंयोगात् गर्भजन्म "खादयश्चेतनाषष्ठाः धातवः पुरुषः स्मृतः" इत्युक्त्या। आत्मा च परलोकसम्बद्ध एवेति परलोकसद्भावे युक्तिरूपदर्श्यते। शरीरेषु याः क्रियास्ताः कर्तृ-आत्मा करण–मन आदि संयोगाद् भवन्ति, कर्ता चात्मा स च परलोकसम्बद्ध इति पुनर्भवः

सिद्ध्यति । प्राणी यत् कर्म कुरुते तस्य फलमवश्यम्भावी, अकृतस्य तु कर्मणः न किमपि फलम् । बीजादेवांकुरोत्पत्तिर्भवति नाबीजादिति युक्त्या आत्ममन इन्द्रिय संयोगेन शरीरेषु कर्मणामङ्कुराणि समुत्पद्यन्ते । इह मनुष्यो यादृशं कर्म कुरुते तादृशमेव फलं लभते, कर्म च सत्येव पुनर्भवेऽतो युक्त्यापि पुनर्नवः सिद्ध्यति ।

आप्तोपदेशेन पुनर्भवः साध्यतेऽधुना—तत्राप्ताः यथार्थवक्तारस्तेषां वाक्यमसंशयं सत्यं भवति, रागद्वेषरहितत्त्वेन ते कदाऽपि मृषा न ब्रुवन्ति अतस्तेषां वाक्यमपि प्रमाणम् । आप्तागमे वेदाः, पुराणानि, स्मृतयश्च सन्ति, तेषु पुनर्भवस्योल्लेखो वर्ततेऽत आस्तिकैरस्माभिः पुनर्भवे संशयो न विधेयः । आप्तागमेऽभ्युदयनिःश्रेयसः प्राप्तये दानतपोयज्ञसत्याहिंसाब्रह्मचर्यादीनि समुपदिष्टानि । धर्मशास्त्रेषु रजस्तमोयुक्तानान्न मोक्षः प्रतिपादितः । एवं चतुर्भिः प्रमाणैः पुनर्भवः सिद्ध्यति ।

श्रेष्ठिवर्य ! जनने, ततो हानिलाभ रोगशोकादिभिः, पुनश्च मरणसमये प्राणिभिर्महत्कष्टमनुभूयते इत्यस्माभिः प्रतिदिनं प्रत्यक्षमनुभूयतेऽतो मानवेन क्षणिकसुखप्राप्तिसाधनानि विहाय परमसुखप्राप्त्यै यतनीयम् । अग्रे संक्षेपेण को मोक्षस्तस्य प्राप्त्युपायाश्च के इति वर्णयामि तव पुरस्तात् ।

गृहस्थाश्रमे निवसन्मानवो मोक्षपदन्नधिगन्तुं शक्नोति अतः पूज्यतमैः महर्षिवर्य्यैस्तदर्थं वानप्रस्थसंन्यासाश्रमौ प्रतिपादितौ । अनयोराश्रमयोः पुरुषः स्वभार्यां पुत्रेषु निक्षिप्य स्वयं वनमेत्य तत्र रागद्वेषरहितञ्चेतो विधाय सततं भगवदाराधनपूर्वकं चान्द्रायणादि व्रतानि आचरेत् "ऋते ज्ञानान्न मुक्तिः" इति हि श्रुतिः । ज्ञानञ्च तत्त्वदर्शि गुरोर्विना न भवति अतः कञ्चिद् योगिनं गुरुं कृत्वा तत्सकाशाद् योगाभ्यासो विधेयः । हि "योगो मोक्ष प्रवर्तकः" इति लिखितम् । योगशब्दस्य प्रकरणानुसारमनेकेऽर्थाः सन्ति परन्तु प्रकृते "योगश्चित्तवृत्ति-निरोधः" अस्यायमाशयो यत् मनसो ये विषयास्तेभ्यो मनो व्यावर्त्य आत्मनि वृत्तिर्विधेया । विषयेभ्यो मनसो व्यावर्तनं न साधारणं कर्म अपितु तदर्थं बहुप्रयत्नो विधेयः । मोक्षप्राप्तिः परमदुर्लभा, सा च ज्ञानेन भक्त्या वैराग्येण च कथञ्चित् प्राप्तुं शक्यतेऽन्यथा तत् प्राप्तिर्न भवति । तत्र मोक्षो न शरीरमात्रस्य तस्य पुनः प्राप्तिसत्त्वात् । मोक्षो हि रजस्तमोऽभावात् बलवत् कर्मसंक्षयाच्चात्यन्तिकसुखावाप्तिः, यत्र न पुनः शरीरप्राप्तिर्न चापि कर्म संयोगो भवति । भगवता वासुदेवेन गीतायाम्—"बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते । वासुदेवः सर्वमपि स महात्मा सुदुर्लभः ।" पुरुषो बहूनां जन्मनामन्ते इह खलु यत् किमपि तत् सर्वं वासुदेवस्वरूपमिति ज्ञानवान् भवेत्तदा मुक्तिर्भवति किन्तु ज्ञानमेतत्

परमदुर्लभमस्ति, जगति मानवो मायामोहासक्तः सन् न स्मरति भगवन्तम् रजस्तमोभ्यामुपहृतमनस्त्वात् । अतो मनसः शुद्ध्यर्थमुपायाः विधेयास्ते च सक्षेपेणाधो लिख्यन्त आत्मप्रबोधाय—

जगति कर्मविपाकनिमित्तकश्चतुरशीतिषु लक्षमितेष्वटन् ।
मनुजदेहमुपैति शरीरभृत् स्मर हरिं भवभीतिविनाशनम् ॥१॥

इह कृतस्य फलं खलु कर्मणो भवति नूनमतो हितकामुकः ।
नर-वरः परिमुञ्चतु कर्म तत्परिणतावशुभं फलदं भवेत् ॥२॥

वसुकलत्रसुतादिषु नश्वरेष्वनुरतोऽनिशमात्महितन्नरः ।
किमपि नेह करोति मुधा स्वकं त्यजति जीवनमाशु सुदुर्लभम् ॥३॥

अथ समीपगते मरणे यदा गलबिले सति रुद्धकफे तदा ।
भवति विह्वलता सहि मानसे सुसमयो विगतो मम चिन्तति ॥४॥

न च मया विहितं समयोचितम् किमपि सम्प्रति कालवशो भृशम् ।
इति मुहुर्विलपन् त्यजति ह्यसून् परमहो ! तपने न फलं किमु ॥५॥

अथो भुवि प्राप्य मनुष्ययोनिम् नेनां कदाचिद् गमयेद् वृथैव ।
मुहुर्मुहुर्नैति विचार्य विज्ञो धर्मादृतः स्यादिति शंकरोक्तिः ॥६॥

लोकेन तृष्णा भवतीह जीर्णा वित्तान्वितस्यापि च दृष्टमेतत् ।
जिता तु येनेह नरेण नूनं निश्छिद्यते तेन भवस्य बन्धः ॥७॥

एषा तु चित्ते रजसि प्रवृद्धे जायेत तस्मान् मनसो विशुद्धिम् ।
कुर्यान्नरः स्वस्य हितं चिकीर्षुं बन्धे च मोक्षे मन एव हेतुः ॥८॥

अथास्य चित्तस्य च शुद्ध्युपायान् वक्ष्यामि केचन मुनिभिः प्रदिष्टान् ।
गुरोः समीपे गमनं विधेयम् तेनोपदिष्टन्निखिलञ्च कार्यम् ॥९॥

वासो विधेयो मनुजैश्च सद्भिस्त्याज्या सदा दुर्जनसंगतिर्हि ।
शास्त्रेषु मोक्षप्रतिपादकेषु प्रीतिस्तदर्थावगमे च यत्नः ॥१०॥

शास्त्रानुसारं सकलं विधेयम् पराङ्मुखः स्यान्न कदापि शास्त्रात् ।
हितञ्च सत्यं मितवाक्यवादी काले स्वतुल्यं सकलं प्रपश्येत् ॥११॥

रजस्तमोवर्धकमत्र किञ्चिद् यच्चाप्य भोज्यन्नहि सेवनीयम् ।
एवं प्रकाराः बहवो ह्युपायाः शास्त्रेषु चित्तस्य विशुद्धिहेतोः ॥१२॥

कामश्च कोपश्च तथैव लोभो द्रोहाभिमानौ विषयेषु प्रीतिः ।
हर्षो विषादश्च मदश्च दैन्यं त्याज्याः सदैते मनसो विकाराः ॥१३॥

ये केचनोक्ता इह हृद्विकाराः प्रज्ञापराधादय आगमेषु ।
सर्वेऽपि ते चित्तविशोधनार्थं सेव्या न धीरैः पुरुषैः कदापि ॥१४॥

त्यागे तु कष्टं भवति प्रभूतम् कामादिकानां हृदयोद्भवानाम् ।
परं भविष्यत्समये सुखं यत् न तत् सुखं स्यादिह भोगतृप्तौ ॥१५॥

तस्माद् बुधैरत्र विचार्य सम्यक् कामादिशून्यं स्वमनो विधेयम् ।
सत्त्वस्य वृद्ध्यै यतनीयमाशु नोचेत्पुनर्जन्मवियोगचक्रम् ॥१६॥

भगवत् प्राप्तये भक्तिमार्गोऽपि श्रेष्ठतम उपायः । अस्मिन् वानप्रस्थसन्यास-योर्यानि कष्टानि तानि न भवन्ति गृहस्थाश्रमेऽपि भक्त्या भगवत् स्वरूपं प्राप्तुं शक्यते । भक्तिर्हि "भज्सेवायाम्" इत्यस्माद्धातोः स्त्रियाम् क्तिनि भक्तिरिति सिद्ध्यति । शास्त्र प्रतिपादितं भगवतः साकारं रुपं परिकल्प्यानन्यमनस्कतया तस्य पूजनं सेवनञ्च विधेयम् सा भक्तिः । अनया सदृशं वेदाध्ययनम्, यागस्तयोदानं नास्ति किमपि । गीतायाम् भगवता वासुदेवेनोक्तम्—

नाऽहं वेदैर्नतपसा न दानेन न चेज्यया ।
शक्य एवंविधं द्रष्टुं दृष्टवानसि मां यथा ॥
भक्त्या त्वनन्यया युक्तोऽहमेवंविधोऽर्जुन !
ज्ञातुं द्रष्टुञ्च तत्वेन प्रवेष्टुञ्च परन्तप ।

भक्तौ न द्रव्यव्ययो नचातिटकम्। पत्रं, पुष्पं, फलं, जलं वा यत्किमपि समीपे वर्तते भक्त्या भगवते तस्य समर्पणम् विधेयम् भगवान् तदेव स्वीकुरुते— यथोक्तम् गीतायाम् भगवता—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतो ह्यश्नामि प्रयतात्मनः॥

यद्यपि भगवतः सर्वविधाः भक्ता उदाराः सन्ति किन्तु निष्कामभक्तियुता भक्ताः श्रेष्ठाः। भक्त्या प्रभावेण ध्रुवप्रह्लादादय परमं पदं प्रापुः।

अहो! अस्मिन् कलौ मानवाः भक्तिज्ञानवैराग्यरहिताः सन्तः केवलमुदरम्भरयः सञ्जाताः न च ते कदाचिदपि विचारयन्ति स्वमनसि यद् वयमपि मरिष्यामोऽपितु "अहनि अहनि गच्छन्ति भूतानि हि यमालयमित्यपि उक्तिं चरितार्थयन्तो नात्महितं वास्तविकं साधयन्ति। भक्तिमार्गो निखिलमानवानां कृते लाभप्रदो न चापि कठिनः किन्तु सोऽपि नाश्रियते जनैरहो! महद् खलु दुःखम्। भगवता स्वयं प्रोक्तम् "अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्" अर्थात् लोकोऽयमनित्यः, असुखश्चास्ति। यद्यत्र पूर्वजन्मकृतसुकृतप्रभावेण धनपुत्रपौत्रकलत्रादि प्राप्तमपि पुरुषेण किन्तु न तत् स्थायि। प्रत्यक्षं खल्विदं यत् जगति जनिमाप्य न कोऽपि सर्वदैकस्थितौ तिष्ठति अतएव केनचिदुक्तम् "चक्रवत् परिवर्तन्तो सुखानि च दुःखानिच" अतो मनुष्येण गृहस्थाश्रमोक्तं कर्म विदधता परमसरलोऽयं भक्तिमार्ग उपादेय एव। नोचेत् मनुष्य जन्मनो न किमपि फलं प्राप्तुं प्रभवति स।

अतः परमानन्दस्वरूपिणो भगवतोऽर्चनपूजनादिकं विदध्यात्तस्यैव शोभनः परिणामो भवति नान्यथालाभप्राप्तिः। तथाचोक्तम्—

अनन्याश्चिन्तयन्त मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥

गीतायाम् भगवताः श्रीकृष्णेन दुग्धे घृतमिव साररूपं वचनं उपदिश्यते स्म, यथा—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥

भवानपि पन्थानमिममेवानसरतु ।

अग्रे वैराग्यमधिकृत्य किञ्चिद्विचार्यते- रञ्जत रागः-इति विगतो रागो विरागस्त स्यभावो वैराग्यम्– सन्यासापरपर्यायः । अयमन्तिम आश्रमः । अस्मिन्नाश्रमे सांसारिक सर्ववस्तूनां परित्यागं विधाय केवलं परमात्मनि मनो नियोज्यम् । भगवत्प्राप्तावयमपि समीचीन उपायः परमस्मिन् कष्टबाहुल्यं वर्तते । विपुलकष्टोऽप्ययं लाभकरत्वेन सेवनीय एव, यतोहि पुमान् मरणकाले यं कमपि विषयं स्मरति तदनुसारमेव स तत्तद् शरीरमाप्नोति, संन्यस्तश्चेद् भगवन्तमेव प्राप्नुयात्, यथोक्तम् ।

अन्तकालेऽपि मामेव स्मरन् मुक्त्वा कलेवरम् ।
यः प्रयाति त्यजन् देहं स याति परमाम् गतिम् ।।

अत्रोदाहरणम् सम्राजो भरतस्य विद्यते । सहि राज्यादिकमखिलमपि परिहाय वनमेत्य तत्र विपुलन्तपस्तेपे । तत्प्रभावात् स ज्ञानवानपि बभूव परं कस्माच्चिदज्ञात कारणात् मृत्युसमये तस्य मनो मृगशरीरमाप । अतः संन्यासस्य विपुलं महत्वम् वर्तते ।

उपरिवर्णितैः भक्तिज्ञानवैराग्यैः सांसारिकविषयेभ्योः निवृत्तिर्भवति शनैः–शनैः । एतानवाप्तुं भवान् श्रीमद्भागवतपुराणश्रीमद्भगवद्गीतादीनां सद्ग्रन्थानां श्रवणं मननञ्च करोतु ।

श्रेष्ठिवर्य ! मानवजीवनं सफलयितुमुपरि कतिचनोपायाः समुपवर्णिताः, एतेषु यं श्लाघ्यं मन्येत भवान् तमनसरतु । शुद्धमनसा यां कामपि सरणिम् गृह्णातु भवतो जीवनमवश्यमेव सफलं भविष्यति ।

फलतु लोकहिताय पुरातनी
क्षितितले पुनराश्रमपद्धतिः ।
नरगणो निजकर्मसु तत्परः
समुदयं लभतां कृपया प्रभोः ।।१।।

प्रसरतात् परितोऽमरगोः भुवम्
प्रणिगदन्तु सदा पुरुषो ऋतम् ।
उदयतां मनुजन्ममनः सु वै
धरणिरेव कुटुम्बकभावना ।।२।।

नाऽहं गुणी न च कवी रसशास्त्रवेत्ता
नाऽलङ्कृतिं हृदयमोदकरीञ्च जाने ।।
गद्यन्तथापि रचितं श्रमपूर्वकं वै
प्रेक्ष्य श्रमं हृदि मुदोऽनुभवन्तु सन्तः ।।३।।

श्रीमद्विष्णुसहस्रनामजपने बद्धादरस्यानिशम्
श्रीरामेश्वरदत्तभूसुर वरस्याद्यः सुतः श्रीयुतः ।
"धौलेडा" प्रियजन्मभूश्चमडियाभैषज्यगेहे वसन्
वैद्यः शङ्करलालशर्मं भिषगाचार्योऽधिकारी त्विह ।।४।।

शुभमस्तु